अज्ञातकर्तृको

दानकेलिचिन्तामणिः

सम्पादकः, व्याख्याकारश्च

पण्डितश्रीगोपालशास्त्री ‘दर्शनकेशरी’

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी

॥ सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम् ॥

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 133]

DĀNAKELICINTĀMAṆIḤ

With Sanskrit Commentary

EDITED BY

ŚRĪ GOPĀLA ŚĀSTRĪ DARŚANAKESARĪ

Ex-Visiting Professor

Sampurnanand Sanskrit University

Varanasi

VARANASI

1991

॥ सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम् ॥

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

●

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

●

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

●

First Edition—500 Copies
Price Rs. 46-00

●

Printed by—
Dr. Ram Manohar Mishra
O. S. D.
Sampurnanand Sanskrit University Press
Varanasi.

सरस्वतीभवन-ग्रन्थमाला

[१३३]

अज्ञातकर्तृको

दानकेलिचिन्तामणिः

अन्वय-भावार्थ-समासादिना त्रिधा व्याख्यानेन

विभूषितः

सम्पादकः, व्याख्याकारश्च

श्रीगोपालशास्त्री 'दर्शनकेसरी'

अतिथि-आचार्यचरः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

वाराणस्याम्

२०४८ तमे वैक्रमाब्दे १९१३ तमे शकाब्दे १९९१ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

•

प्रकाशकः —
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

•

प्राप्तिस्थानम् —
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२

•

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम् —४६-०० रूप्यकाणि

•

मुद्रकः—
डॉ० राममनोहरमिश्रः
विशेषाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयमुद्रणालयस्य
वाराणसी ।

प्ररोचना

गौडीयमाध्वसम्प्रदायानुवर्तिना केनचित् कविना **"दानकेलिचिन्तामणिः"** इति ग्रन्थः प्राणायि । अयं ग्रन्थः श्रीमद्रूपगोस्वामिनां **"दानकेलिकौमुदीम्"** अनुवर्त्य लिखितः । अस्मिन् ग्रन्थे दानलीलाप्रसङ्गो विस्तरेण प्रपञ्चितः । महामतिभिः श्रीगोपालशास्त्रिदर्शनकेशरिनामभिर्विद्वद्भिरस्य ग्रन्थस्य 'सुबोधा-व्याख्या' रचिता । अनया व्याख्यया ग्रन्थस्य स्वारस्यं हृद्यतामानीतम् । श्रीमद्गोपालशास्त्रिणोऽत्र अप्रकाशितग्रन्थसम्पादननिमित्तमेवातिथ्याचार्यरूपेण निमन्त्रिता आसन् । तस्यावधे-रेवायं ग्रन्थः सुफलम् । श्रीमद्गोपालशास्त्रिदर्शनकेशरिभिः सम्पादितं ग्रन्थं प्रकाश्य परितोषमावहामि ।

आशासे, सहृदयानन्दसन्दोहं जनयिष्यत्ययं ग्रन्थः ।

वाराणस्याम्
आषाढपूर्णिमायाम्,
वि० सं० २०४८

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्रस्तावना

ग्रन्थोऽयं नागरीलिपि-लिखितस्तु अस्ति; किन्तु अशुद्धिबहुलो विद्यते। मध्ये मध्ये वर्ण-भ्रान्ति-जनको लेखोऽस्ति। अक्षराण्यपि बहुत्र लेखेषु प्रच्युतानि सन्ति। पद्यानां पादा गलिताः सन्ति। कुत्रचित् पद्यपादो भिन्नच्छन्दस्कोऽस्ति, इत्यादि-बहु-दोष-पूर्णेऽपि ग्रन्थेऽस्मिन् मया सर्वाणि पद्यानि च्छन्दोनामान्वितानि स्व-लिपि-निबद्धानि कृत्वा व्याख्यातानि सन्ति। तत्र लेखक-दोषात् पद्यानां संख्या यद्यपि (१७२) एकं शतं द्वासप्ततिरेव लिखितास्ति। तथापि मया एकं शतं पञ्चसप्ततिः (१७५) पद्यानि पङ्कमयाद् अस्माद् भ्रष्ट-लेखात् समुद्धृतानि। अतश्च पञ्च-सप्तत्यधिकैक-शतात्मकम् (१७५) इदं **दानकेलि-चिन्तामणि**-ग्रन्थरत्नम् अस्तीति ज्ञेयम्।

१८७८ वैक्रमाब्दे १७४३ शाके आषाढे मासि कृष्णे पक्षे ७ सप्तम्यां भृगु-वासरे भरथ-पुर-गढमध्ये राज्ञो रणधीर-संघ-व्रजेन्द्रस्य आज्ञया केनापि हरिदेव-नाम्ना ब्राह्मणेन नागरीलिप्यां प्रतिलिप्यन्तरं कृतोऽयं ग्रन्थः। मूललिपिः कीदृशी का च सेति नास्ति समुल्लेखः। अनुमानं मे वङ्गलिपिरासीदिति। तर्कमग्रेदातास्मि।

अस्य ग्रन्थस्य लिप्यन्तरकरणे लिपिकर्तुः हरिदेव-ब्राह्मणस्यापि महान् परि-श्रमोऽभूदिति प्रतीयते। यतो हि स स्वयं स्व-निर्मितेऽनुष्टुप्-छन्दसि रुदन् वक्ति—

'पुस्तक-लिखन-परिश्रम-वेत्ता विद्वज्जनो नान्यः।
सागर-लङ्घन-खेदं हनुमानेकः परं वेद॥ इति।

इत्थं तदीयं ग्रन्थस्यान्ते पद्यं विद्यते। आर्यागीत्याम्। ग्रन्थ-रचयितुः कवेः क्वापि ग्रन्थेऽस्मिन् नाम-ग्रामाद्युल्लेखो नास्ति। मया यथाकथञ्चित्तर्केण मङ्गल-पद्येन आवसानिकपद्यैश्च कियद्भिस्तर्कितोऽयमर्थो यदयं कविः केशवाचार्यस्य कस्यापि गुरोः शिष्यो वङ्गीयः श्रीरूपगोस्वामि-सम्प्रदायगो विशिष्टः साधुवृत्ति-र्वृन्दावननिवासी प्रज्ञाचक्षुरन्धोऽस्ति। अवसानेऽपि सर्वत्रानुस्वारं करोतीति बङ्गीयः। अधस्तनानि पद्यानि चान्यान्यनुमाने प्रमाणानि, तथा हि—

॥ श्रीकेशवाचार्याय नमः॥

उद्दाम-नर्म-रस-रङ्ग-तरङ्गकान्त-
राधा-सरिद्-गिरिधरार्णव-संगमोत्थम्।
श्री-रूप-चारु-चरणाब्ज-रजः-प्रभावा-
दन्धोऽपि दान-नव-केलि-मणिं चिनोमि॥ २॥

मङ्गलपद्यमिदं द्वितीयम् । आवसानिकं च पद्यत्रयं पश्यन्तु, तथा हि—

दध्यादिदान-नव-केलि-रसाब्धिमध्ये
मग्नं नवीन-युव-रत्न-युगं व्रजस्य ।
नर्मालि-हृद्य-मुदित-द्युति-गौर-नील-
मन्धोऽपि लुब्ध इह लोकितुमुत्सुकोऽस्मि ॥ १७३ ॥

राधा-माधवयोर्दान-केलि-चिन्तामणिं गिरौ ।
लब्धमन्धेन वीक्षन्तां श्रीमद्रूप-गणाः प्रियाः ॥ १७४ ॥

आददानस्तृणं दन्तैरिदं याचे पुनः पुनः ।
श्रीमद्रूप-पदाम्भोज-रजोऽहं स्यां भवे भवे ॥ १७५ ॥

इत्थं मया 'श्रीकेशवाचार्याय नमः' प्रथमवन्दनया तथा ग्रन्थस्थ-पद्य-चतुष्टयेनेदं तर्कितं प्रतीयते यत् कविरयं प्रज्ञाचक्षुरन्धो बङ्गदेशीयो रूप-गोस्वामि-सम्प्रदाय-मध्यगश्चेति ।

रूप-गोस्वामिमहाराजो हि (१४७१) चतुर्दशशतैकसप्ततिशाके तदनुसारम् (१५४९) पञ्चदशशतोनपञ्चाशत्-ख्रैस्ताब्दे बङ्गदेशेऽभूत् । तल्लिखित-'**दानकेलि-कौमुदी**' नाम्नो भाणिका-ग्रन्थस्यैवाधारेणायं स्वग्रन्थो विरचितोऽयं कविना । यद्यपि कवेः समयस्य नियत-देश-ग्रन्थ-विरचनकालाद्युल्लेखो न क्वाप्युपलभ्यते, तथापि रूपगोस्वामि-परकालवर्ती तत्-सम्प्रदायभाक् कश्चन बङ्गदेशोद्भवः प्रज्ञाचक्षुरन्धो वैष्णवः साधुवृत्तिरयमिति सिध्यत्येव ।

सम्प्रति रूपगोस्वामिविरचितं '**दानकेलिकौमुदी**' नामकं पुस्तकं तु मया वाराणसेय-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य ग्रन्थागाराध्यक्षस्य श्रीमतः श्रीलक्ष्मी-नारायणत्रिपाठिनो महोदयस्य प्रसादेन समुपलब्धम् । बङ्गाक्षरलिपिनिबद्धेन तेन तथा 'चौखम्भा-संस्कृतसीरीज'-संस्थया मुद्रितं विविधनाटक-वृत्तसूचकम् 'आधुनिक-संस्कृतनाटकम्' इति नामकं भागद्वये निबद्धं ग्रन्थरत्नं च वीक्ष्येदं निर्धारितं यत् (१४७१) चतुर्दशशतैकसप्ततिशाकनिर्मितदानकेलिकौमुदीग्रन्थादुत्तरकालिकोऽयं कविः । श्रीगोस्वामिमहोदयोऽपि एतस्य गुरुवन्मान्यो दृश्यते । इति समकालिको वा किञ्चिन्न्यूनकालिको वेति १५ पञ्चदशशताब्द्यां १६ षोडश-शताब्द्यां वाऽयं कविः स्वजन्मना बङ्ग-भुव-मलञ्चकारेति शिवम् ।

सम्प्रति प्रसङ्गप्राप्तं ग्रन्थस्यास्य संक्षिप्तमितिवृत्तं प्रस्तूयते—

मम दृष्टौ काव्येऽस्मिन् नान्दीपाठ-सूत्रधार-मारीषादिप्रस्तावनावृत्ताभावेन दृश्यकाव्यं तु नास्तीदं खण्डकाव्यम्; किन्तु श्रव्यकाव्येषु पद्यात्मकं विविधच्छन्दः-

शालिगोष्ठीरूपं लघुकायं भक्तिवर्द्धकं राधाकृष्णसंलापात्मकं हास्य-विनोदप्रदं मुक्तकलक्षणकं कथञ्चित् प्रतिभाति।

तदानीन्तन-प्रसिद्धया क्वापि स्व-निवासान्तिकप्रदेशे समारब्धेषु यागादि-पुण्यकर्मसु गोप-कन्याभिस्तत्र तत्र स्वयं स्वनिलयाद् गुरुपितृमातृभ्रात्रादि-बन्धुजनानुज्ञया दधि-दुग्ध-घृतादिगव्यद्रव्याणां प्रदानं क्रियते स्म।

तद्रीत्यनुसारमेव क्वचिन्निष्कुटे (गृहारामे) समारब्धे सत्रे (यागे) तादृशस्यैव गव्यादिद्रव्यस्य सम्प्रदानं निमित्तीकृत्य कथावृत्त-विवृत्तिर्दृश्यते। तथा हि—

वृन्दावने गोविन्द-कुण्डस्थाने सत्रं कर्तुं मुनिवृन्दैः सह भागुरिनामा कश्चिन् महामुनिः शौरिणा प्रेरितो यज्ञ-दीक्षां जग्राह। तत्र राधाप्रभृतयो गोपकन्याः सवयस्कालिभिः सहिता गव्यादिद्रव्यं सम्प्रदातुं स्वालयाच्चलन्ति। तासां सत्रं जिगमिषूणां बालानां नगर-शुल्क-शालावसथे कियन्तः सुमङ्गल-श्रीकृष्ण-प्रभृतयः समवयस्काः सुहृदो मिलन्ति। तत्रैवावसरं प्राप्य शुल्कग्रहणं निमित्तीकृत्य उभयोः सवयस्कयोर्गोपकुमारयोः श्रीराधा-श्रीकृष्णयोः परस्परं हास्य-विनोद-व्यङ्ग्य-वार्ता प्रारब्धा भवति। सा हि विविधैः प्रकारैः कुतूहल-प्रियैः सवयस्कैः सुहृद्भिः कौतुकिनीभिश्च समवयस्काभिरालिभिश्चालिता ग्रन्थान्तमुत्तरोत्तरं प्रवर्द्धमाना प्रचलति।

निदर्शनार्थम् एकं पद्यं समुद्धरामि, येन सूच्यते गव्यं गृहीत्वा सत्रं व्रजन्तीनां राधाप्रभृति-गोपकन्यानां बाधां कर्तुं शुल्कशालाध्यक्षो मधुमङ्गलो नाम श्रीकृष्ण-वयस्यस्तं संकेतयति। अयि सखे! इयं राधा गव्यं द्रव्यं प्रदातुं सत्रं गच्छति। तद् भवान् अस्याः शुल्कग्रहणमिषेण अत्रैव बाधको भवतु। इत्यत एवारब्धोऽस्ति। वाक्केलि-रूप-हास्य-विनोद-व्यङ्ग्य-वार्तापरस्परं सम-वयस्कानां गोप-यूनां गोप-युवतीनां चेति। तथा हि द्वित्राणि पद्यानि निदर्शन-रूपत इहोद्ध्रियन्ते, पश्यन्तु तत्र-भवन्तो भवन्तः—

मत्तास्ता मधुरैर्भावैर्मधुरा मधुमङ्गलः।
दृष्ट्वा स्मित्वाऽथ सक्रोधमुवाच मधुमर्दनम्॥ ३०॥

अयि सखे—

गर्वेण फुल्लमधुना मधुनाऽतिमत्ता
मत्तालिभिः सममन्दबलाऽबलाऽपि।
गच्छत्यसौ स्फुटमदन्तकरा हि राधा
बाधां कथं नहि वयस्य! बलात् करोषि॥३१॥

इत्यत एव दान-केलि-निमित्ता वाक्केलिरूपा प्रारब्धा हास्य-विनोद-व्यङ्गच-वार्ता सवयस्ययोरुभयो राधाश्रीकृष्णयोः समेधमेधमाना विविध-हाव-भाव-चमत्कार-विजृम्भणशालिनी ग्रन्थान्तं कौतूहल-पूर्णा हि प्रसर्पति। तत्रैव प्रज्ञाचक्षुरन्धः कवि-रयं स्वीयमन्तरङ्गभावं विवृण्वन् ब्रूते—

वध्यादि-दान-नव-केलि-रसाब्धिमध्ये
मग्नं नवीन-युव-रत्न-युगं व्रजस्य।
नर्मालि-हृद्य-मुदित-द्युति-गौर-नील-
मन्धोऽपि लुब्ध इह लोकितुमुत्सुकोऽस्मि ॥१७३॥

राधा-माधवयोर्दान-केलि-चिन्तामणिं गिरौ।
लब्धमन्धेन वीक्षन्तां श्रीमद्रूप-गणाः प्रियाः ॥१७४॥

इत्यादि पद्यैर्ग्रन्थ-समाप्तिं च करोति। इति हि अतिसंक्षिप्तं ग्रन्थेतिवृत्तम्। इतोऽग्रे सव्याख्यानं ग्रन्थारम्भः, इति प्रस्तावनासमाप्तिः शुभावहा स्यात्।

गोपालशास्त्री 'दर्शनकेशरी'

विषयानुक्रमणिका

अज्ञातकर्तृको

दानकेलिचिन्तामणिः

लीलाद्भुतव्यसनिनः सह-शक्तिकस्य
संक्रीडनाय यदिदं जगदाविरास्ते ।
राधा-विलास-विदुषो बहु-वाग्विलासं
चिन्तामणिं विवरितुं तदिहोद्यमं मे[1] ॥ १ ॥

अज्ञात-नामा कश्चित् प्रज्ञा-चक्षुरन्धो वङ्गदेशीयः साधुवृत्तिः कविः स्वगुरुं केशवार्यं प्रथमं ततश्च गान्धर्वा-गिरिधरौ प्रणमन् 'दानकेलिचिन्तामणिम्' ग्रन्थ-रत्नं प्रणिनिनीषुर्मङ्गलमाचरति 'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्' इति भरतमुनि-सूत्रबलात् सर्वाभ्यर्हितम् आशीर्वादात्मकं मङ्गलमाबध्नाति—मगण-मुख्येन शार्दूलविक्रीडितच्छन्दसा—

कुर्वाणैः शतमाशिषां निज-निज-प्रेयोजयायोत्सुकैः
स्वीय-स्वीय-गणैः स्फुटं कुटिलया वाचाऽतितुङ्गीकृतः ।
गव्यानां नव-दान-कल्पन-कृते प्रौढं मिथः स्पर्द्धिनो-
र्गान्धर्वा-गिरि-धारिणोर्गिरि-तटे केली-कलिः पातु वः ॥ १ ॥

अन्वयः—निज-निज-प्रेयो-जयाय उत्सुकैः आशिषां शतं कुर्वाणैः स्वीय-स्वीय-गणैः कुटिलया वाचा स्फुटम् अतितुङ्गीकृतः गव्यानां नव-दान-कल्पन-कृते गिरि-तटे मिथः प्रौढम् (यथा स्यात्तथेति क्रियाविशेषणम्) स्पर्द्धिनोः गान्धर्वा-गिरि-धारिणोः केली-कलिः वः (युष्मान् पाठकान्) पातु (इत्याशिषि लोट्) ।

भावार्थः - कविर्मङ्गलम् आतनोति—यत् क्वापि यज्ञविधौ गव्य-घृत-प्रदान-प्रसङ्गतो मिलितयोः श्रीराधा-श्रीकृष्णयोः परस्परं विजयार्थमेव प्रयुज्यमाना स्व-स्व-सखिनिवहैः समवयस्कैः हास्य-विनोद-व्यङ्ग्यविजृम्भमाणा वाक्केलीकलिः ग्रन्थ-पाठकान् संरक्षेदिति ।

समासादिः—गान्धर्वा (राधा) गिरिधारी (श्रीकृष्णः) चेति तौ तयोः । निजाश्च निजाश्चेति द्वन्द्वात् ते च ते प्रेयांस इति निज-निज-प्रेयांसः, तेषां जयः, तस्मै । इति कर्मधारय-गर्भस्तत्पुरुषः । स्वीयाश्च स्वीयाश्चेति द्वन्द्वात् ते च ते गणा इति तैः, पूर्ववत् समासः । नवं च तद्दानं तस्य कल्पनं तस्य कृते । केल्यै कलिः

---

१. मे मम पण्डितराज म० म० डॉ० श्रीगोपालशास्त्रिणो दर्शनकेशरिणः । (काशीपण्डित-सभाध्यक्षस्य, राष्ट्रपति-सम्मानितस्य) ।

केलीकलिः, केलिरिति पुंसि पठितोऽपि स्त्रीत्वविवक्षया 'कृदिकारादक्तिनः–४।१।४५' इति ङीष्। अत्र वृत्तिश्रुत्यनुप्रासौ शब्दालङ्कारौ, तल्लक्षणे यथा–

अनेकस्यैकधा साम्यमसकृद्वाऽप्यनेकधा।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥(१०।४)

उच्चार्यत्वाद्यदेकस्य स्थाने तालु-रदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥(१०।५) इति ॥१॥

ततः कविः स्वाहङ्कारं परामार्ष्टि वसन्ततिलकया—

उद्दाम-नर्म-रस-रङ्ग-तरङ्ग-कान्त-
राधा-सरिद्-गिरि-धरार्णव-सङ्गमोत्थम्।
श्रीरूप चारु-चरणाब्जरजःप्रभावा-
दन्धोऽपि दान-नव-केलिमणिं चिनोमि॥ २॥

अन्वयः—अन्धः अपि (अहं कविः) श्रीरूप-चरणाब्जरजःप्रभावात् (अत्र श्लेषालङ्कारेण लक्ष्मीनारायण-पादपद्मधूलिप्रतापात् पक्षान्तरे श्रीरूप-गोस्वामिपादपद्म-धूलिप्रतापात्) उद्दामनर्म-रस-रङ्ग-तरङ्ग-कान्त-राधा-सरिद्-गिरिधरार्णव-सङ्गमोत्थम् (अत्रापि रूपकोपमालङ्कारभेदेन द्विधा समासेन 'नर्म-रस-रङ्ग-कान्त-राधा-गिरिधर-सङ्गमोत्थं दानकेलिचिन्तामणिं ग्रन्थम्', पक्षान्तरे तरङ्ग-कान्त-सरिद्-अर्णव-सङ्गमोत्थं दानचिन्तामणिं रत्नम्) चिनोमि (विरचयामि पक्षान्तरे संगृह्णामि)।

भावार्थः—अत्र श्लेष-रूपकोपमाविरोधाद्यलङ्कारमहिम्ना विविधार्थेन पद्येन अन्धः कविः स्वाहङ्कारं परिमार्ष्टि। लक्ष्मीनारायण-पादपद्म-धूलि-प्रतापात्, पक्षान्तरे रूपगोस्वामि-पाद-पद्म-धूलि-प्रतापाद् उद्दाम-तरङ्ग-कान्त-सरिदर्णवसङ्ग-मोत्थं दानचिन्तामणिरत्नम् इव उद्दाम-नर्म-रस-रङ्ग-कान्त-राधा-गिरिधर-सङ्गमोत्थं दान-केलि-चिन्तामणिं ग्रन्थं रचयामि। यथा कोऽपि चतुरः पुरुषो नदीनां चञ्चलतरङ्गशालिसमुद्रेण सङ्गमे सति समुत्पन्नानि तत्र रत्नानि समुद्रे विकीर्णानि संगृह्णाति, तथैव अहं राधा-गिरिधरयोः उद्दाम-नर्म-रङ्ग-वर्णन-कान्त-(मनोहर) दान-केलि-चिन्तामणिं ग्रन्थरत्नं विरचयामीति।

समासादिः—उद्दामानि च तानि नर्म-रस-रङ्गाणि इति कर्मधारयं कृत्वा तानि तरङ्गा इवेत्युपमितसमासः। तान्येव तरङ्गा इति मयूरव्यंसकादित्वाद् रूपक-समासं विधाय ततस्तैः कान्तः, इति उद्दामनर्म-रस-रङ्ग-तरङ्गकान्तः इति पृथक् पदम्, ततः राधा सरिद् इवेत्युपमितसमासः। राधैव सरिदिति मयूरव्यंसका-दित्वाद्रूपकं वा तथा गिरिधरः अर्णव इव, गिरिधर एव अर्णवो वेति पूर्ववदुभय-

समासं विधाय राधा सरिच्च गिरिधरार्णवश्चेति द्वन्द्वानन्तरं तयोः सङ्गमस्तस्माद् उत्थम् । इति द्वन्द्वगर्भस्तत्पुरुषः । ततः–रूपयति नाम-रूपाभ्यां जगत् प्रकाशयतीति रूपः नारायणः, श्रीश्च रूपश्च तौ श्रीरूपौ लक्ष्मी-नारायणौ । पक्षान्तरे नाम-स्थाने नामैकदेशग्रहणमिति न्यायात् श्रियासहितः रूपः रूपगोस्वामीति शाकपार्थिवादिसमासे श्रीरूपः । अत्र पक्षे तस्य चारुचरणौ अब्जे इव तयोः रजांसि तेषां प्रभावस्तस्मात् । पक्षान्तरे तयोः लक्ष्मीनारायणयोः (श्रीरूपयोः) चरणा अब्जानि इव तेषां प्रभावस्तस्मात् । इति समासप्रकारः । दान-नव-केलि-मणिशब्देऽपि दानेन यज्ञे गव्यादि-दाननिमित्तेन नवकेलिः नूतनक्रीडा (राधा-गिरिधरयोः) एव मणिः यत्रेति ग्रन्थपक्षे, पक्षान्तरे दानं च (अन्येभ्यो दातुम्) नवानां बालानां केलिः क्रीडा (केलिः पुंसि इत्यमरः), तस्यां मणिः (रत्नम्) तम्, समुद्राद्‌रत्नादिसंग्रहो दानार्थं बालक्रीडार्थं च यथा भवति । तं संग्रहम् अन्धः कर्तुं न प्रभवति, अहं तु श्रीरूपचरणकमलरजःप्रभावात्करोमीति विरोधालङ्कारोऽप्यत्र । सर्वेषां संक्षिप्त-लक्षणानि—

रूपकं रूपितारोपाद्विषये निरपह्नवे ।
यत्र कस्यचिदारोपः यः परारोपण-कारणम् ।
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ॥२९॥

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।
जातिश्चतुर्भिर्जात्याद्यैर्गुणा गुणादिभिस्त्रिभिः ॥६७॥

क्रियाक्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ॥६८॥

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ॥ इति ॥२॥

सम्प्रति मन्दाक्रान्ताछन्दसा वर्णनीयमितिवृत्तं प्रस्तौति प्रज्ञाचक्षुः कविः—

साहाराख्यं जयति सदनं गोकुले गोकुलेश-
भ्राता मन्त्री वसति सुमतिस्तत्र नाम्नोपनन्दः ।
तस्य श्रीमान् निखिल-गुणवान् सूनुराद्यः सुभद्रो-
भार्य्या तस्यातुलगुणवती कुन्द-पूर्वा लताऽऽस्ते ॥ ३ ॥

अन्वयः—गोकुले साहाराख्यं सदनं जयति । तत्र सुमतिः नाम्ना उपनन्दः गोकुलेश-मन्त्री वसति । तस्य निखिल-गुणवान् श्रीमान् सुभद्रः आद्यः सूनुः आस्ते । भार्या तस्य अतुलगुणवती कुन्द-पूर्वा लता (कुन्दलता) आस्ते ।

भावार्थः—अत्र गोकुलनगरे 'साहारा' इति नामकं भवनम् अत्युत्कृष्टं विराजते । तत्र गोकुलेशस्य गोकुलनगरस्वामिनः मन्त्री 'उपनन्द' इति नाम्ना प्रसिद्धो वसति । तस्य ज्येष्ठः पुत्रः 'सुभद्रः' इति, भार्या 'कुन्दलता' इति नामभृद् अतिचतुरा अस्ति ।

समासादिः—साहारा आख्या यस्य तत् सदनम् इति विशेष्यम्। कुन्दः पूर्वो यस्याः सा लतेति विशेष्यम्। 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इतिवत् साधुः। स्वभावोक्तिरलङ्कारः। शाब्दोऽनुप्रासश्छेकः। लक्षणम्—

स्वभावोक्तिदुरूहार्थ-स्वक्रियारूपवर्णनम् ॥९२॥

छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा ॥३॥

इतोऽग्रे तेनैव च्छन्दसा सखीद्वय-वार्तामुखेन विशेष-कृत्यमाख्याति—

पुष्पैर्भृङ्गैर्विविधविहगैर्भ्राजदुर्वीरुहाणां
षण्डैः सम्यग् विलसिततमे निष्कुटे सौरभाढ्ये।
खेलन्त्योरुप्रणयमनया हन्त कुत्राधुना तौ
कुर्वाते किं किमिति सुमुखी तत्र पृष्टा वयस्या ॥ ४ ॥

अन्वयः—तत्र 'साहारा'-सदनसमीपे पुष्पैः भृङ्गैः विविध-विहगैः भ्राजदुर्वीरुहाणां षण्डैः (समूहैः) सम्यक् विलसिततमे सौरभाढ्ये निष्कुटे (गृहारामे) उरु-प्रणयं (यथा स्यात्तथेति क्रियाविशेषणम्) खेलन्त्या अनया (मन्त्रिभार्यया कुन्दलतया) हन्त (आनन्दविषयोऽयम्) अधुना तौ (राधा-माधवौ) कुत्र (प्रदेशे) किं किं कुर्वाते। इति काचित् सुमुखी वयस्या सखी पृष्टा (अभूदिति शेषः)।

भावार्थः—'साहारा'-नाम्नो मन्त्रिभवनस्य समीपे विविध-विहग-पुष्प-भृङ्ग-सम्भृत-वृक्षलतादिगुल्म-संघशोभिते गृहोद्याने अतिप्रेम्णा खेलन्ती मन्त्रि-भार्या कुन्दलता काञ्चन सुमुखीं सखीं पृष्टवती यद् राधा-माधवौ कुत्र प्रदेशे किं किं कुरुतः ? इति मां बोधयेति।

समासादिः—भ्राजन्तश्च ते उर्वीरुहाः भ्राजदुर्वीरुहाः, तेषाम्। सौरभेण आढ्यः, तस्मिन्। 'गृहारामस्तु निष्कुटः' इत्यमरः। सुष्ठु मुखं यस्याः सेति बहुव्रीहौ 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्–४।१।५४' इति ङीष्। शाब्दश्छेकानुप्रासः। लक्षणमुक्तं पूर्वपद्ये। 'कदम्बे षण्डमस्त्रियाम्' इत्यमरः। क्वापि खण्ड इति पाठः। तालव्यो मूर्धन्यो वा अब्जादिसंघे वृषके तु मूर्धन्य एवेति पूर्वाचार्याः ॥ ४ ॥

इदानीं पृष्टा सखी तदुत्तरं दातुं प्रक्रमते—

तस्याः श्रीमद्वदनकमलाज्जल्प-माध्वीकधारा-
स्यन्दं शस्तं गिरिवरधर-प्रश्न-कर्पूरकस्त्रम्।
पीत्वानन्दोच्छलित-पुलकोज्जृम्भ-सम्भावुकश्रीः
सा तद्वार्तां प्रथयितुमथारम्भमुत्का चकार ॥ ५ ॥

अन्वयः—अथ सा (पृष्टा द्वितीया सखी) उत्का (उत्सुका) गिरिवरधर-प्रश्नकर्पूरकस्त्रं शस्तं तस्याः श्रीमद्वदनकमलाद् विनिर्गतं जल्प-माध्वीक-धारा-

स्यन्दं पीत्वा आनन्दोच्छलित-पुलकोज्जृम्भसम्भावुकश्रीः सती तद्वार्तां (श्रीराधा-कृष्णसंवादविषयिकाम्) प्रथयितुम् आरम्भं चकार कृतवतीति ।

भावार्थः—कुन्दलताप्रश्नानन्तरं समुत्सुका द्वितीया पृष्टा सखी तस्याः कुन्दलतायाः श्रीमद्वदनाद् विनिर्गतं शस्तं प्रशस्तं श्रीकृष्ण-विषयकप्रश्नरूपकर्पूर-सुगन्धिरमणीयं जल्पमाध्वीक-धारा-स्यन्दं = संलाप-मधु-धारा-प्रवाहं पीत्वा आनन्दोच्छलितपुलकोज्जृम्भभावुकश्रीः = श्रीकृष्णविषयकप्रश्न-श्रवणजन्यानन्दतुन्दिला पुलकाञ्चिता सम्यक् समृद्धोत्सा भूत्वा तद्वार्तां राधा-कृष्ण-संवादवार्तां तत्-प्रश्न-वार्तां वा प्रथयितुं विस्तारयितुं प्रारम्भं कृतवतीति ।

समासादिः—श्रीमच्च तद् वदनकमलम्, तस्मात् । वदनं कमलमिवेति उपमितसमासः । जल्पः माध्वीक इव तस्य धारा तस्याः स्यन्दः, तम् । घञ्-प्रत्ययान्तोऽयमिति पुंस्त्वम् । गिरिवरस्य धरः तस्य प्रश्नः । स च कर्पूर इव कम्र इति गिरिवर-धर-प्रश्न-कर्पूरकम्रः तम् । आनन्देन उच्छलितश्चासौ पुलकः, तस्य उज्जृम्भः, तेन सम्भावुका श्रीः यस्याः सा । अत्रोपमालङ्कारो गर्भितः । तल्लक्षणम्—

साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ॥ (साहि० १४)
उपमा यत्र सादृश्य-लक्ष्मीरुल्लसति द्वयोः ॥ (चन्द्रालोकः) ॥५॥

अधुना सत्रारम्भं प्रस्तौति—

शस्तस्यार्थे स्वसुत-हलिनो मित्र-पुत्रस्य शत्रो-
रप्यासक्त्या प्रतिनिधितया शौरिणा सम्प्रयुक्तः ।
सत्रं कर्तुं रहसि भगवान् भागुरिर्दीक्षितोऽभूत्
स्नेहोल्लासैः सह मुनिगणैस्तत्र गोविन्द-कुण्डे[१] ॥ ६ ॥

अन्वयः—स्व-सुत-हलिनः मित्र-पुत्रस्य शस्तस्य ('शस्त' इति श्रीकृष्णस्य प्रियमुल्लापननाम) अर्थे (मङ्गल-कामनया) शत्रोः कंसस्य अपि आसक्त्या (वधरूपया) शौरिणा प्रतिनिधितया सत्रं कर्तुं रहसि (विजनप्रदेशे) सम्प्रयुक्तः भगवान् भागुरिः स्नेहोल्लासैः मुनिभिः सह तत्र (गोकुले) गोविन्द-कुण्डे दीक्षितः अभूत् (यज्ञ-दीक्षामग्रहीदित्यर्थः) ।

भावार्थः—स्व-सुतस्य हलिनो बलभद्रस्य मित्र-सूनोः शस्तस्य अतिप्रिया-ख्यस्य श्रीकृष्णस्येत्यर्थः । रक्षानिमित्तं शत्रोः कंसस्य अपि आसक्त्या शत्रुहननरूपया सत्रं कर्तुं शौरिणा रहसि प्रतिनिधितया संनियुक्तः भगवान् पूज्यो भागुरिः, इत्याख्यो मुनिः स्नेह-संवृद्धैः मुनि-गणैः सह तत्र गोकुलनगरे 'गोविन्दकुण्ड' इति प्रसिद्धस्थले दीक्षितोऽभूत्, यज्ञं कर्तुं दीक्षाग्रहणं कृतवान् ।

१. अत्र 'गोविन्दकुञ्जे' इति पाठान्तरम् ।

समासादिः--हर्षस्य उल्लासो येषु ते तैरिति व्यधिकरणबहुव्रीहिः। स्वस्य सुतः, स चासौ हली तस्येति। शस्तस्येति श्रीकृष्णस्य मातृपित्रुल्लापनप्रियनाम 'शस्त', 'प्रशस्त' इत्यादि नाम-संक्षेप-प्रथा चलत्येव। 'बालकृष्ण' स्थाने 'अये बाल' 'अये कृष्ण' इत्येव बहुधा श्रूयते ॥६॥

तदानीन्तनीयं प्रथा प्रतिभाति। यत्र क्वापि यज्ञानुष्ठानं स्यात्तदा तत्स्थान-पार्श्वस्थिता गोपकन्या यज्ञे गव्यादिपदार्थं स्वयं प्रापयेयुः। तदनुष्ठायिनश्च मुनयः सर्वे गव्यद्रव्यप्रदात्रीभ्यस्ताभ्यो गोपकन्याभ्योऽलङ्कारवस्त्राद्युपहारान् दद्युरिति। तामेव प्रथां निर्दिशति कविः--

तस्मिन् सत्रे रुचिरमचिरं नव्य-गव्यं स्वयंधा
धृत्वा नीतं शिरसि शुचयो दद्युराभीर-रामाः।
ताभ्यः कामानथ मणिगणालङ्कृतीः सौभगं च
प्रीत्या सत्यं सदसि मुनयो हन्त यच्छन्ति सद्यः ॥ ७ ॥

अन्वयः—तस्मिन् सत्रे शुचयः (अविवाहिताः) स्वयंधाः आभीररामाः (गोपकन्याः) अचिरं (द्रुतम्) रुचिरं नव्य-गव्यम् (हैयङ्गवीनम्) शिरसि धृत्वा आनीतं दद्युः (अर्पयेयुः), अथ अनन्तरं सदसि स्थिताः मुनयः सद्यः (शीघ्रम्) ताभ्यः कामान् (अभीष्टपदार्थान्) मणिगणालङ्कृतीः सत्यं सौभगं च प्रीत्या यच्छन्ति। हन्त, हर्षप्रदेयं प्रथेत्यर्थः।

भावार्थः—तस्मिन् भागुरिमुनि-समारब्धे यागे गोपकन्याः स्वयमेव हैयङ्गवीनादि गव्यद्रव्यं शिरसि धृत्वा द्रुतम् आनीय दद्युः। तत्र सदसि यज्ञसभायां स्थिता मुनयः अपि झटित्येव ताभ्यः मनोरथान् मणिगणाद्यलङ्कारान् अवश्यभव्याम् आशिषं च प्रयच्छन्तीति हर्षप्रदेयं लोकप्रथा।

समासादिः--आभीरा गोपाः, तेषां रामाः कन्याः। 'गोपे गोपाल- गोसंख्य-गोधुगाभीरवल्लवाः' इत्यमरः। मणीनां गणास्तैः सहिता अलङ्कृतयः इति शाकपार्थिवादित्वाद् मध्यमपदलोपसमासे ताः यच्छन्तीत्यस्य कर्म। अत्र परिवृत्तिरर्थालङ्कारः। तद्यथा--

परिवृत्तिविनिमयः समन्यूनाधिकैर्भवेत्। (१० ८०) ॥७॥

तयैव प्रथया राधिकापि सत्रे हैयङ्गवीनादिद्रव्यं दातुं स्वस्थानाच्चलितेति विशेषकेन वर्णयति--

नानावृक्षैर्मधुकररुत-स्यन्दि पुष्पाभिरम्यैः
कुञ्जस्तोमैरपि च परितस्तादृशैर्भ्राजितस्य।
सौरभ्याढ्यैः कुमुदकमलैः शीधुफुल्लैर्विराज-
त्पानीयस्य स्वकृतसरसस्तीर कुञ्जे वसन्ती ॥ ८ ॥

श्रुत्वैवैतन्निभृतविवृतिं सूक्ष्मधीशारिकास्याद्
उत्कण्ठाभिस्तरलितमनाः सप्रियालीगणा सा ।
स्नात्वा सम्यग् विविधवसनैर्भूषणैर्भूषिताङ्गी
काश्मीरैस्तत्प्रणय-पटलैरप्यलं भूषिता च ॥ ९ ॥

कृत्वा पूजामथ दिनमणेः शुद्धभावेन शुद्धा
बद्धाकांक्षं हृदय-गगने गोष्ठचन्द्रं स्मरन्ती ।
हैमं कुम्भं निहित-विकसद्-गन्ध-हैयङ्गवीनं
धृत्वा प्रीत्या शिरसि चलिता राधिका स्वीयकुण्डात् ॥१०॥

अन्वयः—मधुकररुत-स्यन्दिपुष्पाभिरम्यैः नानावृक्षैः तादृशैः परितः (विद्यमानैः) कुञ्जस्तोमैः अपि च भ्राजितस्य सौरभाढयैः शीधुफुल्लैः कुमुद-कमलैः विराजत्पानीयस्य स्वकृतसरसः तीरकुञ्जे वसन्ती (राधिकेति शेषः) ।

सूक्ष्मधीशारिकास्याद् एतन्निभृतविवृतिं श्रुत्वा एव उत्कण्ठाभिः तरलितमनाः सप्रियालीगणा सा सम्यक् स्नात्वा विविधवसनैः भूषणैः च भूषिताङ्गी तत्प्रणय-पटलैः काश्मीरजैः अपि अलं भूषिता (लिप्ता) च ।

अथ शुद्धभावेन दिनमणेः पूजां कृत्वा शुद्धा च हृदय-गगने बद्धाकांक्षं गोष्ठ-चन्द्रं स्मरन्ती सा रंधिका निहित-विकसद्-गन्ध-हैयङ्गवीनं हैमं कुम्भं प्रीत्या शिरसि धृत्वा स्वीय-कुण्डात् चलिता अभूदिति शेषः), (दिनपतेरिति पाठान्तरम् । तथैव स्वीयकुञ्जादिति) ।

भावार्थः—मधुकरगुञ्जन-सम्भृत-पुण्यशालिबहुवृक्षयुक्तस्य तथैव मधुकरादि-विशिष्टकुञ्जस्तोमशालिनोऽपि स्वनिर्मापिततटाकस्य तीरकुञ्जे निवसती राधिकापि चतुरायाः शारिकाख्यायाः सख्युस्स्व-वयस्यायाः मुखात् श्रीकृष्ण-चन्द्रस्य रक्षानिमित्तेन भागुरिमुनिप्रातिनिध्ये गोविन्दकुण्डनाम्नि स्थले यज्ञानु-ष्ठानं भवतीति श्रुत्वा-स्वयमुत्सुका भूत्वा स्नानादिकम् आवश्यककृत्यं च विधाय सखीगणैः सह सूर्यदेवं प्रपूज्य श्रीकृष्णचन्द्रं स्वहृदयाकाशे उत्कटाकांक्षया स्मरन्ती सुवर्णकलसे सुगन्धिहैयङ्गवीनं धृत्वा प्रेम्णा शिरसि संस्थाप्य स्वकुण्डाद् विविध-वस्त्र-भूषणालङ्कृता च भूत्वा तादृशीभिरेव सखीभिः सह चलिताभूदिति शेषः ।

समासादिः—मधुकराणां रुतानि स्यन्दन्ते तच्छीलानि = मधुकररुत-स्यन्दीनि च तानि पुष्पाणि तैः अभिरम्याः, तैः (नानावृक्षैरित्यस्य विशेषणम्) । सौरभ्येण आढयानि तैः, शीधुना फुल्लैः इति सहार्थतृतीयया तत्पुरुषसमासः । 'शीध्वस्त्री मधुमद्ययोः' इत्यमरः । कुमुदानि कमलानि चेति (रात्रिविकासशीलानि कुमुदानि, दिन-विकासवन्ति कमलानीत्युभयोर्भेदः) तैः इति विराजत्पानीयतटाकविशेषणं ज्ञेयम् । सूक्ष्मा धीर्यस्याः सा शारिकाविशेषणमिदम् । सूक्ष्मधीः चासौ शारिका

सूक्ष्मधीशारिका तन्नामा सखी तस्या आस्यात् । आस्यं तु मुखमित्याहुः(इति कोशः)। प्रियाश्च ता आल्यः, तासां गणाः, तैस्सहिता । बद्धा आकांक्षा यस्मिन् स इति कृष्णचन्द्रविशेषणमपि सम्भवति । बद्धा आकांक्षा यस्मिन् कर्मणि तद् यथा तथेति क्रियाविशेषणमपि स्यात् । गोष्ठचन्द्रोऽत्र कृष्णचन्द्रः, हृदयस्य गगनत्वे हेतुरिति परम्परितरूपकालङ्कारः । विकसद् गन्धो यस्मिन् तत् । विकसद् गन्धं च तद् हैयङ्गवीनं विकसद्-गन्ध-हैयङ्गवीनम्, निहितं विकसद्-गन्ध-हैयङ्गवीनं यस्मिन् स तम्, कुम्भमित्यस्य विशेषणम् । परिकररूपकादयोऽलङ्काराः । तद्यथा--

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ॥ ५७ ॥
रूपकं रूपितारोपाद् विषये निरपह्नवे ।
तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥ २८ ॥

भूषिताङ्गेति 'अङ्गगात्रकण्ठेभ्य इति वाच्यम्, ४।१।५४' इति वार्तिकबलाद् ङीषो वैकल्पिकत्वाट्टाप् । विशेषकलक्षणं यथा–

द्वाभ्यां युग्ममिति प्राप्तं त्रिभिः पद्यैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥
(इति काव्यादर्शः) ॥ ८–१० ॥

राधाया मार्गकृत्यमाख्याति कविः–

स्मित्वा स्मित्वा पथि पथि मिथः कुर्वती कृष्ण-वार्ता-
मार्ता तस्यानवकलनतः स्निग्धता-शालभञ्जी ।
प्रेमस्तोमोल्ललित-ललितां नर्म-फुल्लद्विशाखां
दृष्ट्वा दृष्ट्वा सुदति मुमुदे नर्म-भङ्ग्या निकामम् ॥११॥

अन्वयः– स्निग्धता-शालभञ्जी (स्नेह-क्रीडा-मञ्जूषा) सुदती राधा तस्य (कृष्णस्य) अनवकलनतः (अप्राप्तितः) आर्ता (अन्तस्तप्ता) नर्म-फुल्लद्विशाखां (हास्य-दीप्तां विशाखां सखीम्) प्रेमस्तोमोल्ललित-ललितां (प्रेम-भरनिर्भरां ललितां सखीं) दृष्ट्वा दृष्ट्वा मिथः (परस्परम्) पथि पथि (प्रतिमार्गम्) कृष्ण-वार्तां कुर्वती नर्म-भङ्ग्या निकामं मुमुदे (मोदं प्राप्तेत्यर्थः) ।

भावार्थः—मार्गे गच्छन्ती स्नेह-पुत्तलिका सुन्दर-दन्त-शालिनी राधाकृष्ण-सङ्गमाप्राप्तिप्रभावाद् अन्तःसन्तप्ताऽपि हास्यरसाप्लुतां विशाखां प्रेम-रसविह्वलां ललितां च सखीं वीक्ष्य वीक्ष्य प्रतिमार्गं श्रीकृष्ण-वार्तां कुर्वती पुनः पुनः स्मयमाना परिहास-भङ्ग्या मुमुदे, भृशं मुदिता बभूवेत्यर्थः ।

समासादिः—स्निग्धतायाः शालभञ्जी पुत्तलिका, मातापित्रोः स्नेहातिरेकशालिनीत्यर्थः । सुष्ठु शोभना दन्ता यस्याः सा सुदतीति बहुव्रीहौ 'स्त्रियां संज्ञायाम्–

५।४।१४३' इति दन्तस्य दत्रादेशे 'उगितश्च—४।१।६' इति ङीप्। ह्रस्वत्वं तु 'अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्' इति च्छन्दःशास्त्रानुरोधाज्ज्ञेयम्। प्रेम्णां स्तोमः, तेन उल्ललिता चासौ ललितेति समासप्रकारः। नर्मणा परिहासेन फुल्लन्ती चासौ विशाखेति पूर्ववत् समासः। दृशः कृपया कर्मत्वम्। 'द्रवकेलिपरिहासाः क्रीडा लीला च नर्म च' इत्यमरः। शब्दानुप्रासोऽद्भुतः। परिकरश्चार्थः। लक्षणं तूक्तमनुपदम् ॥ ११ ॥

सम्प्रति युग्मेन शैलेन्द्र-वर्णनम्—

गन्धैर्भ्राजत्कुसुम-पटलीमृष्ट-माध्वीक-माद्यद्-
भ्राम्यद्-भृङ्गप्रकर-विचरच्छाख-शाखि-प्रपञ्चाः ।
शस्यैः सान्द्रैः शबलित-भुवः स्वादु-सत्कन्दमूलाः
न्यञ्चद्-वान-द्विज-मृग-गणाश्चारु-नाना-फलानि ॥ १२ ॥

स्थाने स्थाने विविध-विटपि-क्रोड-रत्नोरु-वेद्यः
स्थाने स्थाने परिमल-बलद्रत्नसिंहासनौघाः ।
स्थाने स्थाने वर-गिरि-दरी-सानवो भान्ति यस्मिन्
शैलेन्द्रं सा गिरिधर-कर-प्राप्तमानं ददर्श ॥ १३ ॥

अन्वयः—सा राधा गिरि-धर-कर-प्राप्तमानं तं शैलेन्द्रं गोवर्द्धनं ददर्श (दृष्टवती), यस्मिन् (शैलेन्द्रे) गन्धैः भ्राजत्कुसुम-पटली भाति। मृष्ट-माध्वीक-माद्यद्-भ्राम्यद्-भृङ्ग-प्रकर-विचरच्छाख-शाखि-प्रपञ्चाः भान्ति। सान्द्रैः शस्यैः शबलित-भुवः स्वादु-सत्कन्दमूलाः भान्ति। न्यञ्चद्-वान-द्विज-मृगगणाः भान्ति। चारु-नाना-फलानि भान्ति। स्थाने स्थाने विविध-विटपि-क्रोड-रत्नोरु-वेद्यः भान्ति। स्थाने स्थाने वर-गिरि-दरी-सानवः भान्ति।

भावार्थः—राधिका तं गोवर्द्धनं गिरिं ददर्श यं भगवान् कृष्णः कराग्रेण धृत्वा इन्द्र-दमनं कुर्वन् व्रजं ररक्षेति सन्मानशालिनं चकार। यत्र सुगन्धिपुष्पराजी राजते। यत्र शुद्ध-माध्वीकपुष्प-माद्यद्-भ्राम्यद्-भ्रमर-समूह-प्रचरच्छाख-शाखिनां समूहा भान्ति। यत्र शस्य-श्यामला भुवः स्वादु-सत्कन्दमूला भान्ति। यत्र कानन-खग-मृग-गणा विचरन्ति। मिष्टसुन्दरफलानि भान्ति। यत्र प्रति-स्थानं विविध-वृक्षक्रोडेषु बहुमूल्यरत्नखचिता वेद्यो भान्ति। यत्र च स्थाने स्थाने (राज्ञामुपवेशनाय) शोणित-तया स्फुरद्रत्नखचितबृहत्स्वर्णसिंहासन-सङ्घा भान्ति। यत्र श्रेष्ठा गिरि-गुहाः सानवः शिखरसमूहा राजन्ते।

समासादिः—गिरिधरस्य करस्तेन प्राप्तो मानो येन स तम् इति त्रिपदो बहुव्रीहिः। भ्राजन्ति च तानि कुसुमानि पुष्पाणि तेषां पटली। मृष्टानि शुद्धानि च

तानि माध्वीकानि माध्वीकपुष्पाणि तैर्माद्यन्तः, अत एव भ्राम्यन्तश्च ते भृङ्गाः, तेषां प्रकरेण समूहेन विचरन्त्यः रलयोरभेदाद् विचलन्त्यो वा गतिशीला इति यावत्, शाखा येषां ते मृष्ट माध्वीक-माद्यद्-भ्राम्यद्-भृङ्गप्रकर-विचरच्छाखाः, ते च ते शाखिनस्तेषां प्रपञ्चाः। वने भवाः वानाः, ततो द्विज-मृग-शब्दयोर्द्वन्द्वं विधाय वानाश्च ते द्विजमृगा वानद्विजमृगाः, न्यञ्चन्तश्च ते वानद्विज-मृगाः न्यञ्चद्वान-द्विज-मृगाः तेषां गणाः। चारूणि च तानि नानाफलानि इति कर्मधारयसमासः। अत्रोदात्तोऽर्थालङ्कारः, शाब्दस्तु स एवानुप्रासः। लक्षणमार्थस्य —

लोकातिशय सम्पत्तिर्वर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्॥ १२-१३॥ (सा० १०।९४)

सम्प्रति गोवर्द्धनगिरौ प्रस्तुतयज्ञाहुतिगन्धमाघ्राय द्रुतमुपस्थातुकामा राधा स्वमन्थरगतिं विनिन्दति—

लब्ध्वा गोवर्द्धन-गिरिमथ प्राप्य सौरभ्यसारं
शश्वत्प्रीत्या मुनिवर-गणैर्दत्तगव्याहुतीनाम्।
आकृष्टोद्यत्-सुख-भर-रसेनाशु गन्तुं समुत्का
स्थूल-श्रोणी-कुच-युग-भरा मन्थरा तन्निनिन्द॥१४॥

अन्वयः—अथ गोवर्द्धन-गिरिं लब्ध्वा मुनिवरगणैः दत्त-गव्याहुतीनां सौरभ्य-सारं प्राप्य शश्वत्-प्रीत्या उद्यत्सुख-रस-भरेण आकृष्टा राधा आशु गन्तुं समुत्का स्थूल-श्रोणी-कुचयुगभरा (अत एव) मन्थरा तत् (गतेर्मन्थरत्वम्) निनिन्द जगर्हे।

भावार्थः—यज्ञे गव्यं सुरभिघृतं दातुं यान्ती राधा तत्र यज्ञे मुनिवरगणैः दत्त-गव्याहुतीनां सौरभ्यसारमाघ्राय गृहे प्रतिदिनं हूयमान-घृतगन्ध-घ्राण-प्रीत्या अत्रत्ययज्ञाहुतिघृतगन्धमाघ्रातुमाकृष्टा द्रुतं गन्तुकामापि पृथुश्रोणी-स्तनद्वय-भार-वशात् शीघ्रं गन्तुमसमर्था सती तां गतिमेव निन्दति स्मेति भावः।

समासादिः—दत्ताश्च ताः गव्याहुतयस्तासाम्। उद्यत् चासौ सुख-रस-भरः, तेन। श्रोणी च कुचयुगं च ते श्रोणी-कुचयुगे। इति द्वन्द्वानन्तरं स्थूले च ते श्रोणी-कुचयुगे इति कर्मधारयं कृत्वा तयोः भरो यस्याः सा स्थूल-श्रोणी-कुच-युग-भरेति व्यधिकरणबहुव्रीहिः। (इह भारते प्रतिदिनं प्रतिगृहं प्रातः गव्यघृताहुतिर्भवति स्मेति पद्यादस्मात्प्रतीयते। हा! अद्यत्वे डालडाप्रभावाद् घृतस्येह अत्यन्ताभावो जात इति नरकवासोऽधुना भारते।) पूर्वार्द्धे काव्यलिङ्गम्, त्वरागत्यभावस्य हेतूक्त्या उत्तरार्द्धे व्याजोक्तिरलङ्कारः। 'हेतोर्वाक्य-पदार्थत्वे काव्यलिङ्गं निगद्यते'। 'व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः'। यथा गोपने तथा प्रकाशनेऽपि सति निन्दयैव स्थूलता व्यज्यते॥१४॥

इदानीं यज्ञे राधोपस्थित्या श्रीकृष्ण-क्रियमाणं कृत्यमाख्याति कविः युग्मेन—

ज्ञात्वा तासां गमनमचिरं कीरवर्यस्य वक्त्रात्
स्मित्वा नर्म-प्रिय-सखगणैरावृतः सावधानः ।
शैलेन्द्रस्योपरि परिलसन्नुद्भट-श्याम-वेद्यां
घट्टीपट्टं विदधदतुलं वल्लवाधीशसूनुः ।।१५।।

स्मेरां सुरक्त-पट-भूषण-भूषिताङ्गीं
मूर्ध्नि स्फुरत्सघृत-हेम-घटीं वहन्तीम् ।
सार्धं तथाविध-सखी-निवहेन राधां
यान्तीं मराल-गति-चारु-कलामपश्यत् ।।१६।।

अन्वयः—वल्लवाधीशसूनुः (श्रीकृष्णः) कीरवर्यस्य (तन्नाम्नः सख्युः) वक्त्रात् तासां गमनं ज्ञात्वा स्मित्वा (ईषद्विहस्य) अचिरं (द्रुतमेव) प्रिय-सख-गणैः आवृतः सावधानः शैलेन्द्रस्य (गोवर्द्धनस्य) उपरि (भागे) उद्भट-श्याम-वेद्यां परिलसन् अतुलं (अनुपमम्) घट्टीपट्टं विदधत् ।

स्मेरां (स्मितमुखीम्) सुरक्त-पट-भूषण-भूषिताङ्गीं स्फुरत्-सघृत-हेमघटीं मूर्ध्नि वहन्तीं तथाविध-सखी-निवहेन सार्धं यान्तीं मराल-गति-चारु-कलां राधाम् अपश्यत्, दृष्टवानित्यन्वयः ।

भावार्थः– उभयोः पद्ययोः एकयैव क्रियया अन्वय इति युग्मं काव्यमिदम् । तथा हि वल्लवाधीशसूनुः श्रीकृष्णः कीरनाम्नः प्रियवयस्य मुखात् सखीभिः सह यज्ञमण्डपे यान्तीं राधां ज्ञात्वा स्मित्वा सावधानो गोवर्द्धन-पर्वतस्य उपरिभागे श्यामवेदीनाम-स्थाने तिष्ठन् शीघ्रं विशालं घट्टीपट्टं (शुल्क-स्थान-सूचनापत्रं शाइनबोर्ड'मिति यावत्) नियोज्य (तत्रोपविश्य च) स्मितमुखीं रक्त-वस्त्र-भूषण-भूषितां सुगन्धि-घृत-भृत-स्वर्णघटीं शिरसि बिभ्रतीं तादृशीभिरेव सखीभिः सह यान्तीं हंसगतिं राधाम् अपश्यदिति ।

समासादिः—सुरक्तश्चासौ पटः, स च भूषणानि च तैर्भूषितानि अङ्गानि यस्या इत्यनेकपदो बहुव्रीहिः, ताम् । अत्र—'अङ्ग-गात्र-कण्ठेभ्य इति वाच्यम्–४।१।५४' इति वार्तिकबलात् ङीप् । प्रियाश्च ते सखायः प्रियसखाः । 'राजाहः सखिभ्यष्टच्-५।४।९१' इति टचि टिलोपः। तेषां गणाः, तैः । स्फुरन्ती चासौ सघृत-हेम-घटी ताम् । घृतेन सहिता=सघृता, सा चासौ घटी चेति सघृत-हेम-घटी इत्यवान्तर-समासः । तथाविधाश्च ताः सख्यः, तासां निवहस्तेन । मरालस्य गतिः सेव चार्वी कला यस्याः सा ताम् । इति बहुव्रीहिः । सहोक्तिरुपमेति द्वयोः संसृष्टिः ।। १५-१६ ।।

सम्प्रति श्रीकृष्णो राधासर्वाङ्गं विवृणोति शार्दूलविक्रीडितेन—

अग्रे पूर्ण-विधुं तदन्तर-लसद्बन्धूक-पुष्प-द्वयं
निस्तुल-दाडिमी-फल-युगं भङ्ग्या प्रकाश्य क्षणम् ।
मन्नेत्रस्य चकोर-भृङ्ग-शुकतामासादयन्त्यद्भुता
केयं मामपि पद्मिनी कृतवती रक्तं मरालं द्रुतम् ॥ १७ ॥

अन्वयः—अत्र काव्ये कविरतिशयोक्तिनामालङ्कारेण उपमेयं निगीर्य केवलमुपमानमेव निर्दिशति। तथा हि (मुखकृते) अग्रे पूर्णविधुम। (नेत्र-द्वय-स्थाने) तदन्तर-लसद्-बन्धूक-पुष्पद्वयम्। (कुचकृते) मध्ये निस्तुल दाडिमी फल-युगं प्रकाश्य क्षणम् (यथा स्यात्तथेति क्रियाविशेषणम्) मन्नेत्रस्य चकोर-भृङ्ग-शुक-ताम् आसादयन्ती कुर्वती माम् अपि द्रुतं रक्तम्=अनुरक्तम् रक्तवर्णं वा मरालं हंसं कृतवती का इयम् अद्भुता विचित्रा पद्मिनी (कमलिनी अस्तीति शेषः)

भावार्थः—अस्मिन् पद्ये श्रीकृष्णः अतिशयोक्तिनामालङ्कारेण स्फुटमेव राधाया मुखादारभ्य पादान्तं सर्वाङ्ग-वर्णनं करोति। तथा हि स कथयति मन्नेत्रं राधिकाया मुखचन्द्रदर्शने चकोरायते। तस्या नेत्रद्वय-बन्धूक-पुष्प-द्वय-दर्शने भृङ्गायते। कुचयुग-दाडिमी-फलद्वय-दर्शने शुकायते। स्वयम् अहं तां पद्मिनी वीक्ष्य अनुरक्तो मरालो हंसः, रक्तवर्णो हंसो वा भवामि। इति अद्भुता विचित्रा इयं पद्मिनी नायिका पद्मिनी कमलिनी इव भाति। इत्थमत्र अतिशयोक्तिरलङ्कारः स्फुटं प्रतीयते। रक्त-शब्दे श्लेष पद्मिनी नायिका पद्मिनी कामिनी इवेति स्वस्मिन् हंसत्वमारोप्य परम्परितरूपकगर्भिणी उपमेति अलङ्कारसंसृष्टिरपि स्फुटमेवास्ति। पद्मिनीशब्देऽपि श्लेषः। राधामुखादि उपमेयं तु निगीर्णमेवास्ति। केवलं चन्द्रिकादि उपमानं दृश्यते। कृष्ण-नेत्रे चकोरतादिरूपणात् परम्परितरूपकमपि स्फुटमेति सर्वं सूक्ष्मदृशोन्नेयम्।

समासादिः—बन्धूकपुष्पयोर्द्वयमिति पूर्वम्, ततः लसच्च तद् बन्धूक-पुष्प द्वयमिति कर्मधारयः, ततस्तदन्तरशब्दे तस्य अन्तरमिति तत्पुरुषं विधाय तदन्तरे (तन्मध्ये) लसद्बन्धूकपुष्पद्वयमिति सप्तमीतत्पुरुषो ज्ञेयः। दाडिम्याः फलयुगमिति तत्पुरुषं विधाय नास्ति तुला यस्येति बहुव्रीहिं कृत्वा निस्तुलं च तद् दाडिमी-फल-युगम् इति कर्मधारयः। चकोरादीनां द्वन्द्वात् परम् 'तस्य भावस्त्वतलौ—५।१।११९' इति तलि स्त्रीत्वाट्टाप्। श्लेषादीनां लक्षणमुक्तमन्यत्र।

यद्येत एवालङ्कारः परस्पर-निमित्ताः।
तदा पृथगलङ्कारौ संसृष्टिः संकरस्तथा ॥ ९७ ॥
मिथोऽनपेक्षमेतेषां स्थितिः संसृष्टिरुच्यते ॥ १७ ॥

राधाया अद्भुतसौन्दर्यं निरीक्ष्य असन्तुष्टः कृष्णः पुनस्तां वर्णयति—इत्याख्याति कविरनुष्टुभा--

ततो निरीक्ष्य सम्यक् तां प्रेम-विह्वल-मानसः।
साशङ्कं पङ्कजाक्षोऽयं सोत्कण्ठोऽवर्णयत् पुनः॥ १८॥

अन्वयः— ततः पूर्व-वर्णनानन्तरं तां राधां सम्यक् निरीक्ष्य प्रेम-विह्वल-मानसः पङ्कजाक्षोऽयं श्रीकृष्णः सोत्कण्ठः सन् पुनः साशङ्कं (यथा स्यात्तथेति क्रियाविशेषणम्) तां राधाम् अवर्णयत्। इति कविः पुनः कृष्णमुखेन राधिकामग्रे वर्णयिष्यतीति नास्ति कोऽपि विशिष्टो भावार्थं इति समासादिरेव विव्रियते।

समासादिः—प्रेम्णा विह्वलं मानसं यस्य सः। पङ्कजे इव अक्षिणी यस्येति बहुव्रीहौ 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्---५।४।११३' इति षचि टिलोपे पङ्कजाक्षः। उत्कण्ठया सहितः सोत्कण्ठ इत्यत्र 'तेन सहेति तुल्ययोगे-२।२।२८' इति समासे 'वोपसर्जनस्य—६।३।८२' इति सहस्य सादेशे सोत्कण्ठः। 'गोस्त्रियोरुपसर्जनस्य—१।२।४८' इति ह्रस्वो ज्ञेयः। एवं साशङ्कशब्दोऽपि तद्वत्। क्रियाविशेषणत्वात् क्लीबम्॥ १८॥

अधुना निश्चयान्तसन्देहालङ्कारेण पुना राधां शार्दूलविक्रीडितेन वर्णयति—

फुल्लच्चम्पक-वल्लकावलिरियं किं नो न सा जङ्गमा
किं विद्युल्लतिकाततिर्नहि घने सा खे क्षण-द्योतिनी।
किं ज्योतिर्लहरीसृतिर्नहि न सा मूर्तिं वहेत्तद् ध्रुवं
ज्ञातं ज्ञातमसौ सखी-कुल-वृता राधा स्फुटं प्रोञ्चति॥१९॥

अन्वयः--श्रीकृष्णो वितर्कयति—इयं सखी-मध्ये अग्रे गा यान्ती नायिका फुल्लच्चम्पक-वल्लकावलिः (पुष्पिता चम्पक-पुष्पलताततिः) किम् (इति सन्देहः) नो नहि नहि असौ जङ्गमा न भवति। इयं तु जङ्गमास्तीति नैव सेति निश्चयः। तर्हि इयं विद्युल्लतिका ततिः किम् (इति सन्देहः) नहि नहि सा तु घने (मेघे) खे (आकाशे)क्षणं द्योतिनी प्रकाशमाना भवतीति नैव सेति निश्चयः। तर्हि इयं ज्योतिर्लहरीसृतिः (ज्योतिस्तरङ्गराजिः) किम् (इति सन्देहः) नहि नहि सा मूर्तिं न वहेत्। इयं तु मूर्त्तिमती देहधारिणी अस्ति। अतो नैव सेति निश्चयः। (अतः) तत् तस्मात् कारणाद् ध्रुवं ज्ञातं ज्ञातं मया (द्विरुक्तिः निश्चयं द्योतयति) निश्चयेनैव इयं सखी-कुल-वृता (आलीसमुदायान्विता) राधैव स्फुटं प्रत्यक्षतः प्राञ्चति (प्रकृष्टगत्या शनैः शनैर्गच्छतीत्यर्थः)।

भावार्थः—कवेर्वैशिष्टयमिदं यत् कृष्णमुखाद् राधागमनं बहुधा संशय्यान्ते निश्चयान्तसन्देहालङ्कारेण तामेव निश्चिनोति। प्रथमं चम्पकलतया ततो विद्युल्ल-

तया ततोऽप्यग्रे सुज्योतिस्तत्या सन्दिहानोऽवसाने पुना राधामेव विशिष्टगतिशालिनीं विवृण्वन् सन्देहालङ्कारं स्फुटं निश्चयान्तमेव निबध्नातीत्यहो वाङ्माहात्म्यम् ।

समासादिः—चम्पकस्य वल्लकावलिः, स्फुरन्ती चासौ वल्लकावलिः, इति समासः । 'वल्ली तु व्रततिर्लता' इति वल्ली-शब्दस्थाने कविः स्वातन्त्र्याद् वल्लकावलिशब्दं प्रयुङ्क्ते । विद्युतश्च ताः लतिकाः, तासां ततिः । ज्योतिषां लहरी तस्याः सृतिः । सखीनां कुलम्, तेन वृतेति समासः । अलङ्कारलक्षणं यथा—

सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः ।
शुद्धो निश्चय-गर्भोऽसौ निश्चयान्त इति त्रिधा ।। (१०।३५) ।।१९ ।।

मालिन्या इदानीं पुना राधामेव श्रृङ्गारलक्ष्मीत्वेनाध्यवस्यति––

इयमिह नहि राधा सा सखीभिः परीता
विदितमिदमिदानीं वस्तुतत्त्वं विचार्य ।
मम सविधमुपैति स्फारश्रृङ्गारलक्ष्मीः
सह कलित-सुवर्ष्मालिङ्गनादि-क्रियाभिः ।। २० ।।

अन्वयः––इदानीं वस्तु-तत्त्वं विचार्य (मया) इदं विदितम् । (यद्) इह सखीभिः परीता (युक्ता यान्ती नायिका) इयं सा (प्रसिद्धा) राधा नहि (नैवास्ति, किन्तु) आलिङ्गनादि-क्रियाभिः सह कलित-सुवर्ष्मा स्फार-श्रृङ्गारलक्ष्मीः मम (श्रीकृष्णस्य) सविधम् उपैति (अभिसरति) ।

भावार्थः––सम्प्रति ज्ञात-सारोऽपि श्रीकृष्णः भङ्ग्यन्तरेण निश्चयान्त-सन्देहेन सहेतुकाव्यलिङ्गेन अभेदे भेदात्मनाऽतिशयोक्त्या चेति संसृष्टचलङ्कारेण राधामेव अभिसरन्तीं श्रृङ्गारलक्ष्मीम् अध्यवस्यति । तथा हि-–मया वस्तु-तत्त्व-निर्णयेनेदम् अवधारितं यद् इयं सखीभिः सह यान्ती नायिका नैव सा प्रसिद्धा राधा; अपि तु धृत-सुन्दरदेहा श्रृङ्गारलक्ष्मी आलिङ्गनादिक्रियाभिर्युक्ता माम् अभिसरतीति भावः ।

समासादिः––स्फारा चासौ श्रृङ्गारलक्ष्मीः । कलितं सुवर्ष्म यया सेति बहुव्रीहिः । यद्यपि वर्षति लालादिकम् इति जीर्णशरीरं वर्ष्मशब्दार्थो व्युत्पत्त्या सिध्यति, तथापि––'वर्ष्म-देह-प्रमाणातिसुन्दराकृतिषु स्मृतम्' इति मेदिनीकोश-प्रामाण्यात् सुन्दरदेहवाचकोऽयं शब्दः । शब्दप्रयोगे लोक एव प्रमाणत्वमृच्छति, न तु व्याकरणम् । तथा हि श्रीहर्षः—

'भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः ।
शशो यदस्यास्ति शशी ततोऽयं मृगो यदस्यास्ति मृगीति नोक्तः ।।
(नै० २२।८)

सन्देहलक्षणमनुपदमेव गतं संसृष्टिलक्षणमपि। अतिशयोक्तिमाह—

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ।
भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ।
पौर्वापर्यात्मिकः कार्य-हेत्वोः सा पञ्चधा ततः ॥ (४६)

पुनरपि राधां वैविध्येन तर्कयति शार्दूलविक्रीडितेन—

गौरी श्रीवृषभानु-वंश-विलसत्-कीर्ति-ध्वजा कीर्तिदा
गर्भान्तः खनिरत्न-कान्ति-लहरीश्रीदाम-पुण्यानुजा
प्राण-प्रेष्ठ-सखी-निकाय कुमुदोल्लासोल्लसच्चन्द्रिका
मत्प्राणोरुशिखण्डि-वासवडभी सेयं स्वयं राधिका ॥ २१ ॥

अन्वयः—गौरी (गौरवर्णा) सेयं श्रीदाम-पुण्यानुजा राधिका श्रीवृषभानु-वंश-विलसत्-कीर्ति-ध्वजा स्वयं कीर्तिदा (अस्ति) (पुनः) गर्भान्तः खनि-रत्न-कान्ति-लहरी (अस्ति) प्राण-प्रेष्ठ-सखी-निकाय-कुमुदोल्लासोल्लसच्चन्द्रिका (अस्ति) (किं बहुना) मत्प्राणोरुशिखण्डि-वास-वडभी विद्यते।

भावार्थः-श्रीकृष्णो राधां विविध-भावतया तर्कयति—**प्रथमं** तां वृष-भानु-वंशस्य कीर्तिध्वजां कीर्तिदां मनुते। ततः पृथ्वीगर्भस्थ-रत्न-कान्ति-लहरीं मनुते। पुनः प्राण-प्रियतम-सखी-समुदाय-रूप-कुमुद-विकासकृच्चन्द्रिकां मनुते। किं बहुना, मत्प्राणरूप-विशाल-मयूर-निवासार्थं भवन-वलभी इयं राधिकेति मन्यते।

इत्येवं श्रीदाम्नः स्वसारम् एकामेव राधां विविध-रूपतया तर्कयति। अत्र-

र-लयोर्ड-लयोश्चैव श-सयोर्ब-वयोस्तथा।
अनुप्रासत्वमाम्नातं काव्यमर्मज्ञसूरिभिः॥

समासादिः—वृषभानोः वंशस्तस्य स्फुरत्कीर्तिः तस्याः ध्वजा। स्फुरन्ती चासौ कीर्तिः स्फुरत्कीर्तिरिति समासः। गर्भान्तः खनिस्तस्याः रत्नानि तेषां कान्तिः, तस्याः लहरी "खनिः स्त्रियामाकरः स्यात्" इत्यमरः। प्राणेभ्यः श्रेष्ठाः ताश्च ताः सख्यः, तासां निकायः, स एव कुमुदानि, तेषाम् उल्लासः। स्फुरन्ती चासौ चन्द्रिका=स्फुरच्चन्द्रिका। उल्लासाय-स्फुरच्चन्द्रिका ताम्। उरवश्च ते शिखण्डिनः= उरुशिखण्डिनः। मम प्राणाः=मत्प्राणाः, त एव उरुशिखण्डिनः, तेषां वासः। तस्मै वडभी वलभी वा, ताम्। इति समासप्रकारः। रूपकालङ्कारः, लक्षणमुक्तं दशमे (१०) पद्ये ॥ २१ ॥

सम्प्रति राधापक्षतः तुङ्ग-भद्रा नामा सखी केलिं प्रारभते—

ततो गोविन्दमालोक्य गोवर्द्धनशिरोमणिम्।
स्मित्वा चारु-चलापाङ्गी तुङ्गविद्येदमब्रवीत् ॥ २२ ॥

अन्वयः—ततः कृष्णकर्तृकराधावर्णनानन्तरं चारु-चलापाङ्गी तुङ्गविद्या-नामा सखी स्मित्वा (ईषद्धास्यं कृत्वा) गोवर्द्धनशिरोमणिं गोविन्दम् आलोक्य इदं वक्ष्यमाणं वाक्यमब्रवीत् (अवोचदित्यर्थः)।

भावार्थः—यथार्थ-नामा तुङ्गविद्या (उत्कट-विद्यावती) सखी अति-चतुरा नर्म-रङ्गं प्रारब्धुकामा श्रीकृष्ण-कृतं राधावर्णनं निशम्य स्मितं कृत्वा तं विलोक्य (स्वकीयां चातुरीमेव श्रावयितुं यदवोचत्, तदर्थमुपक्रमते कविः) इदम् अब्रवीदिति भावार्थः।

समासादिः-गोवर्द्धनस्य शिरोमणिस्तम्। चारुणी चले अपाङ्गे यस्याः सा। अत्रानुप्रास एव शब्दालङ्कारो गकारचकाराङ्गकारणम्। छेकाह्वः ॥ २२ ॥

वसन्ततिलकया तुङ्गविद्या राधासम्बोधनेन श्रीकृष्णमुपहसति--

यः कल्लि मे दधि-घटं प्रकटं प्रलुण्ठ्य
नीत्वा प्रगाढ-तमसा मिलितोरुकृष्णः।
सोऽयं गिरीन्द्र-शिखरं स्फुटमारुरोह
राधे ! तव प्रिय-सखो महिलैक-चौरः ॥ २३ ॥

अन्वयः-- हे राधे ! महिलैकचौरः यः तव प्रिय-सखः कल्लि-(ह्यः) प्रकटं (प्रत्यक्षम्) मे दधि-घटं प्रलुण्ठ्य नीत्वा प्रगाढतमसा मिलितोरु-कृष्णो जातः, सोऽयं स्फुटं (प्रकाशम् अद्य) गिरीन्द्र-शिखरं (गोवर्द्धनशिरसि) आरुरोह (आरूढोऽस्ति)।

भावार्थः-- हे राधे ! इति तुङ्गविद्या स्वसखीं राधां सम्बोधयति यद् महिलानां प्रधानचौरो यस्तव प्रियसुहृत् कृष्णः कथ्यते, सः कल्लि = गतदिने प्रकटं सर्व-समक्षमेव मम दधि-घटं प्रलुण्ठ्य अपहृत्य नीत्वा आनीय च प्रगाढ-तमसा घनान्धकारेण मिलितः सन् ऊरु-कृष्णः अधिक-कृष्णवर्णः समजनि। सोऽयमद्य स्फुटं सर्व-समक्षं पश्यामि, गिरीन्द्र-शिखरम् आरुह्य तिष्ठतीति पश्य पश्य-तोहरमिममिति भावः।

समासादिः-- प्रगाढं च तत् तमः, तेन। मिलित उरुः कृष्णो यस्येति बहु-व्रीहिः। 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरः। गिरीणाम् इन्द्रः, तस्य शिखरं शृङ्गम्। 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः। 'प्रियसख' शब्दो व्याख्यातः (१६) षोडश-पद्ये। महिलानाम् एकचौरः, एकश्चासौ चौर इति पूर्वं कर्मधारयं कृत्वा ततस्तत्पुरुषः कार्यः। 'एको मुख्यान्यकेवलाः' इत्यमरः। अत्र मुख्यार्थे एकशब्दः। मिलितोऽलङ्कारः—

'मिलितं वस्तुनो गुप्तिः केनचित्तुल्य लक्ष्मणा।' (१०।८९) ॥२३॥

सम्प्रति तुङ्गविद्यया सम्बोधिता राधा स्वयं श्रीकृष्णं विवर्णयिषुर्ब्रूते, इति

इति कविः शार्दूलविक्रीडितेन वक्ति--

मूर्ति निर्जितनूत्ननीरदबलद्गर्वोन्नतिं कैशवीं
स्फूर्जद्-गोपवधू-ध्वनद्-धृति-चमू-ध्वंसेस्मरोष्यद्गदाम् ।
विभ्राजदगिरिवर्य-सुन्दर-शिरःपट्टे स्फुरन्तीं मनाग्-
भङ्ग्यालिङ्ग्यदृशा प्रियालिबलिता राधाऽत्यधीराऽब्रवीत् ॥२४॥

अन्वयः—प्रियालि-बलिता राधा, निर्जित-नूत्न-नीरद-बलद्-गर्वोन्नतिं स्फूर्जद्-गोप-वधूध्वनद्-धृति-चमू-ध्वंसे स्मरोद्-गदाम्, विभ्राजद्-गिरिवर्य-सुन्दर-शिरःपट्टे स्फुरन्तीं कैशवीं मूर्तिं दृशा भङ्ग्या मनाक् आलिङ्ग्य अत्यधीरा सती अब्रवीत्, उवाचेत्यन्वयः।

भावार्थः—प्रियाल्या तुङ्गविद्यया बलिता उद्‌बोधिता राधा कैशवीं मूर्तिं दृशा चक्षुषा भङ्ग्या व्याजेन मनाक् ईषद् आलिङ्ग्य निरीक्ष्य अत्यधीरा चञ्चला सती अब्रवीत्, उक्तवती। तां कैशवीं मूर्तिं त्रिभिर्हि विशेषणैः विशिनष्टि। तथा हि-निर्जित-नूतननीरदा अत एव बलद्गर्वोन्नतिरस्ति। पुनः स्फुर्जद्-गोपवधूनां ध्वनद्-धृति-चमू-ध्वंसे स्मरस्य उद्यद्-गदैव अस्ति। स्वयं च विभ्राजद्-गोवर्द्धन-सुन्दर-शिखरपट्टे स्फुरन्ती चास्ति। ताम् आलिङ्ग्येति अधीरताया हेतुत्रयम्।

समासादिः— निर्जितः नूत्नः नीरदः यया सा अत एव बलन्ती गर्वोन्नतिर्यस्याः सा। ततो निर्जित-नूत्न-नीरदा चासौ बलद्-गर्वोन्नतिः। इति कर्मधारयः। स्फूर्जन्त्यश्च ताः गोपवध्वः स्फूर्जद्गोपवध्वः तासां धृतिरेव चमू तस्याः ध्वंसे स्मरस्य स्फुरन्ती चासौ गदैव सा ताम्। विभ्राजन् चासौ गिरिवर्यः सः। तस्य सुन्दरं च तत् शिरः, तदेव पट्टं तस्मिन्। शोभायमान-गोवर्द्धनशैलरम्य-शिखरपट्टे स्फुरन्तीमिति भावार्थः। उल्लेखालङ्कारः—

क्वचिद्भेदाद् ग्रहीतॄणां विषयाणां तथा क्वचित्।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥ (१०।३७)

अन्ये काव्यलिङ्गरूपकादयस्तदुत्थापका इति अङ्गाङ्गिसङ्करोऽप्यत्र। तल्लक्षणं तु यथा —

आङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रय-स्थितौ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥(१०।९८)॥२४॥

सम्प्रति सुमुखी राधा निश्चयान्त-सन्दोहालङ्कारेण श्रीकृष्णं श्यामं धरातल-चन्द्रं तर्कयति, शार्दूलविक्रीडितेन —

किं नव्याम्बुद एष भव्यवदनाः ! किं नील-रत्नाङ्कुरः
किं नीलोत्पल-पुञ्ज-मूर्तिरपि किं कस्तूरिकाविभ्रमः।
आस्तेष्वेष न कोऽपि हन्त यदयं नस्तापयेन्निर्भरं
तस्माद् गोकुलचन्द्र एष भविता श्यामोऽद्भुतः क्ष्मातले ॥२५॥

अन्वयः--अयि भव्य-वदनाः (सख्यः) एष (पुरो दृश्यमानः कृष्णवर्णः पुमान् पदार्थः) नव्याम्बुदो नूतनो मेघः किम् ?(इति सन्देहे) (पुनः) नीलरत्नाङ्कुरः किम्? इति (पुनरन्यथा शङ्कते) नीलोत्पलपुञ्ज-मूर्तिः किम् ?(पुनः) अपि (वितर्के) कस्तूरिकाविभ्रमः किम् ? (इति चतुर्धा सन्दिह्य निश्चिनोति) आः (इति स्फूर्तौ) तेषु (चतुर्षु) एष कोऽपि न (अस्ति) यत् (यतः) अयं नः (अस्मान्) निर्भरं तापयेत् । (सम्भावनायां लिङ्) तस्माद् एष श्यामः अद्भुतः क्ष्मातले धरातले वा (पर्वते) (क्ष्मा तले यस्येति विगृह्य बहुव्रीहौ पर्वतार्थोऽपि सम्भवत्येव) गोकुल-चन्द्रः (गोकुल-शशी) भविता (भवेत् वितर्के लुट् ज्ञेयः) ।

भावार्थः राधा सखीः सम्बोध्य श्रीकृष्णचन्द्रं नीलमेघादीन् सन्दिहाना अन्ते भूतले पर्वते वा श्यामं शशिनं सहेतुकं निश्चिनोति । तथा हि **पूर्वमेष** नीलो नीरदोऽस्ति किम् ? आहो नीलरत्नस्य अङ्कुरः कोमलः किम् ? अस्ति । उत नीलकमलसङ्घस्य मूर्तिः अस्ति किम् ? अपि वा कस्तूरिकायाः विलासः अस्ति किम् ? इति विविधं संशय्य अन्ते निश्चयं करोति । आः ज्ञातं मया । एषु चतुर्षु अपि सन्दिग्धेषु एषः कोऽपि नास्ति । यतोऽयम् अस्मान् तापयेत् । तप्ताः कुर्यात् । अतः क्ष्मातले गोकुलभुवि पर्वते वा श्यामवर्णो विचित्रो गोकुलशशी एव एष भविता इति निश्चयः ।

समासादिः—भव्यानि वदनानि यासां ताः । इति सम्बोधनम् । नव्यश्चासौ अम्बुदः । नीलं च तद् रत्नम्, तस्य अङ्कुरः । नीलानि च तानि उत्पलानि तेषां पुञ्जम्, तस्य मूर्तिः । क्ष्मायाः तलम् । भूतलं क्ष्मातले यस्य सः क्ष्मातलः पर्वतः, तस्मिन् । 'क्ष्माधर' इति पाठान्तरेऽपि पर्वत इत्यर्थः । क्ष्मायाा धर इति समासः सन्देहालङ्कारलक्षणमुक्तं प्राक् ऊनविंशे (१९) पद्ये ।।२५।।

सम्प्रति गोकुलचन्द्रे श्रीकृष्णचन्द्रेऽध्यारोपितं श्यामचन्द्रत्वं निषिध्य सहेतुकं स्मरनृपत्वमध्यवस्यति मालिन्या–

विजित-भगण-दृप्यत्पूर्णशुभ्रांशु-शोभः
सखिभिरधृतसुश्रीर्नापि कृष्णेन्दुरेषः ।
अयि पिकमधुभृङ्गस्मेरमान् कन्दयुक्तः ।
स्मर-नृपतिरुपेतस्तेन वः सन्धि-हेतोः ।। २६ ।।

अन्वयः—अयि सख्यः ! इति सम्बोध्य राधा पूर्वारोपितां श्यामचन्द्रतामपि निषिध्य स्मर-नृपतितामध्यवस्यति श्रीकृष्णे । तथा हि एष पुरोदृश्यमानः पुमान् श्रीकृष्णो विजित-भगणदृप्यत्-पूर्ण-शुभ्रांशु-शोभः अस्ति । पुनः सखिभिरधृत सुश्रीश्च-अस्ति । अतोऽयं कृष्णेन्दुः (श्याम-शशिः) अपि न (नैवास्ति) (किन्तु) वः (युष्माकम् तेन) (कृष्णचन्द्रेण) सन्धि-हेतोः पिक-मधु-भृङ्ग-स्मेर-मान कन्द-युक्तः स्मर-नृपतिः (काम-राजः) उपेतः (उपस्थितोऽस्ति) ।

भावार्थः—राधा पूर्वारोपितं श्रीकृष्णचन्द्रे श्यामाद्भुतशशित्वमपि निषिध्य सम्प्रति स्मर-नृपतित्वमारोपयति। तथा हि—

अयि सख्यः एष पर्वते दृश्यमानः श्रीकृष्णेन्द्रः कृष्णचन्द्रः अद्भुतः श्यामः इन्दुरपि न, यतो हि अनेन भगणे दृप्यतः पूर्णशुभ्रांशोः शोभा विजिताऽस्ति। पुनः एष कृष्णेन्दुः सखिभिः अधृत-सुश्रीः वयस्यैः अप्राप्त शोभोऽपि अस्ति। अतो हि कथमयं कृष्णवर्णकश्चन्द्रः स्यात्; किन्तु वः युष्माकं तेन चन्द्रेण सन्धि-हेतोः पिक--मधु—भृङ्गस्मेरमान् कन्दयुक्तः (कोकिलवसन्तर्तुभृङ्गादयः कामस्य हास्यमिति तद्वान् कन्दयुक्तश्च कमलिनीमूलमपि कामदेवास्ताम्। (इति तद्युक्तः) स्मर-नृपतिः कामदेवः राजा तेन चन्द्रमसा सह वः युष्माकं (सन्धि–हेतोः) सन्धि कारयितुम् आगतोऽस्ति। संक्षिप्तोऽयं भावः—यद् नायं श्यामेन्दुः; किन्तु पिक-वसन्तभृङ्गकन्दात्म-स्वास्त्रयुक्तः स्मर-नृपोऽयं चन्द्र-मसा वः युष्माकं सन्धि कारयितुं गोवर्द्धने तिष्ठति। अत्र श्रीकृष्णसखायः सर्वे पिकादिस्थाने। शंखः कन्दः स्वयं श्रीकृष्णः स्मरो राजेति भङ्‌ग्या व्यनक्ति प्रौढो महाकविरयं प्रज्ञाचक्षुरिति।

समासादिः—भगणेषु दीप्यन् चासौ पूर्णशुभ्रांशुः। इति कर्मधारयगर्भ-तत्पुरुषानन्तरं विजिता भगण-दीप्यत् पूर्णशुभ्रांशोः शोभा येन स इति बहुव्रीहिः। अधृता सुश्रीः यस्य सः (अगृहीतसुषमः)। कृष्णश्चासौ इन्दुरिति कर्मधारयः। पिकश्च मधुश्च भृङ्गश्चेति तेषां समाहारः पिकमधुभृङ्गम्, तदेव स्मेरम् 'तदस्यास्तीतिविग्रहे' मतुपप्रत्यये यवादित्वाद् मस्य न वत्वम्, अतः पिकमधुभृङ्गस्मेरमान् इति सिध्यति। कन्देन युक्तः। इति समासः। अत्र कृष्णस्य सखायः पिकाप्सो ज्ञेयः। कन्दः शंख नलिनीमूलम् कल्पनीयम्। न धृतम् अधृतम्। अत्र निश्चयान्त-सन्देह-काव्यलिङ्ग-रूपक-श्लेषादीनां संसृष्टिः। लक्षणं प्रागुक्तम्॥ २६॥

राधेदानीं श्रीकृष्णस्य वैविध्यम् उल्लेखालङ्कारेण शार्दूलविकीडितेनच्छन्दसा विवृणोति—

सोऽयं श्रेष्ठ-महेन्द्र-पट्ट-महिषी-वात्सल्यलीलाकृतिः
सोऽयं गोप-महेन्द्र-पुण्य-विटपि-प्रौढामृतोद्यत्-फलम्।
सोऽयं प्राण-वयस्य-जीवित-घटद्-रक्षैक-दक्षौषधं
सोऽयं धेनुक-मर्दि-जीवित-झष-स्फाराम्बुधिर्माधवः॥ २७॥

अन्वयः—राधिका माधवमुद्दिश्य तस्यानेकत्वमाख्याति-सोऽयं माधवः गोष्ठमहेन्द्र-पट्ट-महिषी वात्सल्य-लीलाकृतिः (अस्ति), सोऽयं माधवः गोप-महेन्द्र-पुण्य-पिटपि-प्रौढ़ामृतोद्यत्-फलम् (अस्ति), सोऽयं माधवः प्राण-वयस्य-जीवित-घटद्-रक्षैक-दक्षौषधम् (अस्ति), सोऽयं माधवः धेनुक-मर्दी (अस्ति). जीवित-झष स्फाराम्बुधिः (अस्ति)।

भावार्थः—राधा अनेकरूपेण माधवं वर्णयति—प्रथमं कथयति–सोऽयं-पूर्ववर्णितो माधवः गोष्ठ-महेन्द्रस्य नन्दस्य पट्ट-महिष्या यशोदाया वात्सल्य-लीलास्वरूपमेवास्ति। तथा सोऽयं माधवो गोप-महेन्द्रस्य नन्दस्य पुण्यविटपिनः (पुण्यवृक्षस्य) प्रौढम् अमृतम् उद्यत् फलम् (अस्ति), सोऽयं माधवः प्राणप्रिय-वयस्यानां जीवितस्य घटद्रक्षैकदक्षौषधम् (अस्ति), धेनुकासुरस्य मर्दी विनाशकः (अस्ति) सोऽयं माधवः (जीविताः प्राणिनः एव झषास्तेषां कृते स्फारो विशालोऽम्बुधिः समुद्रः (अस्ति), इत्येवं माधवे वैविध्यं समारोपयति।

समासादिः—गोष्ठस्य महेन्द्रः, तस्य पट्टमहिषी, तस्या, वात्सल्यम्। तस्य लीला, तस्या आकृतिः। गोपानां महेन्द्रः, तस्य पुण्यम्, तदेव विटपी तस्य प्रौढम् अमृतम्, उद्यच्च तत् फलम् इति सर्वत्र कर्मधारयः। प्राणप्रिया वयस्याः प्राणवयस्या इति शाकपार्थिवादित्वात्समासे मध्यपदलोपः। तेषां जीवितम्, तस्य घटद्रक्षा, तस्याः एकं प्रधानं दक्षं च तद् औषधम्। इति पूर्ववत् कर्मधारयः। प्राणिन एव झषाः स्फरश्चासौ अम्बुधिः इति पृथक् समासं कृत्वा प्राणिझषाणां स्फाराम्बुधिरिति धेनुकस्य मर्दीति तत्पुरुषानन्तरं धेनुकमर्दी चासौ जीवितझषस्फाराम्बुधिः। इति कर्मधारयः। अत्राप्युल्लेखालङ्कारः. लक्षणमुक्तं चतुर्विंशतितमे (२४) पद्ये ॥ २७॥

सम्प्रति राधाऽवस्थामाख्याति शिखरिण्या—

निरूप्यैवं शश्वद्-गिरिधरमुरु-प्रेम-निवहैः
सदा सास्त्रं स्वेद-स्नपित-शुभ-वर्ष्मा स्मरवशा।
मुहुः कम्पाघात-स्खलदचल-दीव्यद्-घृतघटीं
दधारार्त्याऽशक्त्या सखि-करसरोजेन सुदती॥ २८॥

अन्वयः सुदती राधा सदा उरु-प्रेमनिवहैः एवं गिरिधरं निरूप्य स्मरवशा शश्वत् सास्त्रं स्वेद-स्नपित-शुभ-वर्ष्मा (भवति स्म) (सम्प्रति) मुहुः कम्पाघात-स्खलदचल-दीव्यद्-घृतघटीम् आर्त्या अशक्त्या सखि-करसरोजेन दधार धृतवतीत्यन्वयः।

भावार्थः—प्रशस्त-दन्तशालिनी राधा सदा (विद्यमानैः) उरु-प्रेम-निवहैः पृथु-स्नेह-राशिभिः एवं गिरिधरं निरूप्य श्रीकृष्णम् समीक्ष्य शश्वद् युगे युगे सास्रम् आनन्दाश्रु यथा स्यात् तथा स्वेद-स्नपित-शुभवर्ष्मा=स्वेदाभिषिक्तसुन्दर-देहा-(भवति स्म). सम्प्रति स्मराभिनिवेशसमुपजात-कम्पेन शिरसि धृतां स्खलन्तीम् अचलां दीव्यद्-घृट-घटीम् अशक्त्या शक्त्यभावेन जायमानया आर्त्या मनोव्यथया सखि-करसरोजेन सखीकरकमलेन दधार धृतवती। सखि सखीति द्विधा स्त्रीलिङ्गः सखिशब्दः 'कृदिकारादक्तिनः—४।१।४५' इति वैकल्पिकवार्तिकात्।

समासादिः—उरवश्च ते प्रेमाणः, तेषां निवहाः, तैः। स्वेदेन स्नपितं शुभं वर्ष्म यस्याः सा। कम्पस्य आघातस्तेन स्खलन्ती अचला दीव्यन्ती चासौ घृत-घटी ताम्। सख्याः करः सरोजमिवेति 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे—२।१।५६"। अत्रानुप्रासः शब्दालङ्कारः। तल्लक्षणम्—

अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधां।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते॥ इति॥ २८॥

(तात्कालिकप्रथानुसारं शुल्क-शाला स्थाने स्त्रीभ्यः शुल्क-ग्रहणाय स्त्रिय एव भवन्ति स्म नियुक्ता इति तत्र नियुक्तया ललिताख्यया-सख्या सह स्थितं शुल्क ग्रहणार्थिनं श्रीकृष्णमवमत्यहेलया राधिकादयः सख्योऽग्रे चेलुरिति) इत एव दानकेलिः परिहासकथा प्रारब्धा भवति, मन्दाक्रान्ताछन्दसा—

नेपथ्यालीं ललित-ललितां दानिवर्योचितां तं
धृत्वा सन्तं ध्वनित-मुरली-पत्र-शृङ्गादिजुष्टम्।
घट्टीपालैः कलित-लकुटैर्वेष्टितं मित्र-वृन्दैः
पश्यन्त्यस्ताः स्मित-बलितया हेलया चारु चेलुः॥ २९॥

अन्वयः—दानवर्योचितां नेपथ्यालीं ललित-ललितां धृत्वा सन्तं ध्वनित-मुरली-पत्र-शृङ्गादि जुष्टम्, कलित-लकुटैः मित्र-वृन्दैः वेष्टितं तं (श्रीकृष्णम्) पश्यन्त्यस्ताः (राधिकादयः) सख्यः स्मितवलितया हेलया चारु (यथा स्यात्तथेति क्रियाविशेषणम्) चेलुः, ततः, स्थानाद् अग्रे चलितवत्यः।

भावार्थः—(शुल्कशाला-नियमानुसारं शुल्कशालाध्यक्षः यज्ञादिकृते दातव्य-द्रव्याणां शुल्कग्रहीता दानीवर्यशब्दवाच्यो भवति स्म, तत्र शुल्कमपि नाममात्रं गृहीतं भवति स्मेत्यादि व्यज्यते) तथा हि—दानिवर्याय उचितां योग्यां तस्य कार्यकर्त्रीं नेपथ्यालीं शुल्कशालारक्षिकां ललित-ललितां सुन्दरीं ललिताख्यां सखीं धृत्वा तत्र शुल्कग्रहीत्रीं नियुज्य स्वयमपि तत्र सन्तं विद्यमानं तथा मुरलीं नित्यनियमतो वादयन्तं पत्रेण मयूर-पुच्छेन स्वप्रिय-वस्तुना शृङ्गादिना च जुष्टं सेवितं विराजितमिति यावत्। गृहीत-लकुटैः मित्र-वृन्दैः सुहृत्संघैः वेष्टितम् आवृतम् तं शुल्क-ग्रहणोत्सुकं श्रीकृष्णं पश्यन्त्यो वयं गच्छामः, पश्यतु भवान् इति आत्मानं परिहासेन व्यञ्जयन्त्य इत्यर्थः। इत्येवं हेलया परिहासेनैव सस्मितम् (यथा स्यात्तथेति क्रियाविशेषणम्) अवमत्य अनादृत्य अग्रे चेलुः चलितवत्यः।

समासादिः—ध्वनिता चासौ मुरलीति कर्मधारयानन्तरं सा च पत्रं च शृङ्गादि चेति तानि। तैः जुष्टस्तं जुष्टम्। अत्र पत्रं मयूरपुच्छं वाहनं वा। "पत्रं तु वाहने पर्णे पक्षे च शर-पक्षिणोः" (इति मेदनी)। कलितानिलकुटानि यैस्ते तैः। स्वभावोऽयं गोपानां बृहल्लकुटं सर्वदैव धारयन्ति। अत्र स्वभावोक्तिरेवालङ्कारः। 'स्वभावोक्तिर्दुरूहार्थ-स्व-क्रिया-रूप-वर्णनम्'॥ २९॥

मधुमङ्गलस्य श्रीकृष्णसखस्योक्तिमनुष्टुभा वक्ति—

मत्तास्ता मधुरैर्भावैर्मधुरामधुमङ्गलः ।
दृष्ट्वा स्मित्वाऽथ सक्रोधमुवाच मधुमर्दनम् ॥ ३० ॥

अन्वयः—अथ मधुमङ्गलः श्रीकृष्णस्य सखा कश्चिद् मधुरैः भावैः मत्ताः मधुराः ताः (सखीः) दृष्ट्वा स्मित्वा (कृतकस्मितं कृत्वा) सक्रोधं (दर्शित-कोपं यथा स्यात्तथेति क्रियाविशेषणम्) मधु-मर्दनं (श्रीकृष्णम्) उवाच (उक्तवान्) ।

भावार्थः--यदा सर्वाः सख्यस्ततोऽग्रे गन्तुं व्यवस्थितास्तदा रङ्गभङ्गं विलोक्य श्रीकृष्णसखः मिथ्या-कृतककोपं प्रदर्श्य स्मित्वा ईषद्धास्यं विधाय मधु-मर्दनं श्रीकृष्णं राधादिकाः सखीः निरोद्धुं सङ्केतयति ।

समासादिः--मधोः नाम्नोऽसुरस्य मर्दनम्=मधुमर्दनम् । इत्येक एव समासः । पूर्वप्रोक्त एव वृत्त्यनुप्रासः शाब्दोऽलङ्कारः । आर्थस्तु परिकरोऽलङ्कारः ।

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ॥ ३० ॥

इदानीं मधुमङ्गलः स्ववयस्य-कर्त्तव्यमुपदिशति वसन्ततिलकया छन्दसा—

गर्वेण फुल्ल-मधुना मधुनाऽतिमत्ता
मत्तालिभिः सममन्दबलाऽबलापि ।
गच्छत्यसौ स्फुट-मदन्त-करा हि राधा
बाधाः कथं नहि वयस्य ! बलात् करोषि ॥ ३१ ॥

अन्वयः—मधुमङ्गल-वक्तव्यमेव विवृणोति कविः—यद् हे वयस्य कृष्ण ! अधुना मधुना मत्ता अबला अपि मत्तालिभिः समम् अमन्दबला (भवन्ती) मदन्त-करा हि असौ राधा स्फुटं गर्वेण फुल्लं (यथा तथेति क्रियाविशेषणम्) गच्छति । बलात् बाधाः कथं नहि करोषि ।

भावार्थः--मधुमङ्गलो वक्ति--हे वयस्य ! श्रीकृष्ण ! असौ मधु-मत्ता अबला अपि राधा मधुमत्ताभिः सखीभिः सह प्रबला भूत्वा मदन्तकरा (सती) गर्वेण फुल्लं (यथा स्यात्तथेति क्रियाविशेषणम् , स्फुटं गच्छति । त्वं कथं नहि तस्या गमने बाधाः विघ्नानि करोषि, उत्पादयसीति भावार्थः ॥

समासादिः—अमन्दं बलं यस्याः सा । अविद्यमानं बलं यस्याः सा । पूर्वत्र 'अनेकमन्यपदार्थे—२।२।२४' इत्यनेन उत्तरत्र 'नञोऽस्त्यर्थानां वाच्यावाचोत्तर-पदलोपश्च--२।२।२४' इति वार्तिकबलात् समासः । मम अन्तकरा मदन्तकरा 'प्रत्य-योत्तरपदयोश्च—७।२।९८' इत्यस्मदो मदादेशः । स एवालङ्कारः । (२८) अष्टा-विंशतिपद्योक्तः ॥ ३१ ॥

इदानीं कृष्णो व्याजेन गतिविशेषैरग्रे गच्छन्तीं राधां निरुध्य कृतककोपः सुहृद आह शिखरिण्या—

हरिं जेतुं शक्तां मदन-नृपतेः शक्तिमतुलां
भ्रमद्-घण्टी-ध्वानां गति-बिलसितैस्तां स कलयम् ।
उदश्चन्मारोद्यद् भ्रुवमिति समागुण्ठच कपटा-
न्मृषारोषादेष स्फुटमिदमवादीत् सहचरान् ।। ३२ ।।

अन्वयः—स एष कृष्णस्तां राधां हरिं जेतुं शक्तां मदन-नृपतेः अतुलां शक्तिम्, भ्रमद्-घण्टी-ध्वानाम्, उदश्चन्मारोद्यद्-भ्रुवम् इति (इत्यादिविशिष्टाम्) कलयन् जानन् कपटात् (व्याजेन) गति-बिलसितैः समागुण्ठच मृषारोषात् सहचरान् (स्वसुहृदः) इदं (वक्ष्यमाणम्) अवादीत् (उक्तवान्) ।

भावार्थः—मधुमङ्गलप्रयुक्तः स एष कृष्णस्तां राधां विशेषणचतुष्टय-विशिष्टां जानन् यथा—इयं हरिं कृष्णं श्लेषेण हरिं सिंहम् (अपि) जेतुं शक्ता अस्ति। कामराजस्य अद्भुता शक्तिः अस्ति। भ्रमन्तीनां नूपुरादिघण्टीनां ध्वानैः शब्दैः शालिनी शोभमाना अस्ति। उदश्चन्मारोद्यद्-भ्रूः। उदश्चते माराय (कामाय) मदनायेति यावत्, उद्यन्त्यौ भ्रूवौ यस्यास्तादृशी इयमस्ति, इति विशिष्टां जानन् कपटाद् व्याजेन स्वगति-विलसितैः विविधां स्व-नृत्य-कलां दर्शयित्वा तत्रैव तां समागुण्ठच आसक्तां कृत्वा अग्रेगमनान्निरुध्येति यावत्, ततः कृतकं कोपं दर्शयित्वा स्वसुहृदोऽपि अग्रेतनं वाक्यम् अवोचदिति भावः।

समासादिः—मदनश्चासौ नृपतिरिति तस्य। नास्ति तुला यस्याः सा ताम्। भ्रमन्त्यश्च ताः घण्टचः तासां ध्वानो यस्यां सा तामिति व्यधिकरणबहुव्रीहिः। गतीनां विलसितानि तैः। अत्र भावे क्तः। उदश्चन् चासौ मारः। तस्मै उद्यन्त्यौ भ्रूवौ यस्याः सा ताम्। अत्र श्लेष-रूपक-काव्यलिङ्गादीनां संसृष्टिः। लक्षणान्युक्तानि पूर्वम् ।।३२।।

सम्प्रति कृष्णो मित्र-वर्गं सम्बोध्य वसन्ततिलकयाह—

सत्यं ब्रवीति मधुमङ्गल एष धूर्ता
दानं निपात्य मम यान्ति मदोरुगर्वाः ।
पश्याद्य दर्पमधुना मम मित्रवर्ग !
गृह्णामि दानमचिरादहमेक एव ।।३३।।

अन्वयः—श्रीकृष्णः मित्र-वर्गं सम्बोधयति—हे मित्रवर्ग ! एष मधुमङ्गलः सत्यं ब्रवीति। मदोरुगर्वा धूर्ताः (एताः) मम दानं (शुल्कसम्बन्धि) निपात्य (वञ्चयित्वैव) यान्ति। अद्य एक एव अहम् अचिराद् दानं गृह्णामि—अधुना मम दर्पं पश्य निरीक्षस्व।

भावार्थः—अत्र श्रीकृष्णः स्वौजः प्रशंसति। यद् एता मदमत्ता मां वञ्चयित्वा यत् शुल्क-दानं संगोप्य यान्ति तदहम् एकाकी एव एताभ्यो गृह्णामि। अचिरादेव झटित्येवेति हे मित्रवृन्द ! पश्य मे मदं दर्पम्, "दर्पोऽभिमानोऽवष्टम्भोऽवलेपोऽहं स्मयो मदः" इत्याद्यमरः।

समासादिः—मदेन उरुः गर्वो यासां ता राधादयः सख्यः। नास्त्यत्र स्फुटोऽलङ्कारः ॥३३॥

सम्प्रति श्रीकृष्णः स्वमित्रवर्गं सखीनां रोधनप्रकारं सूचयति—

शृङ्गाणि वादयत भो मुरलीस्तथालीः
संरक्षत स्फुटमितस्तत एव यान्तीः।
राधामहं कुटिल-यौवन-चर्य-नाथां
रुद्धां करोमि सहसा भुजयोर्युगेन ॥३४॥

अन्वयः—भो सुहृदः ! शृङ्गाणि मुरलीश्च वादयत। तथा स्फुटम् इतस्तत एव यान्तीः आलीः संरक्षत। अहं (श्रीकृष्णः) कुटिल-यौवन-चर्य-नाथां राधां भुजयोः युगेन सहसा रुद्धां (निगृहीतां) करोमि।

भावार्थः—अत्र श्रीकृष्णः सुहृदः कर्तव्यं शिक्षयति। यद् यूयं शृङ्गनामकानि मुरलीनामकानि च मधुरमनोहराणि सूक्ष्मवाद्यानि वादयत। आलीश्चेतस्ततः पलायनतो रक्षत। अहम् उद्धत-तारुण्योपचर्यस्वामिकां राधां भुजाभ्यां सह-सोपगूह्य तिष्ठामि। भुजवेष्टितां बाहुलताश्रितां करोमि, तर्हि कथं गच्छतीति परिहासः। इत्येवं स्फुट-परिहासोऽत्र।

समासादिः—अत्र नियोगार्थ एव शब्दः। अनिश्चितदिशं पलायनतो रक्षतेत्यर्थः। कुटिलं च तद् यौवनम्, तेन चर्यः (उपचर्यः सेव्य इति यावत्) नाथो ययेति बहुव्रीहिः। अत्र सूक्ष्मोऽर्थालङ्कारः लक्षणं यथा—

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा।
कयापि सूच्यते भङ्ग्या सूक्ष्मं तदुच्यते ॥ (१०।९१) ॥ ३४ ॥

अन्यानपि सुरक्षणप्रकारान् शार्दूलविक्रीडितेनाह—

घट्टी-पाल ! सहस्रवर्य ! सुबल ! त्वं तां विशाखां बलाद्
घट्टीकुट्टिम-पट्टरक्षक ! सखे चित्रां त्वमत्रोज्ज्वलः।
सभ्यश्रेष्ठ ! वतंस ! चम्पक-लतां त्वं तुङ्गविद्यां तथा
वर्त्म-प्रेक्षक लक्ष-दक्ष-ललितां त्वं कोकिलां वेष्टय ॥३५॥

अन्वयः—हे सहस्रवर्य ! घट्टी-पाल ! सुबल ! त्वं बलाद् विशाखां वेष्टय (बाहुपीडितां कुरुष्वेति परिहासः) (अग्रेऽपि सर्वत्रैव वेष्टनक्रियान्वयः कार्यः) हे सखे !

घट्टीकुट्टिम-पट्टरक्षक ! (नाम्ना) उज्ज्वल ! अत्र त्वं चित्रां (नाम्ना) वेष्टय। हे हेसश्य-श्रेष्ठ ! वतंस ! (नाम्ना) त्वं चम्पकलतां तथा तुङ्गविद्यां (चेत्युभे अपि) वेष्टय। हे लक्ष-दक्ष ! वर्त्म-प्रेक्षक ! त्वं ललितां (सुन्दरीम्) कोकिलां वेष्टय।

भावार्थः—अत्र नामनिर्देशेन पृथक-पृथक् सर्वेषां सर्वासां च कर्तृ-कर्मत्वेन—**वेष्टनक्रियान्वयं वक्ति**। तथाहि-हे सहस्रपुम्भिः वरणीयः घट्टीपालकः **सुबल** ! (नाम्ना) त्वं विशाखां (नाम्ना) सखीं वेष्टय। हठादित्यपि **सर्वत्रान्वेति**। हे सखे ! घट्टिकुट्टीमोपरि विस्तीर्णपट्टानां रक्षक! (इति कार्यनिर्देशः) नाम्ना उज्वला ! त्वम् अत्र (कर्तव्यकर्मणि) चित्रां (नाम्ना) सखीं—वेष्टय। हे **सभ्येषु** सभासदस्येषु श्रेष्ठ ! (नाम्ना) वतं स ! त्वं चम्पकलतां तथा तुङ्गविद्याम् (नाम्ना) उभे सख्यौ वेष्टय। (अत्र द्वित्ववेष्टने श्रेष्ठत्वं हेतुः) हे **लक्षेषु** नरेषु एकदक्षः **वर्त्म-प्रेक्षक** (मार्गदर्शक इति कार्य-निर्देशः) अत्र वर्त्मप्रेक्षक इति विशेषणप्राधान्याद् न नामनिर्देशः) वैशिष्टचात् कोकिलायाः ललितेति (सुन्दरीति) विशेषणम्। ईदृशीं कोकिलां वेष्टयेति तुभ्यं विशेषपुरस्कारः। सर्वत्र परिहासकारणाद् यथा योग्य-पुरस्कारवितरणमुचितमितिभावः।

समासादिः—घट्टचाः पालः=घट्टीपालः। सहस्रेण वर्यः सहस्रवर्यस्तां तत्सम्बुद्धौ। घट्टचाः कुट्टिमानि तेषां पट्टानि तेष-रक्षकः, इति तत्सम्बुद्धौ। सभ्येषु श्रेष्ठः, तत्सम्बुद्धौ। लक्षेषु दक्ष इति पुंविशेषणम्। लक्षेषु दक्षा इति ललिताविशेषणमपि देहलीदीप-न्यायेन ज्ञेयः। अत्रानुप्रासः शब्दालङ्कारः। अर्थेषु परिकरसम-काव्यलिङ्गादीनां संसृष्टिः। तत्र समालङ्कारलक्षणं यथा—

समं स्यादानुरूप्येण श्लाघायोग्यस्य वस्तुनः(७१)॥ ३५॥

सम्प्रति परितो वेष्टिताभिस्ताभिरालीभिर्वागाडम्बरेण सम्मिते सखिवर्गे स्वयं श्रीकृष्णो राधया व्यङ्गच-वस्तुतः कुपितकल्पो वक्ति मन्दाक्रान्तया—

स्मेरैरेतैः सपदि परितो वेष्टचमानाभिराभि-
र्वागाटोपैः प्रिय-सखकुलेष्वाशु संस्तम्भितेषु।
रङ्गे भङ्गचा कुटिलवचसा राधया संस्तुतोऽसौ
कृष्णः कोपादिव सखि तदा गर्वितां तामवादीत्॥ ३६॥

अन्वयः—सपदि स्मेरैरेतैः (सखिभिः) वेष्टचमानाभिः (आभिः)आलीभिः वागाटोपैः आशु प्रिय-सखकुले संस्तम्भितेषु (सत्सु) हे सखि रङ्गे कुटिल-वचसा राधया भङ्गचा संस्तुतः असौ श्रीकृष्णः गर्वितां तां कोपाद् इव तदा अवादीत्।

भावार्थः- यदा श्रीकृष्णादेशात् तस्य सखायस्ता आलीः परितो बेष्टया ञ्चक्रुः, तर्ह्याशु ता अपि तान् स्ववागाडम्बरैः स्तम्भितान् चक्रुः। तत्रैव रङ्गे

राधाऽपि कुटिलवचोभिः श्रीकृष्णं व्याजस्तुत्या तुष्टाव। ततो गर्विताम्, अत एव ईषत्कुपित इव स तामुत्तरयामास, अग्रिम-वाक्यैरित्यर्थः।

समासादिः—प्रियाश्च ते सखाय इति प्रियसखा तेषां कुलानि तेषु। कुटिलं वचो यस्याः सा तया कुटिलवचसा राधयेत्यस्य विशेषणतया स्त्रीत्वम्। उपमोत्प्रेक्षा-सन्देहसङ्करालङ्काराः। लक्षणं तूक्तम् ॥ ३६ ॥

सम्प्रति "शठे शाठ्यं समाचरेत्" इति नीत्या श्रीकृष्णः राधामुत्तरयति तादृशं शार्दूलविक्रीडितेन—

नित्यं गर्विणि वन्यवर्त्मनि मिषात् संगोप्य गव्यादिकं
विक्रीणासि शठे त्वमत्र पतिता भाग्येन हस्तेऽद्य मे।
त्वां वध्वोरुमनोज-राज-पुरतो नेष्याम्यवश्यं तथा
प्रीत्या यच्छति मह्यमेव स यथा तारुण्य-रत्नानि वः ॥ ३७ ॥

अन्वयः—श्रीकृष्णो वक्ति—(अयि) गर्विणि! शठे! (राधिके!) त्वं गव्यादिकं मिषात् संगोप्य अत्र वन्यवर्त्मनि नित्यं विक्रीणासि। अद्य भाग्येन मे हस्ते पतिता (असि) त्वां वध्वा उरु-मनोज-राज-पुरतः तथा नेष्यामि यथा स प्रीत्या वः (यौवन-)तारुण्यरत्नानि अवश्यं मह्यमेव यच्छति।

भावार्थः—श्रीकृष्णः राधिकया सह परिहासं कर्तुं तां कथयति। अयि गर्विणि शठे (छलिनि) राधे! त्वं छद्मना गव्यादिकं घृतदुग्धादि संगोप्य तदीयं देयं शुल्कम् अदत्वैव वन्य-वर्त्मनि अत्र अरण्य-मार्गे नित्यं विक्रीणासि, तद्विक्रयं करोषि। अद्य भाग्येन अदृष्टदोषेण मद्धस्ते पतिता असि। अहं त्वां महामारदेवस्याग्रे नेष्यामि, स हि प्रसन्नो भूत्वा वः युष्माकं सर्वासामपि तारुण्यरत्नानि ममाधीनानि करिष्यति, तर्हि यूयं मद्वश्या भविष्यथ। इतः पलाय्येतस्ततो गमनं वो व्यर्थमेवेति भावः

समासादिः—वन्यं च तद् वर्त्म तस्मिन्। मनोजश्चासौ राजेति तत्पुरुषादृचि मनोजराजेन, पुनः उरुश्चासौ मनोजराज इति कर्मधारयात् तस्य पुरत इति तत्पुरुष-समासः। 'विक्रीणासि' इत्यत्र संज्ञाविधेरनित्यत्वान्न 'परिव्ययेभ्यः क्रियाः-१।३।१८' इत्यात्मनेपदम्। शाब्दोऽनुप्रासः, काव्यलिङ्ग आर्थः। दाणो यच्छादेश "पाघ्राध्मा-७।३।७८" सूत्रम्।

अथवा अबला यूयमिति कथं बहु प्रयसनीयं स्वयमहमेव दण्डदः स्यामिति परिहासच्छलमाह, उपजात्या—

आस्त्वद्विधानप्यबलागणान् किं नेष्यामि तस्योरुनृपस्य पार्श्वे।
दास्यामि शिक्षामहमेव साक्षात् तदद्वितीयो व्रज-पत्तनेऽस्मिन् ॥ ३८ ॥

अन्वयः—पुनर्निश्चित्य वक्ति—आः इति स्मृतौ त्वद्विधान् अबलागणान् अपि तस्य उरुनृपस्य पार्श्वे किं (कथं) नेष्यामि। अस्मिन् व्रज-पत्तने तदद्वितीयः

साक्षादहमेव (वः) शिक्षां दास्यामि । (नास्ति अन्यत्र गमने प्रयोजनम्, वः कृतेऽहमेव पर्याप्त इति परिहासातिरेकः ।

भावार्थः—पूर्वन्तु श्रीकृष्णो राधां वध्वा महामनोजराज-पार्श्वे नेतुमुक्तवानस्मिन् पद्ये आः इति स्मृतिसूचकाव्ययपदमुक्त्वा पक्षान्तरं द्योतयन् वक्ति– अहो त्वद्विधान् अबलागणान् महामनोजराजपार्श्वे न नेष्यामि । स्वयमेवाहमत्र व्रजनगरे महाराजोऽस्मि । साक्षाद् वो युष्मभ्यं शिक्षां (दण्डं) दास्यामीति दानकेल्यतिरेकं द्योतयतीति भावः ।

समासादिः—उरुश्चासौ नृपस्तस्य । तेन अद्वितीयः तदद्वितीय इति । अथवा स अद्वितीयो यस्य स तदद्वितीयो बहुव्रीहिः । "पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्" इत्यमरः । स्वयं शिक्षादाने हेतोरुपादानात् स्फुटमेव काव्यलिङ्गमलाङ्कारः। लक्षणम्-

"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्ग निगद्यते'। १०।६२।। ३८ ।।

सम्प्रति स्पष्टं दण्डविधानं विदधाति वसन्ततिलकाछन्दसा—

बध्नामि तूर्णमनया वनमालया त्वां
मथ्नामि हन्त दशनच्छदमत्र दन्तैः ।
सन्दारयामि कुचयोर्युगलं नखाग्रै-
र्दानं न चेज्झटिति यच्छसि चोरके त्वम् ।।३९।।

अन्वयः—अधुना चौर्य-दण्डमेव शास्ति सनियमम्—अयि चोरके ! त्वं चेद् (यदि) दानं (शुल्कदेयम्) झटिति न यच्छसि (तदा) त्वाम् अनया वनमालया (मत्कण्ठस्थितया वैजयन्त्या मालयेत्यर्थः) तूर्णं बध्नामि । हन्त अत्र दन्तैः (तव) दशनच्छदं मथ्नामि । नखाग्रैः (स्वीयैः) कुचयोः युगलं सन्दारयामि । इति संक्षिप्तो दण्डः ।

भावार्थः—स्वयं दण्डं सम्प्रति शास्ति—अयि चोरके (पश्यतोहरे) त्वं यदि तूर्णं शुल्कं देयं न ददासि, तदाहं स्व-गलस्थया वैजयन्तीमालया त्वां बध्नामि । दन्तैस्ते दन्तच्छदं मथ्नामि । नखाग्रैस्ते कुचद्वयविदारणं च युगपत् करोमीति भावार्थः ।

समासादिः—बन्ध, मन्थ-धातोः क्र्यादित्वात् श्नाप्रत्यये तस्य ङित्वात् 'अनिदितां हल० ६।४।२४' इति नलोपः । दण्डदाने हेतोरुक्त्या काव्यलिङ्गमेवालङ्कारः (३८) अष्टात्रिंशत्पद्योक्तः ।।३९ ।।

अधुना दान-केलिं कर्तुं सर्वथा समुत्सुके श्रीकृष्णे राधा परुषाक्षर भर्त्सयन्ती प्राह, वसन्ततिलकयैव—

इत्थं प्रजल्प्य रभसान्तरसा तदीय-
रक्ताम्बराञ्चलमनल्पकचञ्चलेऽस्मिन् ।
धर्तुं समिच्छति रुषा परुषाक्षरं त-
मञ्चद् दृगञ्चलकला कलया ललाप ॥४०॥

अन्वयः—पूर्वोक्तमभिधाय दानकेलितत्परे श्रीकृष्णे कविराह-इत्थं प्रजल्प्य अनल्पकचञ्चले रभसा तदीय-रक्ताम्बराञ्चलं धर्तुं समिच्छति अस्मिन् श्रीकृष्णे अन्तरसा अञ्चद्-दृगञ्चलकला (राधा) रुषा तं (श्रीकृष्णं) परुषाक्षरं (यथा स्यात्तथेति क्रियाविशेषणम्) कलया (नैपुण्येन) ललाप संलपितवतीत्यन्वयः ।

भावार्थः—इत्थं पूर्वोक्तं दानापहारदण्डमभिधाय तत्कर्तुमतिचञ्चले रभसा-हठाद् राधाया रक्ताम्बराञ्चलं धर्तुं समुत्सुकेऽस्मिन् श्रीकृष्णे स्वान्तरसा अञ्चद्-दृगञ्चला भ्रुकुटीभङ्गशालिनी बहिः कोपेन क्रूराक्षरं यथा स्यात्तथा नैपुण्यभङ्ग्या जगाद उक्तवतीति भावः । अन्तशब्दोऽत्र स्वान्तपर्यायः नावसानपर्यायः ।

समासादिः--तदीयं च तद् रक्ताम्बरम्, तस्य अञ्चलम् । अनल्पकश्चासौ चञ्चलस्तस्मिन् । परुषाणि अक्षराणि यस्मिन् कर्मणि तद्यथा तथेति क्रियाविशेषणम् । दृशोः अञ्चलम्, तस्य कलेति समासं विधाय अञ्चन्ती दृगञ्चलकला यस्या सेति राधा विशेष्यप्राधान्याद् गृह्यते । कलयेति शिल्पनैपुण्यार्थतया वाक्चातुर्येणेत्यर्थः ॥ ४० ॥

सम्प्रति राधा परुषाक्षरं भर्त्सयति भृशम्--

दूरेषु तिष्ठ नहि मां स्पृश धृष्ठ-धूर्त !
यान्तीं सुयाग-भवनं व्रतिनीं पवित्राम् ।
स्पृष्टं तवाद्य मरुताऽपि ममाद्य गव्यं
पश्यामि तन्न भविता शुभ-यागयोग्यम् ॥४१॥

अन्वयः—तदेव परुषाक्षरं व्यञ्जयति--अये धृष्ठ-धूर्त ! श्रीकृष्ण ! दूरेषु तिष्ठ, सुयाग-भवनं यान्तीं व्रतिनीं पवित्रां मां नहि स्पृश । पश्यामि मम अद्य-गव्यम् (सद्योनवनीतादिकम्), तव मरुतापि स्पृष्टम् सत्) अद्य (सम्प्रतिकाले) शुभ-याग-योग्यं न भविता त्वमेवमशुद्धोऽसीत्यन्वयः ॥ ४१ ॥

भावार्थः--राधिका बहु व्यङ्ग्यमुत्तरति श्रीकृष्णं प्रति दानकेलिव्याजेन । अये धृष्ठधूर्त ! दूरेषु (बहुवचनोक्त्या) अतिदूरे इत्यर्थः, तिष्ठ (गति-रोधं कुरु-नाग्रे चल) सुयाग-भवनं यान्तीं व्रतिनीं पवित्रां (सर्वं साभिप्रायं विशेषणम्) मां नहि (निश्चयतो नैवेत्यर्थः) स्पृश (मत्स्पर्शं कुरु) तत्र, हेतुं वक्ति--अहं पश्यामि तवाधमस्य वायुनापि स्पृष्टं ममाद्यतनं गव्यादिकं मत्स्पर्शादद्य तु शुद्धतरं स्थास्यति; किन्तु श्वः शुभ-याग-योग्यं नैव भवितेत्यनद्यतनप्रयोगाद् व्यज्यते । तव मारुतस्पर्शोऽपि दूरपरिहार्यः । हस्तस्पर्शस्य तु कथैव का ।

समासादिः--धृष्टश्चासौ धूर्तः। अद्य भवार्थे एकोऽद्यशब्दः कालवाची चापर इति लाटानुप्रासादयोऽलङ्कारा: शाब्दाः। आर्थालङ्कारास्तु परिकर-काव्यलिङ्गादयः। सर्वोपरि श्रीकृष्णस्य स्पर्शानर्हत्वादिव्यञ्जकवस्तुध्वनिकाव्यमिदं सर्वोत्तमम् ।।४१।।

अत्र श्रीकृष्णोऽपि सहेतुकमेवात्मानं शुद्धं समर्थयन् तया समया सह महोज्ज्वलसत्रं कर्तुं व्यवतिष्ठते वसन्ततिलकयैव--

कामार्णवोच्छलित-धर्मजलाभिषेकैः
शुद्धोऽस्मि किं न किल पश्यसि दीर्घ-नेत्रे।
तस्मात्त्वया सह महोज्ज्वल-नामसत्रं
कर्तुं लसामि समया शुभधर्म-पत्न्या ।।४२।।

अन्वयः—अयि दीर्घनेत्रे (अहम्) कामार्णवोच्छलितधर्म-जलाभिषेकैः शुद्धः अस्मि, किल किं न पश्यसि। तस्मात् समया शुद्ध-धर्मपत्न्या त्वया सह महोज्ज्वल-नाम सत्रं कर्तुं लसामि। (दीर्घ-नेत्रा त्वं किं न पश्यसीत्याश्चर्यम्)।

भावार्थः—यथा राधा श्रीकृष्णम् अशुद्धं संसाध्य स्पर्शायोग्यं साधितवती, तथैव श्रीकृष्णोऽधुना आत्मानं व्यङ्ग्यमर्य्यादया कामरूपाद् अर्णवात् समुद्रात् उच्छलितस्य धर्म-रूपजलस्य अभिषेकैः 'अहं शुद्धोऽस्मि' इति त्वं दीर्घ-नेत्राऽपि किं न पश्यसि, इत्येवं धर्मशुद्धं दर्शयित्वा राधां च धर्मः पतिः यस्याः सा धर्मपत्नीति विग्रहेण धर्मपत्नीं कृत्वा। इत्येवं त्वं धर्मपत्नि अहं धर्म-शुद्ध इति उभौ आवाम् समौ स्वः। इति समया तुल्यया त्वया धर्म-पत्न्या सह मिलित्वा महोज्ज्वल-नामकं सत्रं यज्ञं कर्तुं लसामि अभिलषामि इच्छामीति यावत्। इत्येवं स्वयं धर्मो भूत्वा तां धर्मपत्नीं विधाय 'उभौ सह धर्मयज्ञं चरतः' इति श्रुत्यर्थं संसाधयति। महोज्ज्वलनाम यज्ञं मया सह अधुना त्वं मे धर्मपत्नी असि इति विशालनेत्रासि सर्वं पश्य पलायसे कथम्। इत्यादिना तां निरुत्तरां करोति। सर्वमिदं महाकवेः काव्यमिति भावः।

समासादिः--काम एव अर्णवः (मयूर-व्यंसकादित्वात् समासः) तस्मात् उच्छलितश्चासौ धर्मः स एव जलं तेन अभिषेकाः, तैः। दीर्घे नेत्रे यस्याः सा तत्सम्बुद्धौ-हे दीर्घनेत्रे (विशालदृष्टे इत्यर्थः) एतेन उभयं साधयति (त्वं स्थूलदृष्टिरसि न किञ्चित् पश्यसि मूर्खासि। अन्यच्च तव विशाले यदि नेत्रे स्तः तर्हि कथं न पश्यसि? इयं तु ते मूर्खतेति भावः। महान् चासौ उज्ज्वलः स नाम यस्य स महोज्ज्वलनामा चासौ सत्रः इति तथोक्तः, महोज्ज्वलनाम-सत्रः तं कर्तुमित्यनेनान्वयः। शुभश्चासौ धर्मः, स एव पतिर्यस्याः सा शुभधर्मपत्नी 'पत्युर्नो यज्ञ-संयोगे-४।१।३३' इति पत्युरिकारस्य नत्वे नान्तत्वात् 'ऋन्नेभ्यो ङीप्-४।१।५' इति ङीप्। अहं शुद्धो धर्माभिषिक्त इति लक्षणया धर्मोऽस्मि, त्वं च मम धर्मपत्नी जातेति उभाभ्यां स्त्रीपुंसाभ्यां

यज्ञोऽनुष्ठीयते। इति आवाभ्यां समाभ्यां महोज्ज्वलनामा सत्रोऽवश्यमनुष्ठेयः। अतोऽत्र ते पलायनं गर्हितमिति साधितवान् श्रीकृष्णः ॥४२॥

कोकिलमित्रप्रेरितः श्रीकृष्णो 'युग्मेन' राधां वक्ति—

एतां वयस्य ! मृदु-हृद्य-वचः-प्रबन्ध-
रङ्गैः सुरञ्जित-तरां नितरां विधाय।
दानं गृहाण निजमाश्विति कोकिलोक्त-
माश्रुत्य सस्मितमनन्त-विचित्र-लीलः ॥४३॥

सव्यं करं सुभग-सव्य-कटौ निधाया—
सव्येन कृष्ट-पट-सृष्ट-मुखार्द्धगुण्ठाम्।
शीर्ष्णि स्फुरन्नवघृतोज्ज्वल-हेम-कुम्भां
भङ्ग्या भ्रमत्स्मितदृशं स जगाद राधाम् ॥४४॥

अन्वयः—कोकिलोक्तिपूर्वं श्रीकृष्णोक्तिमाख्याति कविः– हे वयस्य ! मृदु-हृद्य-वचःप्रबन्धरङ्गैः एतां नितरां सुरञ्जितां विधाय, आशु निजं दानं गृहाण, इति कोकिलोक्तमाश्रुत्य, अनन्त-विचित्रलीलः स श्रीकृष्णः सव्यं करं सुभग-सव्यकटौ निधाय असव्येन कृष्ट-पट-सृष्ट-मुखार्द्धगुण्ठां शीर्ष्णि स्फुरन्नवघृतोज्ज्वल-हेम-कुम्भां भ्रमत्स्मितदृशं राधां भङ्ग्या जगाद।

भावार्थः—प्रथमं कोकिलनामा सुहृत् श्रीकृष्णं प्रेरयति—यद् हे वयस्य ! श्रीकृष्ण ! सुकोमल-हृदयग्राहिवचनरचनारङ्गैः एतां राधां सुष्ठु रञ्जिताम् अनुरक्तां विधाय कृत्वा शीघ्रं स्वीयं दानं ग्राह्यभागं गृहाण। इति तदुक्तिं सस्मितम् आश्रुत्य कर्णे कृत्वा निशम्येति यावत् अनन्तलीलः विचित्रकौतुकी स श्रीकृष्णो राधां भङ्ग्या जगाद। या हि राधा निजसव्यं करं सुन्दरसव्यकटौ निधाय अपसव्येन (दक्षिणकरेण) स्वपरिधानपटाञ्चलमाकृष्य मुखार्द्धं गुण्ठितवती आसीत्। शीर्ष्णि (शिरसि च) स्फुरन्नवघृतोज्ज्वल-हेमकुम्भा सती भ्रमत्स्मितदृग् आसीत्। अर्थाद् मस्तके हैयङ्गवीनभृतोज्ज्वल सुवर्णकलसं बिभ्रती सस्मितं दृशौ कटाक्षं चालयन्ती चासीत्तामित्यर्थः। भ्रमत्स्मितदृशमिति क्रियाविशेषणं कृत्वा भ्रमत्-स्मितदृशं यथा स्यात्तथा श्रीकृष्णो जगादेत्यत्रापि तस्यान्वयः सम्भवति।

समासादिः— मृदूनि हृद्यानि च तानि वचांसि, तेषां प्रबन्धा एव रङ्गानि तैः। 'प्रबन्धकल्पनाकथावल्लिकाप्रहेलिका' त्रपुपिचट्टम् रङ्गवङ्गे, इत्यमरवाक्याद् द्रव्ययोः संसर्गकृद् द्रव्यं रङ्गमुच्यते। अत्र लक्षणया श्रीकृष्णस्य राधासञ्जनवचः-प्रबन्धा एव रङ्गानि ज्ञेयानि। अनन्ता विचित्रालीला यस्य सः। कृष्टश्चासौ पटस्तेन सृष्टा सम्पादिता मुखार्द्धस्य गुण्ठा यया सा ताम्। नवं च तद् घृतम्, तस्योज्ज्वलो हेमकुम्भः। स्फुरन् नवघृतोज्ज्वलहेमकुम्भो यस्याः सा ताम् तथोक्ताम्। स्मितसहिते-

दृशौ = स्मितदृशाविति शाकपार्थिवसमासे भ्रमन्त्यौ स्मितदृशौ यस्याः सा ताम्। अत्ररूपकस्वभावोक्तिपरिकरादि-संसृष्टिरलङ्कारः। लक्षणमुक्तं सर्वेषाम् ॥४३।४४॥

रङ्गात्मकं श्रीकृष्णवाक्यमेव दर्शयति शार्दूलविक्रीडितेन—

घट्टी-कुट्टिम-सृष्ट-पट्ट-निकटे राधे घटीं स्थापय
प्रोद्यत्सौरभ-सद्म-पद्म-पवनैः शान्तिं क्षणं वारय।
दीव्यन्नव्य-सुगव्य-दान-विलसल्लेखं मुहुः कारय
क्रूरस्यालि-कुलस्य दानमचिरादारात् स्वयं दापय ॥ ४५ ॥

अन्वयः—श्रीकृष्णः स्व-वाक्य-रङ्गानि रचयति—अयि राधे! घटीं (स्वघृत-कलसम्) घट्टी-कुट्टिम-सृष्ट-पट्ट-निकटे स्थापय (रक्ष) प्रोद्यत्सौरभ-सद्मपद्मपवनैः क्षणं (मुहूर्तम्) शान्तिं वारय (विश्रामं कुरु) मुहुः दीव्यन्नव्य-सुगव्य-दान-विलसल्लेखं कारय। (तथा) क्रूरस्य अलिकुलस्य दानम् आराद् अचिरात् (शीघ्रं कारय)।

भावार्थः—कोकिलसुहृदुक्तदिशा मृदुवचोरङ्गै राधां वशयति श्रीकृष्णः—अयि राधे! घट्टी-कुट्टिमविस्तृतदुकूलपार्श्वे स्व घृतस्वर्ण-कलसं स्थापय। स्वयं च समागच्छद्भिः सौरभ-सम्भृत-पद्मगन्धिभिः पवनैः क्षणं शान्तिं मार्गपरिश्रमं वारय अपनय। तदनन्तरं दीव्यतो नव्यस्य गव्यस्य (घृतस्य) दान-विलसल्लेखं (दान-सम्बन्धि सुकृतजनकलेखं) कारय। घृतसुगन्धेन तवश्वाससुगन्धेनाकृष्टस्य अलिकुलस्य च दानं देयं वस्तु आराद् अचिरादेव दापय। (अत्र सुगन्धेन तव सौन्दर्य-सुगन्धेन चाकृष्टयोः भ्रमरयुवककुलयोः देयं दापयेति ध्वनिकाव्यम् ॥४५॥

सम्प्रति लेखयितुं लिपिकरमादिशति वसन्ततिलकया—

आगच्छ हे लिपिपते मधु-मङ्गलेह!
पञ्जीं पठन् दृढमतिः कुरुसत्य-लेखम्।
उत्कोच-लोभ-भरतो यदि नाशयेस्त्वं
द्रव्याणि मे किल तदा भवितासि दण्ड्यः ॥४६॥

अन्वयः– हे लिपिपते! मधुमङ्गल! इह आगच्छ (ततः) दृढ-मतिः सन् पञ्जीं पठन् सत्य-लेखं कुरु। यदि उत्कोचलोभ-भरतः मे (मम) द्रव्याणि त्वं नाशयेः, तदा (अवश्यम्) दण्ड्यः (दण्डनीयः) भवितासि।

भावार्थः– स्पष्ट एवास्ति मधुमङ्गलस्तस्य सखैव लिपिपतिरस्ति। तं भङ्ग्या वक्ति—हे मधुमङ्गल लिपि-पते इहागत्य पञ्जीं शुल्कग्रहणपुस्तिकां पठन् सत्यलेखं (यथार्थशुल्क-ग्रहणलेखं) कुरु (विधेहि) तत्रैकहास्यबुद्ध्या एतदपि वक्ति। यदि त्वं राधिकात उत्कोचग्रहण-लोभभरेण मम द्रव्यहानिं कुर्याश्चेदवश्यं दण्डभाग् भवितासि ॥४६॥

समासादिः--अत्र परिहास्यं कुर्वन् श्रीकृष्णो मधुमङ्गलं मध्येकृत्य राधां व्यञ्जयति स्वभावम् । नास्मिन् पद्ये समासः । सारल्येन प्रसादो गुण एवास्तीति-दिक् ।। ४६ ।।

तथैव राधामपि समाह्वयति लेखादिकं सर्वं स्वानुष्ठेयमनुष्ठापयितुम्, तेनैव-च्छन्दसा--

आगच्छ कच्छमवधेहि लेखं
दानं नु देहि नहि धेहि कलिं हि राधे ! ।
वीटीं च भुङ्क्ष्व सरसं कुरु वक्त्र-बिम्बं
पुण्याहमाचर पुरः समयः शुभोऽयम् ।।४७।।

अन्वयः---भारतीय-शिष्टाचारानुसारं राधामपि समाह्वयति--हे राधे ! त्वमपि कच्छम (शुल्कशालाभ्यन्तरम्) आगच्छ अवधेहि (सावधाना भव) दानं नु देहि (तद्दत्तम्) इति लेखं च विधेहि (तद्विषये) कलिं न विधेहि । (अस्माभिर्दत्तां) वीटीं (ताम्बूलवीटिकां) भुङ्क्ष्व वक्त्र-विम्बं सरसं कुरु ? अयं शुभः समयः पुण्याहं (सङ्गमप्रारम्भ मुहूर्त्तम्) आचरेति परिहासमारब्धुं याचते ।

भावार्थः--स्पष्टो भावार्थः । लेखपतेराह्वानानन्तरं दातृकाया अपि समुपस्थितिरुचितैवेति राधिकाम् आह्वयति--हे राधे ! शुल्कशालाभ्यन्तरस्थानम्-आगच्छ । तत्रागत्य दानं देयं शुल्कं दत्त्वा (कियद्दत्तम् इति) तल्लेखं विधेहि । तद्विषये कलिं कलहं न विधेहि । (इयच्छुल्कं न दास्यामीत्यादि) (मद्दत्ताम् वीटीं ताम्बूल-वीटिकां च भुङ्क्ष्व मुखोष्ठविम्बं सरसं रागरञ्जितं कुरु, अयं शुभ-मुहूर्त्तकाल इति पुण्याहं सङ्गमप्रारम्भं समाचरेति परिहास्यं प्रारभते ।

समासादिः—समासादिशून्यं पद्यमतिस्फुटार्थकम् इति प्रसादगुणोऽत्र । **तल्लक्षणं यथा**--

चित्तंव्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसाद इति ख्यातो गुणः काव्यार्थदीपकः ।। ४७ ।।

अग्रेऽपि तथैव वक्ति स्वागता रथोद्धतोपजातया छन्दसा--

यस्य यन्नियतदानममुष्या
वस्तुनः सुदृढमुच्यते मया ।
तत्र दानमिह यत्प्रति यत्स्यात्
तत्तदेव किल लिख्यतां त्वया
यत्नतो लिखनशूर वयस्य ।।४८।।

अन्वयः-हे यत्नतो लिखन-शूर ! वयस्य ! अमुष्या यस्य वस्तुनः यत् प्रतिनियतं दानं तद् मया सुदृढम् उच्यते । यत्प्रति यत् स्यात् । तत् तदेव त्वया लिख्यताम् ।

भावार्थः—श्रीकृष्णो मधुमङ्गलं लेखपतिमेव पुनर्वक्ति—यद् हे लिखन-वीर ? वयस्य अमुष्या राधाया यस्य वस्तुनः यद्धि नियतं दानं (शुल्कं देयम् (अस्ति) तद् मया सुदृढं निश्चितम् उच्यते । तत्र यत् प्रति यद् दानमिह (उचितम् स्यात्) तम् प्रति तदेव त्वयापि लिख्यताम् । अन्यथा न स्यादिति भावः ।

समासादिः—हे लिखने शूर! लिखन-शूर इति ससासः । कुटस्य आदिः कुटादिरिति तत्पुरुषसमासे लिख-धातुरपि कुटादिर्भवतीति ल्युटि अपि न गुणोऽस्य 'गाङ्कुटादिभ्योऽञ्णिन्ङित्–१।२।१' इति ङित्वात् । यद्यपि, इन्द्रवज्रोपेन्द्रवज्रयोरेवोपजातेरुदाहरणमुपलभ्यते प्रायः काव्येषु, तथापि स्वतन्त्रकविनाऽमुना स्वागता-रथोद्धतयोरपि पादमिश्रणोपजातिरुक्ता पादवृद्धिरपि विहितैव । 'स्वागतेति रनभाद् गुरुयुग्मम् । रान्नराविह रथोद्धता लगौ ।' अत्र वार्तालङ्कारः, स्वभावोक्तिरिति नामान्तरम् ॥ ४८ ॥

सम्प्रति श्रीकृष्णो गव्यस्य दानविधिप्रकारं प्रतिपात्रं व्रजसुन्दरीणां प्रतिजजानुरूपमाख्याति वसन्ततिलकया—

गव्यस्य भव्यवदने प्रतिपात्रमत्र
दानं किल प्रतिजनं व्रजसुन्दरीणाम् ।
वृन्दानि पञ्च विलसन्नवहीरकाणां
यत् सौभगादिकमलभ्यमनेन लभ्यम् ॥ ४९ ॥

अन्वयः— हे भव्यवदने ! (राधिके !) अत्र दानं किल गव्यस्य प्रतिपात्रं विलसन्नवहीरकाणां पञ्चवृन्दानि, तत्र पतिजनं यदलभ्यं—सौभगादिकम्, तदनेन (लिपिपतिना) लभ्यम् ।

भावार्थः— हे सुन्दरमुखि ! राधिके ! अत्र दानं नाम गव्यद्रव्यस्य प्रतिपात्रम् एकैकसुवर्णकलसं प्रति विलसन्नव-हीरकाणां व्रजसुन्दरीणां यानि पञ्चवृन्दानि सन्ति, तत्र प्रतिजनं यद् अलभ्यम् अप्राप्यं सौभगादिकं विद्यते, तद्धि अनेन लिपिपतिना मधुमङ्गलेन लभ्यम् । तदेव युष्माभिः देयमस्तीति ।

समासादिः—पात्रं पात्रं प्रतीति वीप्सार्थेऽव्ययीभावः । तथैव जनं जनं प्रतीति विग्रहेऽपि ज्ञेयम् । विलसन्ति नवहीरकाणि यासां ताः, तासाम् । इति समासः । अनुप्रासः शाब्दोऽलङ्कारो माधुर्यं गुणः । युष्माकं सौभगादिप्रदानमेव शुल्कदानं दानं वेति व्यङ्ग्यम् । (यज्ञवस्तुग्रहणमपि अत्रैव शुल्क-शालास्थाने भवति स्मेति रीतिः स्फुटति ।।४९।।

सम्प्रति श्रीकृष्णो राधां सीमन्तविन्यस्तसीन्दूरधाराद्वयत आरभ्य आप्रपदीनं सर्वाङ्गं वर्णयितुमुपक्रमते—

सीमन्तकान्ति-विलसन्नवरागवल्गु-
सीन्दूरयोस्तपनकान्तमणीन्द्रलक्षम् ।
वेणीवरालककुलोज्ज्वल-कज्जलानां
गारुत्मतेन मणिमञ्जुललक्षयुग्मम् ।।५०।।

अन्वय:--अधुना सीमन्ते न्यस्ते सीन्दूरधारे द्विफालवद्धौ चिकुरौ लक्षयति-सीमन्तकान्तिविलसन्नवराग-वल्गु-सीन्दूरयो: तपनकान्तमणीन्द्रलक्षम् (अस्ति) वेणीवरालककुलोज्ज्वलकज्जलानां गारुत्मतेन मणि-मञ्जुललक्षयुग्ममस्ति ।

भावार्थ:--व्रजसुन्दर्य: सीमन्तके रेखाद्वयेन सीन्दूरे भूषयन्ति । मध्ये रिक्तमेव स्थानं त्यजन्ति । चिकुरा अपि पृथग् द्विधा विभक्ता कवरीबद्धा भवन्ति तासाम् । ते द्वे अपि वर्णयति-सीमन्तकस्य अन्ति=(अन्तिकं) पार्श्वद्वये विद्यमानयो: सीन्दुरयो: नवरागसुन्दरयो: सूर्यंकान्तमणीन्द्रलक्षम् । सुन्दरवेणीरूपयो: अलककुलयो: कज्जलानाम् इव स्थितयो: गारुत्मत एव ईनमणि:, अथवा गारुत्मतेन घटितो यो मणि: स एव मञ्जुललक्ष-युग्मम् । अर्थाद्वेणीरूपस्थितालकद्वयकज्जलानां गारुत्मतेन (नीलमणिना) सह श्रेष्ठ-मनोज्ञमणिद्वयलक्षम् अस्ति । राधाया: सीमन्तके धारा (रेखा) द्वये निबद्धे सीन्दूरे सूर्यकान्तमणिवद् राजत: । नीलं कबरीद्वयं नीलमञ्जुलमणिद्वयवद्राजत इति भाव: ।

समासादि:- सीमन्तकस्य अन्ति (अन्तिकम्) कच्युति:, तत्र विलसती वनरागौ इव वल्गुनी सीन्दूरे तयो: । अथवा सीमन्ते कान्त्या विलसती ये नवरागवल्गुनी सीन्दूरे तयो: । तपनकान्तश्चासौ मणीन्द्र: स एव लक्षं वेध्यम् (लक्षं स्यादपदेशेऽपि शख्येऽपि नपुंसकम्) वेणीवरे च ते अलककुले उज्ज्वलकज्जलानीव तानि, तेषाम् । गारुत्मतश्चासौ ईनमणि:, गारुत्मतेन सह मणिर्वा स एव मञ्जुललक्ष-युग्मम् इति मयूरव्यंसकादित्वाद् असमर्थेऽपि समास: । उपमारूपकयो: संसृष्टि: ।।५०।।

सम्प्रति भालं तदीयविशेषकञ्च वर्णयति—

स्वर्णार्द्ध चन्द्र-निभ-भाल-तलस्य शुभ्र-
शुभ्रांशुकान्त मणि-लक्षमतुच्छ-शोभम् ।
कस्तूरिकारचित-भाल-विशेषकस्य
गारुत्मतैर्घटित-चन्द्रमसोऽम्बुदानि ।।५१।।

अन्वय:—(तथैव ते) स्वर्णार्द्ध- (घटित) चन्द्रनिभ-भालतलस्य शुभ्र-शुभ्रांशुकान्तमणिलक्षम्, यच्च अतुच्छशोभं भासते । एवं कस्तूरिकारचितविशेषकस्य गारुत्मतैर्घटितचन्द्रमस: अम्बुदानि लक्षम् ।

भावार्थः—इदानीं राधाया भालं तत्र विन्यस्तं विशेषकं च वर्णयति—सुवर्ण-फलकस्य अर्द्धभागेन निर्मितस्य चन्द्रस्य अर्द्धभागसदृशस्य श्रीराधाभालस्य स्वच्छशशिकान्तमणिरेवलक्षम्। तथा तत्र भाले विन्यस्तस्य कस्तूरिकारचितस्य विशेषकस्य तिलकस्य गारुत्मतैः नीलमणिभिः घटितस्य चन्द्रस्य अम्बुदानि मेघाः लक्षं शरव्यं ज्ञेयमिति।

समासादिः—स्वर्णस्य अर्द्धः स चासौ चन्द्रः, तेन निभा यस्य तत्। तच्च तद् भालतलं तस्य इति स्वर्णार्द्धचन्द्रनिभभालतलस्य। शुभ्रश्चासौ शुभांशुकान्त-मणिः इति कर्मधारयः। शुभ्राः अंशवो यस्य सः तस्य कान्तः प्रियश्चा सौमणिः, इति शुभ्रांशुकान्तमणिशब्दमात्रे समासो ज्ञेयः। तुच्छा शोभा यस्य तत् तुच्छशोभम्, न तुच्छशोभम् अतुच्छशोभम्। इति बहुव्रीहेरनन्तरं नञ्। नञुत्तरेऽपि बहुव्रीहिः सम्भवत्येव। भाले विशेषकम्। कस्तूरिकया रचितम्, तच्च तद्विशेषकम्, तस्येति समासः॥५१॥

अधुना भ्रूयुग्मं कर्णयुग्मं च वर्णयति—

भ्रूयुग्मकस्य कुटिलस्य शरासनानि
सन्नील-रत्न-रचितान्ययुतानि पञ्च।
कर्णद्वयस्य रुचिरस्यमनोज्ञ-नव्य-
वैडूर्य-मौर्व-दृढ-सद्गुण-पुञ्ज-पुञ्जाः॥५२॥

अन्वयः—कुटिलस्य भ्रूयुग्मकस्य सन्नील-रत्न-रचितानि पञ्च अयुतानि-शरासनानि लक्षम् (अस्ति) रुचिरस्य कर्णद्वयस्य मनोज्ञ-नव्य-वैडूर्य-मौर्व-दृढ-सद्-गुणपुञ्ज-पुञ्जाः लक्षम् अक्षम् (आस्त) इत्यन्वयः॥५२॥

भावार्थः–राधायाः कुटिलस्य तिर्यक् स्थितस्य भ्रूयुगस्य सन्नीलरत्नेन रचितानि निर्मितानि पश्च अयुतानि अयुतसंख्यानि (पश्चाशदिति यावत्) शरासनानि-धनूंषि लक्षम्, तस्याः रुचिरस्य सुन्दरस्य कर्णद्वयस्य श्रोत्रयुगलस्य मनोज्ञेन नव्येन वैडूर्येण निर्मिताय मौर्वा दृढाः सद्गुणाः, तेषां पुञ्ज-पुञ्जाः लक्षं शरव्यं वेध्यम् इत्यर्थः (परिहासहेतुत्वात् सादृश्यस्थाने लक्षशब्दप्रयोगः) धनुषः प्रत्यश्चाद्वयं पुञ्जी-कृत्य उभयोः धनुष्कोणयोः स्थाप्यते। इति सम्प्रदायः।

समासादिः--सन्ति च तानि नीलरत्नानि तैः रचितानि। मनोज्ञं च तद् नव्यं वैडूर्यम्, तस्य मौर्वाः दृढाश्च ते सद्गुणास्तेषां पुञ्ज-पुञ्जाः। पुञ्जद्वयं भवति यद्धि धनुष्कोणद्वये पृथग् एकैकं स्थाप्यते, इति कर्ण-सादृश्यं साधु सङ्ग-च्छते॥५२॥

सम्प्रति कटाक्षान् अक्षियुगं च तस्या वर्णयति–

कामं कटाक्ष-विशिखस्य सुपर्ण-रत्न–
सन्निर्मितास्त्रिदशलक्षशराः सुतीक्ष्णोः ।
अक्ष्णोर्युगस्य सुभगस्य मसार-सार–
नीलोत्पलानि नियुता नियुतानिगन्धैः ॥५३॥

अन्वयः––(तस्याः राधिकायाः) कटाक्ष-विशिखस्य कामं सुपर्ण-रत्न-सन्निर्मिताः त्रिदश-लक्ष-शराः लक्षम् । सुभगस्य सुतीक्ष्णोः अक्ष्णोः युगस्य गन्धैः युतानि नियुतानि मसार-सार-नीलोत्पलानि लक्षम् ।

भावार्थः––राधिकायाः कटाक्ष-विशिखस्य कटाक्षवाणस्य कामं यथेच्छं गारुत्मत-(नील-रत्न)सुनिर्मिताः त्रयोदशलक्षसंख्यका वाणा लक्षं वेध्यं भवति । राधिकाकटाक्षाः त्रयोदशलक्षसंख्यकवाणसादृश्यं विभ्रतीति भावः । सुन्दरस्य सुतीक्ष्णोः (सुतीक्षन्-शब्दोऽत्र) सुतीग्मयोः अक्ष्णोः नेत्रयोः युगस्य मसार-सारवद् इन्द्रनील-सारवद् यानि गन्धैः युतानि नियुतानि नीलोत्पलानि तानि लक्षं वेध्यं शख्यमित्यर्थः । एवमियं राधिकेति श्रीकृष्णाभिप्रायः ।

समासादिः––सुपर्णानि च तानि रत्नानि, तैः सन्निर्मिताः । त्रयश्च दश च = त्रिदश, त्रिदश च लक्षं च = त्रिदश-लक्षम् । त्रिदशलक्षं च ते शराः, तथोक्ता अवसाने कर्मधारयो द्वन्द्वगर्भः । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येय-संख्ययोः' इत्यमरः । इत्यत एव लक्षशब्दे एकत्वम् । (मसार इन्द्रनील इति पर्यायशब्दौ) ॥५३॥

सम्प्रति नासिकां कपोलौ च वर्णयति–

कार्त-स्वरैर्घटित-कीरकिशोर-चञ्चु-
पुञ्जः प्रकृष्ट-तिल-पुष्प-सुनासिकायाः ।
सद्गण्डयोर्मधुरकाञ्चन-दर्पणानां
वृन्दं नव-स्फटिकतोऽप्यतिचिक्कणानाम् ॥५४॥

अन्वयः–(राधिकायाः) प्रकृष्ट-तिल-पुष्प-सुनासिकायाः कार्त-स्वरैः घटित-कीर-किशोर चञ्चुपुञ्जः लक्षम् । सद्गण्डयोः नव-स्फटिकतोऽपि अति-चिक्कणानां मधुर-काञ्चन-दर्पणानां वृन्दं लक्षम् (वेध्यम्) ।

भावार्थः––प्रकृष्ट-तिल-पुष्पवदतिसुन्दर्या राधिकानासिकायाः कार्त-स्वरैः सुवर्णैः निर्मितानां शुकशिशुचञ्चुपुटानां पुञ्जः लक्षम् । तदीयकपोलयोश्च नूतन-स्फटिक-मणितोऽपि अति-चिक्कणानां मधुर-काञ्चनघटितमुकुटवृन्दं लक्षम् । गण्डस्थलद्वयं तदीयम् अतिकोमलस्वर्णमुकुटवृन्दं धिक्करोतीति भावः । स्फटिकादपि अतिस्वच्छं प्रतिविम्बग्राहि तदीयं गण्डस्थलमिति यावत् ।

समासादिः—प्रकृष्टं च तत् तिलपुष्पम् (तद्वत्) यत्सदृशी नासिकेति शाकवार्थिवादित्वात् समासः, तस्याः । घटिताश्च ते कीरकिशोरचञ्चवः, तेषां

पुञ्जः । उपमालङ्कारः सादृश्यं । व्यङ्ग्यमिति सर्वत्रैव ध्वनिकाव्यमस्मिन् राधिका-सर्वाङ्गवर्णनप्रसङ्गे ।।५४।।

सम्प्रति मुखस्य चिबुकस्य च वर्णनं विदधाति—

सर्वोपमामहिम-मर्दि-मुखस्य पूर्ण-
शुभ्रांशु-लक्षमथफुल्ल-सरोज-लक्षम् ।
उद्दाम-धाम-मणि-दर्पण-लक्षमत्र
सौवर्णमेव चिबुकस्य च रत्न-पुञ्जाः ।।५५।।

अन्वयः—राधायाः सर्वोपमा-महिम-मर्दिमुखस्य **पूर्ण-शुभ्रांशुलक्षम् । अथ** फुल्ल-सरोज-लक्षम् । अत्र सौवर्णम् उद्दामधाम-मणिदर्पणलक्षम् । **चिबुकस्य च रत्न-**पुञ्जाः लक्षम् ।

भावार्थः—स सर्वोपमामहिम-मर्दिनः राधामुखस्य पूर्णचन्द्रो लक्षम् । अथ फुल्लं सरोजं लक्षम् । तथात्र सौवर्णम् उत्कृष्टतेजस्वि-मणि-दर्पणं लक्षम् । राधा-चिबुकस्य रत्न-वृन्दं लक्षम् ।

समासादिः—सर्वाश्च ता उपमाः, तासां महिमा तस्य मर्दि च तद् मुखं तस्य तथोक्तस्य । शुभ्रा अंशवो यस्य सः । फुल्लं च तत् सरोजम्, तदेव लक्षम् । उद्दामधाम यस्य तत्, मणि-दर्पम् एव लक्षम् । रत्नानां पुञ्जा इति । अत्रोदात्ता-लङ्कारः ।

लोकातिशयसम्पत्ति-वर्णनोदात्तमुच्यते ।
यद्यपि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ।। (१०।९४)

अत्र सर्वत्रैव प्रायोऽयमेवालङ्कारो ध्वन्याद्यभावस्थले ।।५५।।

सम्प्रति अधरबिम्बं दन्तावलीं च स्तौति—

विम्बाधरस्य मधुरस्य सुराग-पद्म-
रागैकपद्ममिह सद्मपर-प्रभायाः ।
सम्पक्व-दाडिमफलोज्ज्वल-वीजनिन्दि-
दन्तावलेः शिखरलक्षमदृष्टकक्षम् ।।५६।।

अन्वयः—राधाया मधुरस्य विम्बाधरस्य वर-प्रभायाः सद्म पद्मरागैकपद्मम् इह लक्षम् । सम्पक्व-दाडिम-फलोज्ज्वलवीज-निन्दि (दन्तवृन्दम्) दन्तावलेः अदृष्ट-कक्षं शिखर-लक्षम् ।

भावार्थः—राधिकायाः अधरविम्बं यन्मधुरमस्ति । तस्य लक्षम् विधते सुन्दर-प्रभायाः गृहम्, पद्मरागमणि-प्रधानं कमलमेव । तस्याः दन्तावली तु पूर्णपक्वदाडिम, फलस्य स्वच्छ बीजमपि निन्दति । तस्य दन्तावलेः अदृष्टकक्षं शिखरमेव लक्षम् ।

फलतो—राधिकादन्ताः दाडिम-फलबीज-तुल्यास्तथा अदृष्टकक्षं शिखरं लक्षं तेषामिति भावः, दन्तानां महत्त्ववर्णनम् । इदमिह कवेरभीष्टम् ।।५६।।

समासादिः—सुष्ठु रागो यस्य सः । सुरागश्चासौ पद्मरागः (मणिः) स एकं प्रधानं पद्मम् = सुरागपद्मरागैकपद्मम् । सम्पक्वं च तद् दाडिमफलम् । तस्य उज्ज्वलबीजम्, तस्य निन्दि दन्तवृन्दमिति विशेषणप्राधान्याल्लभ्यते । अदृष्टा कक्षा यस्य तत् । शिखरमेव लक्षम्, तत् । 'दन्ती दन्तावलोद्विपः' इत्यमरः ।

इदानीं राधिकाचिबुकस्थितं कस्तूरिकाबिन्दुं वर्णयति शार्दूलविक्रीडितेन—

योऽयं त्वद्वदनारविन्दचिबुके कस्तूरिकाकल्पितः
सम्यक् सुन्दर-बिन्दुरिन्दुवदने निःशृङ्ग-भृङ्गोमतः ।
सस्मेरां मम दृङ्मिलन्मधुकरीमालिङ्गतु प्रेमतः
सत्यं दानमिदं परं नहि परं किञ्चिन्मया याच्यते ।।५७।।

अन्वयः—हे इन्दुवदने ! (राधे !) त्वद्वदनारविन्द–चिबुके कस्तूरिकाकल्पितः स हि सम्यक् सुन्दबिन्दुः योऽयं निःशृङ्गः भृङ्गः मतः (कथितः) स हि प्रेमतः मम दृङ्मिलन्मधुकरीम् आलिङ्गतु ।

भावार्थः - राधाचिबुकस्थितं कस्तूरिकाविन्दुम् निःशृङ्गं भृङ्गं कल्पयित्वा स्वीयां दृशं मिलन्मधुकरीं च कल्पयित्वा तयोः परस्परमालिङ्गनं कल्पयति । त्वच्चिबुकस्थितः निःशृङ्ग-भृङ्गरूपः कस्तूरिकाविन्दुः मिलन्मधुकरीं रूपां मे दृशं प्रेमत आलिङ्गतु त्वां सर्वदा पश्यामि । एतद्धि सत्यं दानम् । नाहमितोऽन्यद्दानं त्वत्तः कामये । त्वं मां वृणुष्वेति गूढं व्यङ्गयम् । ध्वनि-काव्यमिदमिति भावः ।

समासादिः—तव वदनारविन्दम् त्वद्वदनारविन्दम् तस्य चिबुकं तस्मिन् । कस्तूरिकया कल्पित इति तृतीयातत्पुरुषः । निर्गतं शृङ्गं यस्य सः । मिलन्ती चासौ मधुकरी सा । दृग् एव मिलन्मधुकरी सा ताम् । अत्र रूपकातिशयोक्त्याद्यलङ्कारजन्यो ध्वनिरित्युत्तमकाव्यम् । 'इदमुत्तममतिशयिनि व्यङ्गये वाच्याद् ध्वनिः बुधैः कथित' इति मम्मटाचार्याः ।।५७।।

अधुना राधारसनारामणीयत्वं वर्णयति वसन्ततिलकया—

गानामृताब्धि-परिवेषण-दक्षदर्वी-
दिव्याति-रक्त-रसना-रमणीयतायाः ।
कर्पूर-सार-परिवासित-नव्य-हृद्य-
माध्वीक-पूर्ण-चषकावलिरद्य सद्यः ।।५८।।

सभावार्थोऽन्वयः—अन्वयस्तु भावार्थ एवाभिधीयते—गानरूपाब्धेः परिवेषणे दक्ष-दर्वीरूपाया दिव्याया अतिरक्ताया रसनाया रमणीयत्वस्य अद्य सद्यः कर्पूर-

सारेण परिवासितम्। नव्यहृद्य-माध्वीकम्, तेन पूर्णा चषलावलिः लक्षम्। इति सान्वयः भावार्थः। हृद्यमाध्वीकपूर्णचषकावलीवदमृतवर्षिण्या राधिकारसनाया रमणीयतेति भावः।

समासादिः—गानान्येव अमृतानि तेषाम् अब्धिस्तस्य परिवेषणम्, तस्मिन् दक्षा चासौ दर्वी एव दिव्या अविरक्ता चासौ रसना तस्या रमणीयता, तस्या इति। कर्पूरस्य सारः, तेन परिवासितं यद् नव्यं हृद्यं माध्वीकं तेन पूर्णा चासौ चषकावलिरिति। राधिकावाणी अमृताब्धि वर्षति। तदग्रे हृद्यमाध्वीकं कर्पूर-सुगन्धि अपि तुच्छमिति व्यङ्ग्यम् ॥५८॥

सम्प्रति राधिकास्मितं तदीयं जल्पनं च वर्णयति—

फुल्लीभवत्स्मितलवस्य सुतार-मञ्जु-
मुक्ताफलैर्विहित-कैरव-कोटिरद्धा ।
पीयूष-सार-परिपूरितशातकुम्भ-
कुम्भायुतं मसृण-मञ्जुल-जल्पितस्य ॥५९॥

अन्वयः—राधा-स्मितं प्रथमं वर्णयति-फुल्लीभवत्स्मितलवस्य अद्धा (सत्यम्) सुतार-मञ्जु-मुक्ताफलैः विहित-कैरव-कोटिः लक्षम्। मसृण-मञ्जु-जल्पितस्य पीयूष-सारपरिपूरित-शातकुम्भ-कुम्भायुतंलक्षम्।

भावार्थः—राधासम्बन्धिनः पुष्पितस्य स्मितलेशस्य सुतारैः मञ्जुभिः मुक्ता-फलैः विहितानि कैरवाणि तेषां कोटिः लक्षम् इति सत्यं वचः। तथा तदीयस्य मसृणमञ्जुनः=चिक्कणमन्तज्ञस्य जल्पितस्य वचसः अमृतसारसम्भृतस्वर्णकुम्भा-युतं लक्षं। इति तात्पर्यम्।

समासादिः—फुल्लीभवत् च तत् स्मितम्, तस्य लवस्तस्य। सुताराणि च तानि भञ्जनि मुक्ताफलानि तैः। विहितानि च तानि कैरवाणि तेषां कोटिः। पीयूष-सारैः परिपूरिताभ्यते शातकुम्भ-कुम्भाः, तेषामयुतम् ॥५९॥

सम्प्रति ताटङ्के नासाभूषणं च वर्णयति—

शब्द-ग्रहोच्छलित-सुन्दरशातकुम्भ-
ताटङ्कयो र्मसृण-चुम्बक-रत्नमेकम् ।
नासाग्र-रत्न-नव-काञ्चन-तन्तु-बद्ध-
मुक्ताफलस्य रुचिविस्फुरिताङ्कमालाः ॥ ६० ॥

अन्वयः— शब्दग्रहोच्छलित-सुन्दर-शात-कुम्भ-ताटङ्कयोः एकं मसृण-चुम्बक-रत्नं लक्षम्। नासाग्र-रत्न-नवकाञ्चन-तन्तुबद्ध-मुक्ताफलस्य रुचि-विस्फुरिताङ्कमालाः लक्षम्।

भावार्थः-- कर्णयोः देदीप्यमानयोः सुन्दरयोः सुवर्णनिर्मितयोः ताटङ्क-नाम्नो राधाभूषणयोः एकं प्रधानं मसृणचुम्बकं नाम रत्नं लक्षम् । नासाग्र-रत्नभूषणे नवकाञ्चनतन्तुबद्धस्य मुक्ताफलकलापस्य विस्फुरिता देदीप्यमाना अङ्कस्रजो लक्षम् ।

समासादिः– शब्दं गृह्णीतः । शब्दग्रहौ कर्णौ तयोः, उच्छलिते च ते सुन्दरे शातकुम्भस्य ताटङ्के तयोः । मसृणं च तत् चुम्बकरत्नम् इति । नासाग्रे रत्नं तस्मिन् नवश्चासौ काञ्चनतन्तुः, तेन बद्धं च तद् मुक्ताफलम्, तस्येति ॥ ६० ॥

राधा ताम्बूलचर्वणं वीक्ष्य मामपि ताम्बूलं चर्वयेति तां प्रेरयति मालिनी-छन्दसा—

सुरभिवदनरङ्गे मुग्धगन्धं यदा ते
स्फुरितमृदुलचालं चारुताम्बूलमुत्कम् ।
नटति ललित-रङ्गैस्तस्य दानं तदानीं
नटनभुवि मदास्येऽप्याशु तं नर्तयेति ॥ ६१ ॥

अन्वयः- हे राधे ! यदा ते सुरभि-वदन-रङ्गे मुग्धगन्धमुत्कं चारु ताम्बूलं स्फुरित-मृदुल-चालं (यथा स्यात्तथा) ललित-रङ्गैः नटति । तदानीं मदास्येऽपि नटन भुवि तं नर्तय, इति तस्य दानम् (तेऽसमुचितम्) ।

भावार्थः--सम्प्रति व्यङ्ग्य-मर्यादया पतिपत्न्योः (दम्पत्योरित्यर्थः) समं ताम्बूलभक्षणं समुचितं त्वमेकाकिनी कथं चर्वसि ? इत्युपालभते--हे राधे ! यदा त्वं सुरभि—(सुगन्धि) वदनरङ्गे मुग्धगन्धम् उत्कम् उत्कण्ठितं चारु ताम्बूलं स्फुरितमृदुल–चालं ललिततरङ्गैः नटयसि तदानीं मदास्ये मन्मुखे अपि नटन स्थाने तं नर्तयेति तस्य दानं कथं न करोषि । इति तु तेऽनुचितं कर्मेति उपालम्भः ।

समासादिः -- सुरभि च तद्वदनं तदेव रङ्गं तस्मिन् । मुग्धो गन्धो यस्य तत् । स्फुरितं मृदु चालं यस्मिन् तद् यथा तथेति क्रिया विशेषणम् । चारु च तत् ताम्बूलम्, ललितानि च तानि रङ्गाणि तैः । मम आस्यं मदास्यं तस्मिन् । इति ॥ ६१ ॥

अधुना कण्ठ-भुजद्वय-करद्वयानां वसन्ततिलकया वर्णनं विदधाति—

कम्बुश्रिया कति-कण्ठवरस्य हेम–
शंखावलिर्वलित-वल्गु-भुजद्वयस्य
स्वर्णोल्लसन्मसृणमञ्जुमृणालपालि–
वैडूर्यपङ्कजततिः करयोर्द्वयोश्च ॥ ६२ ॥

अन्वयः—कम्बुश्रिया कलितकण्ठवरस्य हेमशंखावलिः लक्षम्। वलित-वल्गु-भुजद्वयस्य स्वर्णोल्लसन्मसृण-मृणालपालिः लक्षम्। करयोर्द्वयोश्च वैडूर्य-पङ्कज-ततिः लक्षम्।

भावार्थः—वलितौ वल्गू च तौ भुजौ तयोर्द्वयं तस्य कलितकण्ठवरस्य राधेयस्य हेम-शंखावलिः लक्षम्। स्वर्णघटित-दीप्तचिक्कण-मनोज्ञमृणालकोणयुग्मं लक्षम्। शंखश्रिया द्वयोः करयोः वैडूर्यमणिनिर्मितकमल-सङ्घातं लक्षम्। स्पष्टो हि पद्यार्थः। कण्ठस्य सुवर्णशंखेन भुजयोः स्वर्णनिर्मितमृणालयुग्मेन करद्वयस्य वैडूर्य-मणिघटित-पङ्कजसङ्घादसाम्योत्कर्षसूचने तात्पर्यम्।

समासादिः—कलितश्चासौ कण्ठवरस्तस्य, हेम्नः शंखास्तेषाम् अवलिः। वलितौ च तौ वल्गू भुजौ तयोर्द्वयं तस्य। स्वर्णस्य उल्लसती मसृणेमञ्जुनी च ते मृणाले तयोः पालिः कोणः। 'कोणस्तु स्त्रियः पाल्यश्रिकोटयः' इत्यमरः ॥६२॥

सम्प्रति कराङ्गुलि-पृष्ठ-पट्टिके वर्णयति—

हस्ताङ्गुलीसमुदयस्य मनोहरस्य
गन्धोन्नताः कनकबन्धुरगन्धफल्यः।
पृष्ठ-स्थली-पुरट-सुन्दर-पट्टिकायाः
कुञ्जे प्रसून-शयने स्वपनादिकेलिः ॥ ६३ ॥

अन्वयः—मनोहरस्य हस्ताङ्गुली-समुदयस्य गन्धोन्नताः कनकबन्धुर-गन्ध-फल्यः लक्षम्। पृष्ठ-स्थली-पुरट-सुन्दर-पट्टिकायाः कुञ्जे प्रसून-शयने स्वपनादि-केलिः लक्षम्।

भावार्थः—राधिकाया अङ्गुलीसमुदयो मनोहरोऽस्ति। स च गन्धोन्नताः कनकस्य सुवर्णस्य गन्धफल्यो गन्धौषधयो या उद्भवन्ति, ताः लक्षयति। राधिकायाः पृष्ठ-स्थली-पुरट-सुन्दर-पट्टिका हि कुञ्जे लतादिपिहितोदरे पुष्पशयने स्वप्नादि-क्रीडां लक्षयतीति भावः।

समासादिः—अङ्गुलीनां समुदयः। अङ्गुलयश्च हस्तस्येति तत्पुरुषः। गन्धैः उन्नताः कनकस्य बन्धुराः गन्धसहिताः फल्यः इति शाकपार्थिवादित्वात् समासः। पृष्ठस्थल्याः पुरटो मञ्जूषा इव सुन्दरीपट्टिका तस्याः। इति कर्मधारयगर्भस्तत्पुरुषः। स्वप्नम् आदि यस्याः सा चासौ केलिः इति। 'निकुञ्जकुञ्जौ वा क्लीबे लतादि-पिहितोदरे' इत्यमरः ॥ ६३ ॥

अधुना साक्षात् श्रीकृष्णः राधिकां सम्बोधयति—

मत्त-द्विपेन्द्र-मद-गन्धित-कुम्भ-युग्म-
गर्व-प्रहारि-कुच-कुम्भ-युगस्य तस्य ।
हैमानि मञ्जुमुखि ! दाडिम-विल्व-ताल-
सद्धाम-निस्तुल-ललाम-फलानि लक्षम् ॥ ६४ ॥

अन्वयः--श्रीकृष्णः कथयति—हे मञ्जुमुखि ! (राधे !) (तव) तस्य (प्रसिद्धस्य) मत्त-द्विपेन्द्र-मद-गन्धितकुम्भ-युग्म-गर्व-प्रहारि-कुच-युगस्य हैमानि दाडिम-विल्वताल-सद्धाम-निस्तुल-ललाम-फलानि लक्षम् अस्ति ।

भावार्थः—अन्वये हि अर्थोऽपि व्यक्त एवेति किञ्चिदुच्यते—हे मञ्जुमुखि ! राधे ! तव कुचयुगं मदमत्तगजेन्द्रस्य मद-गर्विकुम्भमपि प्रहरति । तथा हैमानि स्वर्णनिर्मितानि निस्तुलानि सद्धामजानि अतिसुन्दराण्यपि दाडिम-विल्व-ताल-फलान्यपि लक्षयति स्ववेध्यं करोति । इत्थं दृढं ते कुचयुग्मं मयैव मर्दनीयमिति गूढं व्यङ्ग्यम् ।

समासादिः--मञ्जु मुखं यस्याः सा तत्सम्बुद्धौ हे मञ्जुमुखि ! 'स्वाङ्गाच्चोपसर्जनाद संयोगोपधात् ४।१।५४' इति ङीष् । मत्तश्चासौ द्विपेन्द्रः, तस्य मद-गन्धितं यत् कुम्भयुग्मं तस्य गर्वः, तस्य प्रहारि यत् कुचकुम्भयुगं तस्य । सद्धाम येषां तानि, नास्ति तुला येषां तानि, दाडिम-विल्वतालानां सद्धाम-निस्तुल-ललामानि च तानि फलानि, इत्येवं समासः । असम्बन्धे सम्बन्धकल्पनात्मिकातिशयोक्तिरलङ्कारः ॥ ६४ ॥

अधुना राधाया मध्यभागं व्यङ्ग्यभङ्ग्या वर्णयति शार्दूलविक्रीडितेनच्छन्दसा—

मध्यं केशरिवर्यमध्यमिव यज्ज्यायो रसस्यास्पदं
वाद्यत्किङ्किणिरक्तवस्त्रविलसद् बद्धं वलीडोरकैः ।
तस्याप्युत्कटदानमप्युरुनृपाद् यत्नैर्मया गोप्यते
यद्यादौ तव नीविबन्धनमणिं गूढं करे मेऽर्पय ॥ ६५ ॥

अन्वयः—हे राधे ! तव मध्यं यद् ज्यायो रसस्य आस्पदं केशरि-वर्यमध्यम् इव (सुन्दरम्) वलीडोरकैः बद्धम्, वाद्यत्किङ्किणि-रक्त-वस्त्र-विलसद् (अस्ति) तस्यापि उत्कटदानं मया यत्नैः उरुनृपाद् गोप्यते । यदि त्वम् आदौ (एव) तव नीवि-बन्धन-मणिं मे करे अर्पय चेत् ।

भावार्थः—अत्र श्रीकृष्णः स्वीयं मुख्यमुद्देश्यं व्यङ्ग्य-भङ्ग्या व्यनक्ति । यद् हे राधे ! मध्यं तनुमध्यभागः । यद् ज्यायसो रसस्य आस्पदं स्थानं, केशरिवर्यस्य मध्य-भाग इव सुन्दरम्, वलीडोरकैः बद्धम्, वाद्यत्किङ्किणिक-रक्त-वस्त्र-वेष्टितं शोभमानमस्ति । तस्यापि हठाद् दानं यदि उरुः बली राजा इच्छेत्, तदा मया

अवश्यं विविधैर्यत्नैः गोप्यते रक्ष्यते। यदि त्वम् आदौ प्रथममेव तव नीवि-बन्धनमणिं मे मम करे हस्ते गूढं यथा स्यात्तथा अर्पय दद्याश्चेदिति।

समासादिः—केशरिवर्यस्य मध्यम्। ज्यायान् चासौ रसस्तस्यः। वाद्यन्ती किङ्किणिर्यस्मिन् तत्, तच्च तद्रक्तवस्त्रम्, तस्मिन् बिलसदिति। नीव्या बन्धनं तस्य मणिः तम्। इति गूढं व्यङ्ग्यमत्र व्यज्यत इति ध्वनिकाव्यम् ॥६५॥

इदानीं नीविदानं व्यङ्ग्यभङ्ग्या वर्णयति शिखरिण्या—

इयं नीवी राधे ! निज-निविड-बन्धं दवयितुं
भवद् भीत्या भङ्ग्या मयि वितनुते याचन-विधिम्।
तथान्तस्तूर्णं तं दवय मदनेन्दूदयकृते
यथाऽसौ तुष्टया ते करमुरुकटौ नो रचयति॥ ६६॥

अन्वयः—अत्र श्रीकृष्णः साक्षाद् राधां सम्बोधयति—अयि राधे! इयं (तव) नीवी निज-निविड बन्धं दवयितुं भवद् भीत्या भङ्ग्या मयि याचन-विधिम् वितनुते। (त्वं च) तं बन्धं मदनेन्दूदयकृते तूर्णं तथा अन्तः दवय यथा असौ (बन्धः) तुष्टया ते करं नः (अस्माकम्) उरु कटौ रचयति स्थापयति (यथा मामालिङ्गसि त्वमिति तात्पर्यं व्यङ्ग्यम्)।

भावार्थः—अत्रापि स्पष्टं स्वाभिप्रायं व्यनक्ति श्रीकृष्णः—हे राधे! इयं तव नीवी स्वदृढबन्धं दवयितुं दूरीकर्तुं मां याचते। यतः त्वत्तो बिभेति। अतस्त्वां न याचते। अहं कथयामि—त्वां त्वं हि तूर्णं मदनेन्दूदयकृते झटिति तं बन्धं तथा दवय दूरीकुरु यथा (यतः) तुष्टः असौ बन्धः तव करम् हस्तम् नः अस्माकम् उरुकटौ बृहत्कटिप्रदेशे रचयति प्रापयति। फलतः त्वं माम् आलिङ्गसि। इति गूढं व्यङ्ग्यमत्रालिङ्गनमित्युत्तमं काव्यम्।

समासादिः—निजश्चासौ निविडः (दृढः) बन्धः स तम्। याचनस्य विधिः तम्। मदनश्चासौ इन्दुः सः तस्य उदयस्तस्य कृते। अत्राप्यालिङ्गनं गूढं व्यङ्ग्य-मिति सर्वोत्तमं ध्वनिकाव्यम्॥ ६६॥

नाभिह्लदोत्थरोमराजिव्यालीशिरस्थकुचद्वयोष्ठविम्बद्वयैकनासा नेत्र-द्वयकर्ण-द्वयात्मकनवनायकानां प्रसिद्धानि नवरत्नानि लक्षम् इति विवृणोति पुरःस्थपद्येन—

नाभि ह्लदस्थित-) (स्फुरद्-ह्लद) तदुत्थित-रोमपाली-
व्यालीशिरस्फुरित-रत्न-सुनायकानाम्
वैडूर्य-मञ्जुलमसार-वराब्जराग-
रत्नानि तानि नियतानि नव क्रमेण॥ ६७॥

अन्वयः—नाभि-स्फुरद्-ह्लद-तदुत्थित-रोम-पाली-व्याली-शिरःस्फुरित-रत्न-सुना-यकानां वैडूर्यमञ्जुल-मसारवराब्जरागरत्नानि क्रमेण नवतानि लक्षम् अस्तीति।

भावार्थः— नाभि-रूप-स्फुरद्ह्लदाद् उत्थिता या रोमपालीरूपा व्याली = सर्पिणी तस्याः शिरसि स्फुरितानां—रत्न-सुनायकानां रत्नश्रेष्ठानां कुचकुम्भद्वयोष्ठविम्बद्वयैकनासिकानेत्रद्वयकर्णद्वयरूपरत्न नवकानां वैडूर्य-मञ्जुलमसार-वराब्जरागवद् रत्नानि क्रमेण नव तानि प्रसिद्धानि नियतानि—

'महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।

मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नवः ।। इति लक्षयस्ति ।

सामासादिः—नाभिः एव स्फुरन् ह्लदः तदुत्थिता रोमपाली एव व्याली तस्याः शिरस्तस्मिन् स्फुरितानि च तानि रत्न-सुनायकानि तेषाम् । वैडूर्याणि मञ्जुलानि मसाराणि च वराब्जानीव रागो येषां तानि रत्नानि क्रमेण नव प्रसिद्धानि उपयुक्तानीति अद्‌भुतवस्तुवर्णनमुदात्तालङ्कारः । लक्षणमुक्तं (५५) पञ्चपञ्चाशत्तमे पद्ये ।। ६७ ।।

सम्प्रति नितम्बपीठार्बुदानि वर्णयति –

सन्नील-पट्टपटरञ्जकमञ्जु काञ्ची–
सञ्चारि-चारु-चटुलोच्चनितम्बकस्य ।
संप्रोल्लसत्पुरटपीठनवार्बुदानि
दानीन्द्रकस्य मम योग्य-वरासनानि ।। ६८ ।।

अन्वयः—अनुक्रमादेवान्वयोऽस्तीति भावार्थो विविच्यते—

श्रीकृष्णः कथयति—यद् दानिनां प्रियस्य इन्द्रकस्य इन्द्रशब्दात् प्रियार्थे कन् प्रत्ययः । मम (श्रीकृष्णस्य) राधिकायाः सद् अधोविद्यमानं नीलपट्टम् तस्य पटः, तदुपरि परिहितः शाटकपटः, तस्य रञ्जिका या मञ्जुः मनोज्ञा काञ्ची तां सञ्चारयति स्वोपरि इति सञ्चारीं चारुः सुन्दरः चटुलः लोक्षकः उच्चः पृथुलो यो नितम्बकस्तस्य उपरि सम्प्रोलसन्ति पुरटपीठवत् ताम्बूलकरण्डवद् नवार्बुदानि परुषपृष्ठस्थलानि योग्य वरासनानि उपयुक्त–श्रेष्ठासनानि सन्तीति संक्षिप्तो भावार्थः । फलतो राधिका नितम्बादि दृढप्रदेशा एव योग्यासनानि मम सम्मतानीति भावः ।

समासादिः—सच्च तद् नीलपट्टं तस्य पटस्तस्य रञ्जिका चासौ मञ्जुः काञ्ची तस्याः सञ्चारी सञ्चारकः चासौ चारुः चटुलः उच्चः चासौ नितम्बकः, तस्येति । सम्प्रोल्लसन्ति च तानि पुरटपीठ-नवार्बुदानि (पुरटपीठानीव नवार्बुदानि परुषमांसकीलानि) पृष्ठस्थलानीत्यर्थः । इत्येवं समासप्रकारः । 'अर्बुदो मांसकीले स्यात् परुषे दशकोटिषु' (इति मेदिनी) ।।६८।।

अधुनोरुद्वयं चरणद्वयं चैकपद्येनैव विवृणोति—

उरुद्वयस्य कनकैः कृत-चारु-रम्भा-
स्तम्भावलिर्दलित-सत्करभ-प्रभस्य ।
मञ्जीर-मञ्जुल-रणच्चरणारविन्द-
द्वन्द्वस्य रक्तमणिनिर्मित-पल्लवाली ॥ ६९ ॥

अन्वयः—दलित-सत्करभ-प्रभस्य उरुद्वयस्य कनकैः कृतचारु-रम्भास्तम्भावलिः लक्षम् । मञ्जीर-मञ्जुल-रणच्चरणारविन्द-द्वन्द्वस्य रक्त-मणिनिर्मित-पल्लवाली लक्षम् ।

भावार्थः—राधाया उरुद्वयम् कीदृग् इति प्रश्ने उत्तरयति—करभः (कलभो वा) करिशावकस्तस्य प्रभा दलिता येन तत् तस्य तिरस्कृतकरिशावकशुण्डस्य राधोरुद्वयस्य कनकैः सुवर्णैः कृतयोः चार्वोः रम्भास्तम्भयोः आवली पंक्तिः लक्षं वेध्यं शरव्यमित्यर्थः। मञ्जीरमिव मञ्जुलं यथा स्यात्तथा रणत् शब्दायमानं यत् चरणारविन्दद्वन्द्वं तस्य रक्तमणिभिः निर्मितानां पल्लवानाम् आली आवलिः लक्षं वेध्यम् (परिहासबुद्ध्येदृक् प्रयोगः) सादृश्यसूचकः सर्वत्रैवास्मिन् राधासर्वाङ्ग-वर्णनप्रसङ्गे ज्ञेयः।

समासादिः रम्भास्तम्भयोः आवलिः, रम्भास्तम्भौ च कनकैः चारु कृतौ इत्येवं समासः। दलिता करभ-प्रभा येन तद् उरुद्वयं विशेष्यं तस्येत्यर्थः। चरणारविन्दयोः द्वन्द्वम् अन्यदुपरि द्रष्टव्यम्। 'करभः करिशावकः'। 'वीथ्यालिरावलिः पङ्क्ति श्रेणिर्लेखास्तु राजयः' इत्यमरः। अतिशयोक्तिरलङ्कारः ॥ ६९ ॥

सम्प्रति सुन्दस्य तद्वलीनां च रत्नयुग्मं लक्षमिति प्रशंसति। नखानां च चन्द्रज्योतिषां रत्नचन्द्राः लक्षमिति प्रशंसति मालिन्या छन्दसा—

स्मर-रसमय-राजत्क्षीण-तुन्दस्य तस्या-
पि च रुचिर-तरङ्गप्रायतिर्यग्वलीनाम् ।
अयि तदनुभवाख्यं रत्नयुग्मं नखाना-
मुदयदरुण-चन्द्रज्योतिषां रत्न-चन्द्राः ॥ ७० ॥

अन्वयः– श्रीकृष्णो वक्ति–अयि (राधे !) तस्य (प्रसिद्धस्य) स्मर-रसमय-राजत्क्षीण-तुन्दस्य अपि च रुचिर-तरङ्गप्राय-तिर्यग्वलीनां च तत् (प्रसिद्धम्) रत्न-युग्मं कुचकुम्भद्वयम् अनुभवाख्यम् (अनुभव-योग्यम्) अत्र योग्यार्थे आख्याशब्दः। लक्षमिति शेषः, अग्रे यथापाठम्।

भावार्थः—सामान्यतो वर्णितमपि कुचयुग्ममिह तुन्दस्य जठरस्य वर्णनप्रसङ्गे पुनर्वर्णयति—अयि राधे ! तस्य प्रसिद्धस्य स्मर-रसमय-राजत्-क्षीणस्य तुन्दस्य (जठरस्य) अपि च (तथैव) रुचिर-तरङ्ग-प्रायाणां तिर्यग्वलीनां तत् (प्रसिद्धम्) रत्नयुग्मम् (कुचयुग्मम्) अनुभवाख्यम् अनुभवयोग्यं लक्षम्। (तव) नखानाम्

उदयताम् अरुण-चन्द्रज्योतिषां रत्नान्येव चन्द्राः लक्षमिति शेषः। हे राधे! तव जठरत्रिवलिशिरः स्थितं कुचयुग्मं मेऽनुभवयोग्यं तव नखानां तु उदयकालीनारुण-चन्द्रतारा लक्षमिति सारांशः।

समासादिः—स्मरस्य रसमयं यत् राजत् क्षीणं तुन्दं तस्य। रुचिराः तरङ्गप्रायाश्च ताः तिर्यग्वलयस्तासाम्। 'पिचण्डकुक्षी जठरोदरं तुन्दम्' इत्यमरः ॥७०॥

अधुना राधाजानुनी स्वागता-रथोद्धतोपजात्या वर्णयति—

क्षुल्ल-काञ्चन-समुद्गक-गर्व-
ध्वंसिनोस्तव वरेण्यजानुनोः।
काञ्चनप्रकटितां कटकोटिं
काञ्चन-प्रकट-दानमानय ॥ ७१ ॥

अन्वयः--पाठ एव गतार्थव्यमेतीति भावार्थो विविच्यते—हे राधे! क्षुल्लेन क्षुद्रेण तुच्छेनेति यावत् काञ्चनेन स्वर्णेन निर्मितस्य समुद्गकस्य करण्डस्य गर्व-ध्वंसिनोः तव वरेण्यजानुनोः श्रेष्ठोरुपर्वणोः काञ्चन-प्रकटितां स्वर्णविरचितां कटकोटिं हि काञ्चनस्य स्वर्णस्य प्रकटं प्रत्यक्षं दानम् आनय आनीय देहि। तामेव कटानां काञ्चननिर्मितानां कोटिसंख्यां जानुतुल्यां जानीहीति भावः।

समासादिः—क्षुल्लं च तत् काञ्चनम्, तस्य समुद्गकं तस्य गर्वस्तस्य ध्वंसिनी तयोः। वरेण्ये च ते जानुनी तयोः। काञ्चनात् प्रकटिता ताम्। कटानां कोटिस्ताम्। प्रकटं च तद् दानम्। काञ्चनस्य प्रकटदानं तत् कर्म। इति समास-प्रकारः। आनयेति क्रियाया कर्त्री राधा तत्सम्बुद्धौ हे राधे त्वमानयेत्यर्थः।

श्रीकृष्णः सम्प्रति राधिकाया नयनद्वयं निरूपयति वसन्ततिलकाछन्दसा—

हाराद्यलङ्कृतिचयस्य मनोज्ञरश्मि-
संस्पर्शरत्नमतुलं मृदुकण्ठलग्नम्।
त्वत्-किङ्किणी-वलय नूपुर निक्वणानां
कामं महोन्नत-मणिद्वयमेव हृद्यम् ॥ ७२ ॥

अन्वयः--त्वत् किङ्किणी-वलय-नूपुर-निक्वणानां (मध्ये) हाराद्यलङ्कृति-चयस्य मनोज्ञ-रश्मि-संस्पर्शरत्नम् अतुलं मृदु कण्ठलग्नं महोन्नतं मणिद्वयम् (नयनम्) एव कामं यथेच्छं हृद्यम् अस्तीति।

भावार्थः—श्रीकृष्णः साम्प्रतं राधिकानयनद्वयं विशालतया रत्नत्वेनोत्प्रे-क्षते। हे राधे! तव किङ्किणी-वलय-नुपूराणां ये निक्वणाः भूषणशब्दाः मनोज्ञ-ध्वनयस्तेषां मध्ये हारादयो या अलङ्कृतयस्तासां चयः समूहः। तस्य ये मनोज्ञरश्मयः किरणास्तैः संस्पर्श एव रत्नं नीलमणिः यत्र, इत्थं नीलमणिरूपं रत्नतां प्राप्तम्

अतुलम् अतुलनीयमृदुसुकुमारम् कण्ठलग्नं कण्ठोपरि विद्यमानं महोन्नतम् अति-स्फारम् विशालमित्यर्थः। मणिद्वयं नीलमणिद्वयं विषयनिगरणेन उपमानमेवोल्लि-खतीत्यतिशयोक्तिरलङ्कारः। नयनद्वयम् एव कामं कमनीयं ममेच्छानुरूपं हृद्यम् लोभनीयमित्यर्थः। तव नयने नीलमणिवद् माम् आकर्षयत इति।

समासादिः—भावार्थे समासोऽपि कृतोऽस्ति। नास्ति तुला यस्य तद् अतुलम्। कण्ठेलग्नं कण्ठलग्नम्। किङ्किण्यश्च वलयाश्च नूपुराणि चेति द्वन्द्वस्ततस्तत्पुरुषः॥७२॥

श्रीकृष्णो राधाया रक्तवस्त्रवर्णनप्रसङ्गतस्तदीयशारिकादिपालितजन्तूनां नृत्यं विवृणोति—वसन्ततिलकयैव च्छन्दसा—

सन्नील-रक्त-वसन-द्वय-कञ्चुकानां
प्रोद्यत्-प्रवाल-नव-मञ्जु-मसार-मालाः।
त्वच्छारिका-मृगवधू-महतीमयूरी-
लीलाब्जनर्तनततेर्वररत्नकोटयः ॥ ७३ ॥

अन्वयः--हे राधिके! (तव) सन्नील-रक्त-वसन-द्वय-कञ्चुकानां प्रोद्यत्-प्रवाल-नव-मञ्जुमसार-मालाः त्वच्छारिका-मृगवधू-महती-मयूरी-लीलाब्जनर्तनततेः वर-रत्न-कोटयो भवन्ति।

भावार्थः--श्रीकृष्णो व्यञ्जयति हे राधिके! तव सुन्दरनील-रक्तवर्णद्वय-शालिनोः अधोवस्त्रोर्ध्ववस्त्रयोः कञ्चुकस्य च देदीप्यमानप्रवाल-नव-संख्याकमनो-हरेन्द्रमण्यादिमालास्तव शारिका-मृगवधू-प्रेयसीमयूरीणां लीलाब्जनर्तनततेः श्रेष्ठ-रत्नानां कोटयः कोटिसंख्या भवन्ति। अर्थात् तव शारिकादयः गृहे पालिता मृगवध्वः प्रेयस्यो मयूर्यश्च तव वस्त्रेषु स्यूत-रत्नानां नवानामपि निधीनां दीप्त्या (दीप्तिमासाद्य) भ्रान्ता भवन्ति। अतश्च तत्र आनन्देनोच्छलितास्ता नर्तन्तीति भावः। नवनिधीनां नामानि—

महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ।
मुकुन्दकुन्दनीला खर्वश्च निधयो नव॥ इत्यमर टीका॥

मसारो नाम इन्द्रनीलमणिः। अत्र नवसंख्योपादानेन मसारादयो नवापि निधयो गृह्यन्ते। राधा साटिकायामधोवस्त्रोर्ध्ववस्त्रकञ्चुकेषु जडिता नवनिधय आसन् येनेन्द्रधनुषो भ्रान्ता गृहपक्षिणः पशवश्चानन्दप्लुता नृत्यन्ति स्मेति भ्रान्तिमदलङ्कारः।

समासादिः--सन्ति च तानि नीलरक्तवसनद्वयकञ्चुकानि सन्नीलरक्त-वसनद्वयकञ्चुकानि तेषाम्। इति द्वन्द्वगर्भो हि कर्मधारयः। प्रोद्यन्तश्च ते प्रवाला नव मञ्जवः मसाराश्च तेषां मालाः। अत्रापि द्वन्द्वगर्भः कर्मधारयः। महत्यश्च ता मयूर्यः महतीमयूर्यः। अत्र महतीशब्दः महं मङ्गलं तनोति इति विगृह्य उणादिना महपूर्वं-

कात् तनु विस्तारे इति धातोः ङीप्रत्यये साधुः । न तु ङीप्प्रत्यय इति न पुंवद्भावः । ततः शारिकाः मृगावध्वः महतीमयूर्यश्चेति द्वन्द्वः । ततः तासां लीलाब्जवन्नर्तनानि तेषां ततिस्तस्या इति तत्पुरुषद्वयमिति समासचक्रम् । वराणि च तानि रत्नानि वररत्नानि तेषां कोटयः । अत्रानन्तार्थे कोटिशब्दः ॥ ७३ ॥

श्रीकृष्णोऽधुना राधिका-वदनं वर्णयति मन्दाक्रान्तया--

कान्त्या यस्य क्षितिवनगिरिग्रामलोकाः समस्ताः
साक्षाज्जाताः सुभगवदने हन्त जाम्बूनदाभाः ।
तस्य भ्राम्यद् द्युतिभरबलाद्गन्धफल्यावलीनां
जैत्रस्योच्चैः कनक गिरयो गौरवर्णस्य कोटयः ॥ ७४ ।

अन्वयः--हे सुभगवदने ! हन्त (हर्षे) यस्य (तव वदनस्य) कान्त्या समस्ताः क्षिति-वन-गिरि-ग्राम-लोकाः साक्षात् जम्बूनदाभा जाताः । स्व-श्वास-सुगन्धिना गन्धफल्यावलीनाम् उच्चैर्जैत्रस्य गौरवर्णस्य तस्य वदनस्य भ्राम्यद्-द्युतिभरबलाद् कोटयः कनकगिरयः संजाताः ।

भावार्थः—सुभगं वदनं यस्याः सा सुभगवदना तत्सम्बुद्धौ हे सुभगवदने ! राधे ! हन्त महाहर्षविषयोऽयम् । यस्य त्वद्वदनस्य कान्त्या दीप्त्या समस्ताः सर्वेऽपि क्षिति-वन-गिरि-ग्राम-लोकाः साक्षात् जाम्बूनदाभाः सुवर्णकान्तयः जाताः सम्पन्नाः । निजश्वास-सुगन्ध-सम्पत्त्या अन्धफलीप्रभृत्योषधिवृन्दानां नितरां जैत्रस्य गौरवर्णस्य तस्य ते वदनस्य भ्राम्यद्-द्युति-भरबलाद् स्फुरत्कान्तिसङ्घप्रभावात् कोटयः कोटि-संख्यकाः सुवर्णपर्वताः सम्पन्ना एतादृशी तव मुखकान्तिरस्तीति भावः ।

समासादिः--क्षितिश्च वनं च गिरयश्च ग्रामाश्च लोकाश्चेति द्वन्द्वः । जाम्बूनदस्य आभा इवाभा येषां ते तथोक्ताः । गन्धफलीनाम् आवलयस्तासामिति तत्पुरुषः । भ्राम्यन्त्यश्च ताः द्युतयस्तासां भरः सङ्घः, तस्य बलादिति समासचक्रमन्यत् स्पष्टम् ॥ ७४ ॥

श्रीकृष्णः सम्प्रति राधायाः सर्वाङ्गाणि विशिनष्टि तेनैवच्छन्दसा—

गौराङ्गाणां कमलघुसृणप्रायसौरभ्यसिन्धो-
र्वर्तिनापि व्रजवनमिदं वासितं तन्व्यतस्ते ।
एतस्यान्यत् किमपि न मया दृश्यते दानयोग्यं
यातायातं कुरु सखि सदा दानमेतन्मदीयम् ॥ ७५ ॥

अन्वयः—हे तन्वि ! (राधे !) ते गौराङ्गाणां कमल-घुसृग-प्रायसौरभ्य-सिन्धोर्वर्तिन इदं ब्रजवनं वासितमस्ति । अत एतस्य दानयोग्यं मया अन्यत् किमपि न दृश्यते । हे सखि ! त्वं सदा यातायातं कुरु, एतत् मदीयं दानम् (मह्यं रोचते) ।

भावार्थः--हे तन्वि ! सुकुमारि ! राधे ! ते तव गौराङ्गाणां गौरवर्णावयवानां कमलकुङ्कुमातिशय-सौरभ्य-सिन्धोः वातेन मरुता इदं पुरःस्थितं व्रजवनं वासितं सुगन्धितं विद्यते। अतः कारणाद् एतस्याद्भुतस्य तवाङ्गसौरभतागस्य दानयोग्यं मह्यं देयं वस्तु अन्यत् किमपि मया न दृश्यते। मे दृष्टौ नास्ति किञ्चिदन्यदिति भावः। हे सखि=प्राणसमे ! त्वं सदैव इह यातायातं गमागमं कुरु, एतदेव मदीयं मत्कृते ते विशिष्टं दानं स्यादित्यलम्।

समासादिः--कमलं पद्मं घुसृणं कुङ्कुमं तयोः प्रायोऽतिशयो यः सौरभ्यसिन्धुः सुगन्धसागरः, तस्य वातेन, समुद्रे सदैव तरङ्गवातो वातीति सौरभ्ये समुद्रकल्पना। एतस्येति सम्बन्धे षष्ठी।

"अत्यागसहनो बन्धुः सदैवानुगतः सुहृत्।
एकक्रियं भवेन्मित्रं सखा प्राणसमो मतः" ॥ कोशः ॥

सम्प्रति श्रीकृष्णो राधाङ्गसम्पर्कमेव दानत्वेनाम्नाति मालीनीछन्दसा पद्यद्वयेन--

मसृण-घुसृण-चर्चाचारुकस्तूरिकोद्य-
न्मकर-कमलवल्ली-पत्र-भङ्गादिकानाम्।
रति-वितरण शूरैस्तत्तदामोद-पूरैः
परिमलय मदङ्गं नित्यमित्येव दानम्॥ ७६॥

अपि च—

चरण-कमललक्षा-श्लिष्ट-सौभाग्य-मुद्रा-
ततिरति वलतेया हारिणी हन्त तस्याः।
मदुरसि नखराग्रैरर्द्धचन्द्रं पराध्यं
वितर पदकवर्यं दानमाराद्वरोरु॥ ७७॥

अन्वयः--पृथगेवान्वयभावार्थावुभयोः छन्दस्येवाभेदः। तथा हि--हे **राधे** ! मसृण-घुसृण चर्चाचारु-कस्तूरिकोद्यन्मकर-कमल-वल्ली-पत्र-भङ्गादिकानां रति-वितरणशूरैः तत्तदामोदपूरैः नित्यं मदङ्गं परिमलय इत्येव दानम्, ममामोददमिति।

हे वरोरु राधे ! (या हि तव) चरण-कमल-लाक्षा-श्लिष्ट-सौभाग्य-मुद्राततिः अतिबलतेया हारिणी चास्ति। तस्याः पदक-वर्यं (श्रेष्ठं चिह्नं) मदुरसि नखाग्रैः पराध्यं (बहुमूल्यम्) अर्धचन्द्रं वितर (विस्तारय) तदेव आरात् (साक्षात्) दानं स्यात्।

भावार्थः—हे राधे तव कपेस्तादि गात्रेषु मञ्जुकुङ्कुम चर्चायाः तथा ललाटे उद्यन्मकरपद्मलतापत्रभङ्गादिकानां मम प्रेमवितरणे वीरैः तत्तदामतरङ्गैः सदैव मदङ्गं परिमलय सुगन्धि कुरु इत्येव ते दानं ममामोदं स्यादिति भावः। यथा त्वं स्वाङ्गेषु सर्वदा घुसृणादि द्रव्यानां लेपेन सुगन्धिनमात्मानं करोषि, तथैव ममाप्यङ्गं सुगन्धशालि करोषि चेन्मम महाप्रमोदः स्यात्।

हे वरोरु! वामोरु राधे! या हि तव चरणकमलयोः लाक्षारङ्गेन श्लिष्टा सौभाग्य-मुद्राततिः अतिबलैः बहुबलशालिभिः सैन्यसमृद्धिमद्भिस्तेया भोग्या राज-सेव्येति यावत्, हारिणी मनोमोहिनीत्यर्थः। तस्याः पदकेषु वर्यं श्रेष्ठं श्रेष्ठचिह्नं मम उरसि वक्षसि नखाग्रैः पराध्यं बहुमूल्यम् अर्द्धचन्द्रम् अर्द्धचन्द्राकारं पदचिह्नमेव आराद्दानं मत्समीपस्थं दानं साक्षाद्दानमिति भावः।

समासादिः—मसृणानि च तानि घुसृणानि मसृणघुसृणानि तेषां चर्चा ततः उद्यन्ति च तानि चारु कस्तूरिकायाः मकरकमलवल्लीपत्रभङ्गादिकानि ततस्तयोर्द्वन्द्वः, तेषामिति समासचक्रम्। रतेः वितरणे शूरास्तैः। ते च ते आमोदा इति तत्तदामोदाः, तेषां पूरास्तैरिति द्वन्द्वगर्भस्तत्पुरुषः। परिमलं करोति परिमलयति तस्य लोटि मध्यमपुरुषैकवचनम्, 'तत्करोति तदाचष्टे वा' इति णिच्। 'विमर्दोत्थः परिमलो गन्धो जनमनोहरः' इत्यमरः।

चरणौ कमले इवेति उपमितसमासः। चरणावेव कमले इति मयूरव्यंस-कादित्वाद्वा समासो ज्ञेयः। तयोः लाक्षा तया श्लिष्टा चासौ सौभाग्यमुद्राततिरिति कर्मधारयः। अतिबलं येषां ते तैः, तेया लभ्या इति बहुव्रीहि-गर्भो हि तत्पुरुषः। तैरिति धातुः। आत्वे यति रूपम्॥ ७७-७७॥

सम्प्रति श्रीकृष्णः राधिकागानं दानं दातुं प्रेरयति शार्दूलविक्रीडितेन-च्छन्दसा--

ध्वानैर्यस्य विपक्षलक्षहृदयोत्कम्पादिसम्पादकै-
रावैकण्ठमजाण्डपालिरतुलानन्दैः परिप्लाविता।
प्रीत्या तस्य रमादिवन्दितरुतेः सौभाग्यसद्दुन्दुभे-
र्दानं कञ्जमरन्द सुन्दरतरं गानं तवानन्ददे!॥ ७८॥

अन्वयः—हे आनन्ददे राधे! तव गानं कञ्जमरन्दसुन्दरतरम् (प्रसिद्ध-मिति शेषः) यस्य अतुलानन्ददैः विपक्षलक्षहृदयोत्कम्पादिसम्पादकैः ध्वनैः अजाण्ड-पालिः (अजापालिका अपि) आवैकण्ठम् (आकण्ठमित्यर्थः) परिप्लाविता (भवति) रमादिवन्दितरुतेः सौभाग्य सद्दुन्दुभेः तस्य प्रीत्या दानं (कुरु इति शेषः)।

भावार्थः—आनन्दं ददातीति आनन्ददा तत्सम्बुद्धौ हे आनन्ददे राधे! तव गानं कञ्जमरन्द-सुन्दरतरं (प्रसिद्धमस्ति) यस्य अतुलानन्दैः शत्रुलक्षहृदयोत्क-

म्पादिसम्पादकैः ध्वानैः ध्वनिभिः अजाण्डं पालयतीति अजाण्डपालिः अजापालिकेत्यर्थः । छन्दःपूर्त्यर्थम् अण्डशब्दप्रयोगः । तथैव आवैकण्ठम् आकण्ठमित्यर्थः । अत्रापि आयोगेऽपि मध्ये वैनिपातं छन्दःपूर्तये ज्ञेयम् । अजापालिका आकण्ठम् आनन्दाप्लाविता जायते, तव गानध्वनिश्रवणादिति भावः । लक्ष्मीप्रभृतिभिरपि ध्वनिरुतिर्यस्य वन्दिता भवति । यद्धि गानं सौभाग्यस्य सद्दुन्दुभिरेवास्ति, तस्यैव प्रीत्या प्रेम्णा दानं कुरु इति । फलतः त्वं मत्पार्श्वे समुपविश्य स्वमधुरं सौभाग्यसद्दुन्दुभिरूपं गानं श्रावय तदेव ते दानं वयं मन्यामहे इत्यर्थः ।

समासादिः—कञ्जस्य मरन्दः (मकरन्दः) मकरन्दस्य पर्याय एव मरन्दः । स इव सुन्दरतरम् । इत्युपमितसमासः । विपक्षाणां लक्षं लक्षसंख्येति विपक्षलक्षम्, तस्य हृदयानि तेषां कम्पादिस्तस्य सम्पादकैः । रमादिभिः वन्दिता रुतिः लयो यस्य तत् तस्य वन्दितरुतेः पाक्षिकपुंवद्भावे रूपम् । सौभाग्यस्य सद्दुन्दुभिः तस्येति 'दुन्दुभिः पुमान्' इत्यमरः ।। ७८ ।।

श्रीकृष्णोऽधुना राधेति नाम्नो वैशिष्टयं-ब्रूते शार्दूलविक्रीडितेनैवच्छन्दसा—

नाम स्वस्त्ययनं यदत्र विलसत् पीयूषंतोऽपि प्रियं
राधेति प्रथितं समस्तजगतीरोमाञ्चसञ्चारकम् ।
तस्यामूल्यतरस्य दानमपरं योग्यं क्वचित् सम्भवेत्
तस्मादुज्ज्वलकेलिरत्नमतुलं राधे ममाधीयताम् ।। ७९ ।।

अन्वयः--हे राधे देवि ! समस्तजगती-रोमाञ्चसञ्चारकं पीयूषतोऽपि प्रियं विलसत् स्वस्त्ययनं 'राधा' इति (यत्तव) नाम प्रथितम् (अस्ति), अमूल्यतरस्य तस्य दानम् अपरं योग्यं क्वचित् सम्भवेत् (नेति काकुः), तस्मात् मम अतुलम् उज्ज्वलकेलिरत्नम् (त्वया) आधीयताम् प्रारभ्यतामिति ।

भावार्थः--स तु अन्वये हि गतार्थोऽस्ति, तथापि 'द्रवकेलिपरिहासाः क्रीडा लीला च नर्म च' इत्यमरकोशात् केलिरत्नमेवेति मनाक् किञ्चित् विव्रियते-- हे राधे ! प्रसिद्धे देवि ! तव नाम समस्तजगत्यां श्रवणमात्रेणैव आनन्दप्रदत्वात् सर्वेषां रामाख्यकृदस्ति । सुधातोऽपि प्रियमस्ति परं स्फुरत् स्वस्त्यनं मङ्गलप्रदमस्ति । अनर्घरत्नस्य तस्य श्रीकृष्णादन्यत्र क्वापि दानं नैव सम्भवेदिति काक्वा ध्वन्यते । अतो मम श्रीकृष्णस्याग्रे परिहासकथानर्म आधीयताम्, भवतु आवयोरत्र नर्मविनोद रत्नमिति भावः ।

समासादिः—परिहास-परीहास इत्युभे अपि घञि 'उपसर्गस्य धञ्यमनुष्ये-बहुलम्-६।३।१२२' इति पाक्षिकदीर्घाज्ज्ञेयम् । समस्ता चासौ जगती तस्यां रोमाञ्च-सञ्चारकमिति कर्मधारयगर्भस्तत्पुरुषः । न तुला यस्य तद् बहुव्रीहिः । उज्ज्वलं च तत् केलिरत्नमि इति कर्मधारयः ।। ७९ ।।

पुनश्च विशिनष्टि श्रीकृष्णः राधां रत्नादिकल्पनया वसन्ततिलका छन्दसा **कुलकेन**—

दीव्यन्मति-प्रथितकीर्तिततिप्रगाढवित्तप्रगेयगुणगेयगुणोत्कराणाम् ।
सन्मौक्तिकप्रवरहीरकचारुनीलरत्नोज्ज्वलद्विविधरत्नकुलानि कामम् ॥ ८० ॥

अन्वयः—(हे राधे) कामम् (तव) दीव्यन्मति-प्रथितकीर्तितति-प्रगाढ-वित्त-प्रगेयगुणगेय-गुणोत्कराणां सन्मौक्तिक-प्रवरहीरक-चारुनीलरत्नोज्ज्वलद्विविध-रत्नकुलानि (निदर्शनस्थाने सन्ति नाम तेन किम्) ।

भावार्थः—श्रीकृष्णो राधां प्रशंसति–अयि राधे ! **कामं** यथेच्छं तव दीव्यन्मतितत्त्वस्य प्रगाढवित्तस्य प्रथितकीर्तिततेः प्रगेयगुणानां गेयगुणोत्कराणां सन्मौक्तिक-प्रवरहीरक-चारुनीलरत्नादीनि उज्ज्वलद्विविधरत्नकुलानि निदर्शनानि सन्ति नाम, तेन न कोऽपि लाभः ।

समासादिः—दीव्यन्मतिश्च प्रथितकीर्तिश्च प्रगाढवित्तं च प्रगेयगुणश्च गेयगुणाश्चेति द्वन्द्वान्ते तेषामुत्कराः, तेषामिति तत्पुरुषः ।एवं सन्मौक्तिकानि प्रवरहीरकाणि चारुनीलरत्नानीति द्वन्द्वान्ते तान्येव उज्ज्वलद्विविधरत्नानि तेषां कुलानीति तत्पुरुषः ।

पुनरग्रे तदालिछद्मनापि तां प्रशंसति तेनैव छन्दसा—

माद्यन्मतङ्गगतिनिन्दिगतेरनङ्गसाङ्गस्य सङ्गविधये किल लग्निकायाः ।
तारोरुमौक्तिकमरालवरालिरालि-माणिक्यपालिरथ तत्करचालनानाम् ॥८१॥

अन्वयः–अथ माद्यन्मतङ्गगतिनिन्दिगतेः लग्निकायाः अनङ्गसाङ्गस्य सङ्गविधये किल तत्करचालनानां तारोरु भौक्तिकभरालवरालि आलि मालिक्यपालिः अस्ति नाम किं तयेति शेषः ।

भावार्थः––अयि राधे ! अथ माद्यतो मतङ्गस्य गते निन्दिगतिमत्याः लग्निकायाः प्रतिभूरूपायास्तव सख्याः अनङ्गसाङ्गस्य साङ्गकामदेवस्य सङ्गविधये किल इत्यलीके तस्याः करचालनानां तारोरुमौक्तिकमरालवरालिः आलिमाणिक्यपालिः अस्ति नाम किं तया मे प्रयोजनमित्यर्थः ।

समासादिः––माद्यन् चासौ मतङ्ग इति कर्मधारयः । तस्य गतेः निन्दिनी गतिः यस्याः सा तस्या इति बहुव्रीहिस्तत्पुरुषगर्भः । साङ्गश्चासो अनङ्ग इति कर्मधारये राजदन्तादिषु परमिति आकृतिगणतया साङ्गस्य परनियातः । सङ्गस्य विधिः तस्मै । तारम् उरु यन्मौक्तिकम्, तदेव मरालः राजहंसः, स चासौ वरः मरालवरः, तस्य आलिः सखी या आलिमाणिक्यपालिः आलीनां माणिक्यपालिः पंक्तिः 'सश्मश्रुयुवती पालिः पंक्तिः कर्णलतापि च' इति त्रिकाण्डशेषः ।

सम्प्रति मधुमङ्गलसम्बन्धेनापि दानं स्वात्मार्थमेव कल्पयति तेनैवच्छन्दसा--

आयुर्यशोजयविवर्द्धनरन्धनोद्यदुद्दामसौष्ठवभरस्य तु कल्पितं मे।
कायस्थवर्तनतया मधुमङ्गलाय नित्यं सुशस्कुलिसुकुण्डलिकादिदानम् ॥ ८२ ॥

अन्वयः--कायस्थवर्तनत् या मधुमङ्गलाय नित्यं सुशस्कुलिसुकुण्डलिकादिदानं यत् ते सखीभिः विनीयते तत् तु आयुर्यशोजयविवर्द्धनरन्धनोद्यद् उद्दामसौष्ठवभरस्य मे (ममैव) कल्पितं भवति।

भावार्थः--हे राधे ! कायस्थवर्तनतया कायस्थकर्मणा व्यवहारलेखनादिकृत्यकारणाद् मधुमङ्गलाय यद् नित्यं निरन्तरं सुशस्कुलिसुकुण्डलिकादिघृतपक्वापूपादि दानं ते सखीभिरनुष्ठीयते, तत् तु आयुर्यशोविजयविवर्द्धनाय रन्धनार्थम् उद्यता उद्दामसौष्ठवभरो यस्मात् स तथोक्तः, तस्य मे ममैव कल्पितं तत् ज्ञेयम्। पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छतीत्युक्तेः कृष्णार्पणमेव तदित्यर्थः।

समासादिः—आयुश्चेत्यादि द्वन्द्वान्ते तेषां विवर्द्धनं तस्मै उद्यताम् उद्दामसौष्ठवभरो यस्मादिति व्यधिकरणबहुव्रीहिः। तस्य सुशस्कुलिश्च सुकण्डिका च तयोः समहारस्तद् आदिर्येषां तानि तेषां दानमिति समासचक्रम् ॥८२॥

इदानीं राधिकालिवर्गप्रशंसामिषेण तां प्रस्तौति तेनच्छन्दसा—

सौन्दर्यह्रीविनयपण्डिततासुगान-वैदग्ध्यसद्गुणततेर्भवदालिवर्गाः ।
दुःसाध्यमानविकृतेर्ललिता त्वदाली त्वत्प्रीतिनर्मशुभकर्मततेर्विशाखा ॥८३॥

अन्वयः—अयि राधे ! सौन्दर्य-ह्री-विनय-पण्डितता-सुगान-वैदग्ध्य-सद्गुणततेः भवदालिवर्गानिदर्शनम्। (तत्र) त्वदाली ललिता दुःसाध्यमान-विकृतेः निदर्शनम्। विशाखा च त्वत्प्रीतिनर्म-शुभकर्मततेः निदर्शनं ज्ञेयम्।

भावार्थः--अन्यच्च अयि राधे ! भवदालिवर्गाः भवत्सखीसंघाः सौन्दर्यस्य ह्रियाः विनयस्य पण्डिततायाः सुगानस्य वैदग्ध्यस्य किं बहुना सर्वस्या एव सद्गुणततेः निदर्शनानि। तत्र त्वदाली ललिता दुःसाध्या या मानविकृतिः तस्याः निदर्शनम्, विशाखा च त्वप्रीतिनर्मशुभकर्मणां निदर्शनं ज्ञेयम्, तस्यां त्वत्प्रीतिनर्मक्रीडाविलासः शुभकर्माण्यासक्तानीति भावः।

समासादिः—सौन्दर्यं ह्रीः विनयः पण्डितता सुगानं वैदग्ध्यम् एव सद्गुणाः, तेषां ततिस्तस्याः 'प्रह्वे वा' इति सूत्रे ह्रसंयोगेऽपि न पूर्वगुरुत्वम्। दुःसाध्याया मानविकृतिस्तस्याः। आलिवर्गा भवदालिवर्गाः, सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो ज्ञेयः ॥८३॥

सम्प्रति साक्षाद्राधां स्तौति श्रीकृष्णस्तेनैवच्छन्दसा—

कान्त्याविनिन्दितरमाशतलक्षकान्तेस्त्वद्विग्रहस्य भवती सुदतीष्वमूल्या।
लक्ष्मी सहस्रशततोऽप्यतिरम्यगोष्ठ-रामाशिरोवरमणे स्तवविग्रहस्ते ॥८४॥

अन्वयः—हे लक्ष्मीसहस्रशततोऽपि अतिरम्यगोष्ठरामाशिरोवरमणे ! राधे ! भवती सुदतीषु अमूल्या (अस्ति) ते (तव) कान्त्या विनिन्दितरमाशतलक्षत्वद्विग्रहस्य स्तवविग्रहः अमूल्यः, अस्तीति शेषः ।

भावार्थः—हे लक्ष्मीसहस्रशततः अनन्तलक्ष्मीतः अपि अतिरम्या अधिकरमणीया याः गोष्ठरामाः तासां शिरोवरमणे मुकुटमणिरूपे राधे ! भवती सुदतीषु सुन्दरनारीषु अमूल्या अनर्घा अस्तीति शेषः । ते तव कान्त्या शोभया विनिन्दितरमाशतलक्षस्य त्वद्विग्रहस्य त्वद्देहस्य स्तवविग्रहः स्तुतिवपुः अमूल्यमस्ति । को तवकायकान्ति वर्णयितुं समर्थ इत्यर्थः ।

समासादिः—रमायाः शतलक्षं तस्य कान्तिः, अतिनिन्दिता रमाशतलक्षकान्तिः येन तादृशः त्वद्विग्रहः संहननम् गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः । 'स्तोत्रं स्तुतिः स्तवः' इत्यमरः । अनुप्रासः शब्दालङ्कारो भाविकश्चार्थालङ्कारः ।।८४।।

अधुना कल्पितातिकोपा राधा वक्ति वसन्ततिलकयैवच्छन्दसा—

तद्वाक्यमित्थमधिकं मधुरं निशम्य
राधा तिरस्कृतसुधाऽतुलसिन्धुगर्वम् ।
उत्फुल्लकोपललितस्मितनर्मरम्य-
भङ्ग्याललाप कुटिलं कुटिलं निरीक्ष्य ।।८५।।

अन्वयः—तिरस्कृतसुधा राधा अधिकं मधुरं तद्वाक्यं निशम्य अतुलसिन्धुगर्वं यथा स्यात्तथा क्रियाविशेषणमिदम्, उत्फुल्लकोप-ललितस्मितनर्म-रम्य-भङ्ग्या कुटिलं निरीक्ष्य कुटिलं ललाप जजल्प ।

भावार्थः—यस्या वचसा सुधापि तिरस्कृता भवति, सैव राधा आलिवाक्यं हि अधिकं मधुरमपि (आनन्ददमित्यर्थः) निशम्य श्रुत्वा अतुलसागरवद् गर्वं यस्मिन् तादृशं लपन्ती उत्फुल्लकोपेन ललितं यत् स्मितं तस्य नर्मरम्यभङ्ग्या क्रीडाविलासभङ्ग्या कृतककोपकुटिलभ्रुकुटया कुटिलं तिर्यङ् निरीक्ष्य कुटिलं व्यङ्ग्यभृतं वचनं ललाप बहु जजल्पेति ।

समासादिः—सिन्धुरिव गर्वः सिन्धुगर्वः, अतुलः स इति यस्मिन् कर्मणि तद् अतुलसिन्धुगर्वमिति क्रियाविशेषणम् । उत्फुल्लश्चासौ कोपः तथोक्तस्तेन ललितं स्मितं तस्य नर्म-रम्य-भङ्गी तयेति समासचक्रम् । तिरस्कृता सुधा यया सा राधा तिरस्कृतौ वचसः सम्बन्धो ज्ञेयः ।।८५।।

सम्प्रति अतिकुपिता राधा तदेव स्वमनोगतमुद्गिरति वसन्ततिलकयैवच्छन्दसा—

यास्याम्यहं नहि पथा रतहिण्डकेन
सन्दूषितेन नितरां सखि तेन तेन।
इत्थं मदुक्तमपि नैव निशम्य गर्वा-
दानीय मामिह ददौ ललिता करेऽस्य ॥८६॥

अन्वयः—आलिवाक्यं श्रुत्वा कृतकल्पितकोपा राधा वक्ति-हे सखि! तेन लेखकेन तेन श्रीकृष्णेन च नितरां दूषितेन रतहिण्डकेन पथा अहं नहि (नैव) यास्यामि, इत्थं (पूर्वं) मदुक्तमपि (वाक्यम्) नैव निशम्य ललिता गर्वाद् माम् इह आनीय अस्य (श्रीकृष्णस्य) करे ददौ।

भावार्थः—आलिवाक्यश्रवणानन्तरं कल्पितं कोपं कृत्वा राधा वक्ति—हे सखि विशाखे! तेन तेन इति द्विरुक्त्या तत्सहचरो लेखकः श्रीकृष्णश्चेति उभौ सूचयति नितरां दूषितेन दोषवता विशेषतो रतः हिण्डकः लेखको यत्र ('हिण्डको लेखकः' इति विश्वकोशः) यस्मिन् पथि श्रीकृष्णसहचरो रमतेस्म। तेन पथा नहि यास्यामि इति पूर्वं मदुक्तमपि नैव निशम्य श्रुत्वा गर्वाद् निजाभिमानाल्ललिता सखी माम् इहं स्थाने आनीय अस्य (अङ्गुल्या निर्दिशति-श्रीकृष्णस्य करे हस्ते (वागुरायामित्यर्थः) ददौ दत्तवतीति।

समासादिः—मया उक्तं मदुक्तम् अन्यत्तु पूर्वमेवोक्तम्। रत इति रमुधातोः क्तप्रत्ययेऽनुनासिकलोपे समासस्तूक्त एव ॥८६॥

सम्प्रति कुपितां यान्तीं राधां श्रीकृष्णो हठाद्रुणद्धि तेनैवच्छन्दसा—

एवं निगद्य सहसा सहसा सखीभि-
र्वाम्यं न काम्यमपि तत्कृतनर्मशर्म।
संनिन्द्यवन्द्यवदना विधुना व्रजन्ती
रुद्धा बलेन विधुना विधुना व्रजस्य ॥८७॥

अन्वयः—एवं सहसा (हसेन सहिता) हसन्ती राधा निगद्य सखीभिः काम्यं तत्कृतनर्मशर्म (मम) न वाम्यं रोचकमिति संनिन्द्य विधुना वन्द्यवदना सहसा हठाद् व्रजन्ती व्रजस्य विधुना चन्द्रेण विधुना विधात्रा श्रीकृष्णेन बलेन हठेन रुद्धा।

भावार्थः—इत्थं सहसा हसन्ती राधा निगद्य सखीभिः तत्कृतनर्म-शर्म काम्यपि मम न वाम्यं प्रियं रोचकमिति यावत्, इति संनिन्द्य सहसा हठाद् यान्ती विधुना चन्द्रेणापि अतिसौन्दर्याद् वन्द्यवदना सा व्रजस्य विधुना चन्द्रेण स्वयमपि विधुना विधात्रा सर्वकर्त्रा विपूर्वको धा करेत्यर्थः।

समासादिः—तया कृतं च तद् नर्मशर्म = तत्-कृतनर्मशर्म। तत्पुरुषगर्भः

कर्मधारयः। वन्द्यं वदनं यस्याः सेति बहुव्रीहिः। 'रुधिर आवरणे' इति धातोः प्रत्यये रुद्धेति रूपम्। एको विधुः विधातृवाचकः। द्वौ चन्द्रवाचकौ ॥८७॥

सम्प्रति किमपि स्मिताक्षी ललिता सखी ब्रूते तेनैव च्छन्दसा--

श्रुत्वा मुकुन्द-मधुरस्मितसिक्तनर्म
शर्मप्रबन्धमतुलं किमपि स्मिताक्षी।
अन्तः स्फुरत्सुखभरं प्रचुरं रुषेव
संरुध्यहृद्यमधिकं ललिता ललाप ॥८८॥

अन्वयः—अतुलं मुकुन्द-मधुरस्मित-सिक्त-नर्मशर्मप्रबन्धं श्रुत्वा किमपि स्मिताक्षी ललिता सखी प्रचुरम् अन्तःस्फुरत्सुखभरं रुषा इव संरुध्य अधिकं हृद्यं ललापेति।

भावार्थः--अतुलनीयं मुकुन्दस्य मधुरस्मितेन सिक्तस्य नर्मशर्मणः प्रबन्धं श्रुत्वा आकर्ण्य किमपि ईषत् स्मिताक्षी विकसितनयना ललितानाम्नी सखी प्रचुरं अत्यधिकं अन्तःस्फुरत्सुखभरं रुषा कृतककोपेन इव संरुध्य सगोप्य अधिकं हृद्यं कमनीयं ललाप उज्जगार इति भावः।

समासादिः–न तुला यस्येत्यतुलम्। पूर्वमुक्तम्। मुकुन्दस्य मधुरं च तत् स्मितं तेन सिक्तं यत् नर्म-शर्म तस्य प्रबन्धः तमिति समासचक्रम्। स्मिते अक्षिणी यस्याः सा। अन्तःकरणे स्फुरद् यत् सुखं तस्य भरः समुदायस्तमिति ॥८८॥

सम्प्रति श्रीकृष्णं यथेच्छमुपहसति सा तेनैवच्छन्दसा--

कस्यापि गोष्ठनगरे दधिदुग्धदान-
वार्तापि न श्रुतचरी किमु दृष्टपूर्वा।
चिल्लातवर्गपतिना यदनेन पृष्ट-
मेतत्तु वल्लववधू-कुल-लुण्ठनाय ॥८९॥

अन्वयः—गोष्ठनगरे कस्यापि दधि-दुग्ध-दान-वार्ता अपि न श्रुतचरी दृष्टपूर्वाः किमु (वाच्येति शेषः) चिल्लातपतिना अनेन यत् पृष्टमेतत्तु वल्लववधूकुल। लुण्ठनायेति तर्कयामि।

भावार्थः--इह गोष्ठनगरे व्रजपुर्यां कस्यापि शासकस्य दधि-दुग्ध-दानवार्ता पूर्वं न श्रुतचरी दृष्टपूर्वा किमु कथं स्यात्? न क्वापीति काकुः। चिल्लातानां लुण्ठकानां पतिना स्वमिना अनेन कृष्णेनेति अङ्गुल्या निर्देशः, यत् पृष्टम् (वयं किमपि उक्ताः) एतत्तु वल्लवानामाभीराणां वधूकुलस्य वधूटीसमूहस्य लुण्ठनाय अपहरणायोपक्रमणमारब्धमिति भावः। चिल्लोऽण्डजो यथा हठाद्बालानां हस्तात् खाद्यमपहरति, तथैव एतस्य सहचराः तरुणीमपहरन्ति। अतस्ते चिल्लाताः लुण्ठकाः तेषां वर्गः संघः तस्य पतिना महाऽपहारकेण अनेन सर्वं तत् क्रियते। व्रजवल्लववधू कुलहरणादिति भावः।

समासादिः—दधीनि च दुग्धानि च तेषां दानं तस्य वार्तेति द्वन्द्वगर्भस्तत्पुरुषः। वल्लवानां वध्वस्तासां कुलं तस्य लुण्ठनं तस्मै। चिल्लातकवर्गपतिरित्युपहासशब्दः कल्पितः ॥८९॥

पुनः श्रीकृष्णे कृष्णभुजगत्वारोपेणोपहसति—

एतस्य कृष्णभुजगस्य कठोरभोगात्
सख्यो यदि स्वमवितुं परमिच्छयैतत्।
गत्वा व्रजेन्द्रगृहिणी पुरतोमशोऽस्म
सङ्गीयतां त्यजति वः सुखितो यथैषः ॥९०॥

अन्वयः—(ललिता सखी रुष्टा सती लपति) हे सख्यः ! यूयं यदि एतस्य कृष्णभुजगस्य कठोर-भोगात् स्वम् अवितुम् इच्छय चेत्, तदा व्रजेन्द्रगृहिणी पुरतो गत्वा अस्य परम् (उत्कृष्टम्) एतद् यशः सङ्गीयताम्। यथा एषः सुखितः सन् वः युष्मान् त्यजति।

भावार्थः—कृतककोपा ललिता सखी स्वमनोभावं विवृणुते-हे सख्यः ! यूयं यदि एतस्य (अङ्गुल्या निर्दिश्य) पुरोविद्यमानस्य कृष्णः श्रीकृष्ण एव कृष्णभुजगः नीलसर्पस्तस्य कठोरभोगात् कठिनकायात् भुजभोगाद्वा स्वम् आत्मानम् अवितुं रक्षितुमिच्छय चेत्, तदा व्रजेन्द्रगृहिण्याः पुरतोऽग्रे अस्य परं सर्वोत्कृष्टं व्यङ्ग्यमिदं विपरीतलक्षणया अधममित्यर्थः, एतद् यशः कुकृत्यं सङ्गीयतां विस्तरेण वर्ण्यताम् (अयमपि व्यङ्ग्यशब्द एव), यथा एषः सुखितः लज्जितः सन् (व्यङ्ग्यमेवेदं) वः युष्मान् सर्वाः त्यजति परिजहातीति।

समासादिः—नास्त्यत्र समासः; किन्तु व्यङ्ग्यमयं ध्वनिबहुलमिति सर्वोत्तमं काव्यमिदम् 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिबुधैः कथितः' इति काव्यप्रकाशः।

सम्प्रति व्यङ्ग्यभङ्ग्यैव श्रीकृष्णेऽपि ता ललितादिसखीरुत्तरते उपजात्या।

राधाहृदाकूतमगाधमीषद् व्यङ्गयेन विज्ञाय मुकुन्द आराद्।
प्रत्येकमल्पस्मितमत्र कृत्वा जगाद भङ्गया ललितादिकास्ताः ॥९१॥

अन्वयः—आरात् (स्थितः) मुकुन्दः अगाधं राधाहृदाकूतं व्यङ्ग्येन ईषद् विज्ञाय अत्र अल्पस्मितं कृत्वा ललितादिकाः ताः प्रत्येकं भङ्ग्या जगाद।

भावार्थः—आरात् समीपे स्थितः मुकुन्दः श्रीकृष्णः अगाधं गभीरं राधायाः हृदयाकूतम् व्यङ्ग्येन व्यङ्ग्यभङ्ग्या यत् पूर्वं सोवाच तद्-व्यङ्ग्यवाक्येन ईषद् ईषद् मनागेव विज्ञाय अत्र प्रसङ्गे अल्पस्मितम् ईषद्धासं कृत्वा विधाय ललितादिकाः ताः सखीः प्रत्येकम् एकैकां प्रति भङ्ग्या व्यङ्ग्यमर्यादयैव जगाद उत्तरयामासेति भावः।

समासादिः—राधायाः हृद् तस्य आकूतम् । तत्पुरुषः । ललिता आदिः यासाम् तास्ताः । 'शेषे विभाषा—५।४।१५६' इति कः ।।९१।।

इदानीं कृष्णो राधिकामेव स्तौति वसन्ततिलकया—

विद्या चयस्य तव सुन्दरि तुङ्गविद्ये !
प्रत्येकमेव किल दक्षसुवर्णलक्षम् ।
यत्तेन तेन भवती व्रजयौवतं त-
ज्जित्वा स्फुरत्यनुदिनं मददर्पदृप्ता ।।९२।।

अन्वयः—हे तुङ्गविद्ये सुन्दरि राधे तव विद्या चयस्य दक्षस्य (उत्कृष्टस्य) सुवर्णस्य लक्षं किल मूल्यं सम्भावयामि, यत् तेन तेन तत् प्रसिद्धं व्रजयौवनं जित्वा मददर्पदृप्ता सती भवती अनुदिनम् स्फुरति देदीप्यते ।

भावार्थः—तुङ्गा उत्कृष्टा विद्या यस्याः सा तत्सम्बुद्धौ हे तुङ्गविद्ये ! सुन्दरि राधे तव विद्याचयस्य विद्यावृन्दस्य दक्षं उत्कृष्टं (अत्र दक्षशब्दो लाक्षणिक उच्च-जातीय सुवर्णपरः) तस्य लक्षम् लक्षसंख्या मूल्यं सम्भावयामि, यत् यस्मात् कारणात् तेनेति द्विरुक्तिः विद्याचयस्योत्कृष्टतां सूचयति । तेन-तेन एकैकेन विद्याचयेन विद्यावृन्देन तत् प्रसिद्धं युवतीनां समूहः यौवतम् युवतीकुलं जित्वा भवती मददर्पदृप्ता यौवनमदगर्वगौरवा अनुदिने दैनन्दिनं स्फुरति देदीप्यते सर्वो-त्कृष्टा दृश्यते । इति भावार्थः । अत्र विपरीतलक्षणया व्यङ्गे मिथ्यागर्वस्ते इति ध्वनयति ।

समासादिः—दक्षे तु चतुरपेशल पटवः (इत्याद्यमरः) अत्र पेशल उत्कृष्ट एव । किलशब्दो पादानहि मूल्यसम्भावनाद्योतकः । यौवतं युवति शब्दात् समूहार्थे अणा साध्यः । मदस्य दर्पः तेन दृप्ता इति तत्पुरुषः । एकम् प्रति प्रत्येकम् ।। ९२ ।।

श्री कृष्णोऽधुना चित्रां सखीं स्तौति वसन्ततिलकया छन्दसा—

चित्रे ! सुचित्र-मृदुमन्दवचःप्रबन्धो
हृद्यो न कस्य तव सुन्दरि भूतलेऽस्मिन् ।
नो चेत् कथं तमवगम्य बुधः सुधाया
माधुर्यमप्यनुदिनं हि तिरस्करोति ।।९३।।

अन्वयः—हे सुन्दरि चित्रे सखि ! अस्मिन् भूतले तव सुचित्र-मृदु-मन्द-वचः-प्रबन्धः कस्य न हृद्यः (किन्तु सर्वस्यैवेति काकुः) नो चेत् (एवं यदि न स्यात् तदा) बुधः तम् अवगम्य कथं सुधायाः माधुर्यम् अपि अनुदिनं हि (उत्तरोत्तरम्) निश्चयेन तिरस्करोति, अवमनुते ।

भावार्थः—स तु अन्वय एव गतार्थः । तथापि स्पष्टप्रतिपत्तये पुनरुच्यते— हे चित्रे ! त्वं सुन्दरी असि तव सुचित्र-मृदु-मन्द-बचःप्रबन्धः कस्य जनस्य अस्मिन्

भूतले हृद्यो न स्यात्, सर्वस्यैव तु अस्ति। यद्येवं नो चेत् तर्हि कथं बुधः पण्डितो जनः तम् अवगम्य बुध्वा सुधायाः अमृतस्य माधुर्यं सुस्वादम् अपि अनुदिनं हि उत्तरोत्तरं निश्चितं तिरस्करोति न्यक्कुरुते। इति विपरीत लक्षणया तु सर्वमिदं–विपरीतं ध्वनयेत्। महाकुरुपा त्वं कोऽपि ते क्रूरं प्रबन्धं श्रोतुं न वाञ्छतीत्यादि ध्वनिकाव्यत्वादुत्तमम्।

समासादिः—वचसः प्रबन्धः वचःप्रबन्धः। सुचित्रश्च मृदुश्च मन्दश्चासौ वचःप्रबन्धः इति कर्मधारयः। दिनं दिनं प्रति इत्यनुदिनम् वीप्सार्थेऽव्ययीभावः। व्याजस्तुतिरलङ्कारो ध्वनिकाव्यञ्च ॥९३॥

अधुनोपसंहरति चित्रास्तुतिं श्रीकृष्णस्तेनैव च्छन्दसा—

अस्मादमुष्य मधुरस्य न कोऽपि दान-
योग्यः पदार्थ इह भामिनि दृश्यते यत्।
तस्मादिदं मृदुल-मञ्जुल-मृष्ट-दिव्य-
बिम्बाधरामृतमिदं स्मितचन्द्र-गन्धि ॥९४॥

अन्वयः—हे भामिनि! यत् यस्मात्कारणात् तव अमुष्य वचश्चित्रप्रबन्धस्य दानयोग्यः अस्मादन्यः कोऽपि पदार्थो न दृश्यते इह (जगति) तस्माद् स्मितचन्द्रगन्धि तव मृदुल-मञ्जुल-मृष्ट-दिव्य-बिम्बाधरामृतम् इदम् एव (दानम् अस्तु)।

भावार्थः—इह कामपि सखीं हे भामिनि! सुन्दरिस्त्रि! इति सम्बोधयति तव अमुष्य मधुरस्य अमृताधरस्य दानयोग्यः कोऽपि अस्मादन्यः पदार्थं इह जगति न दृश्यते नावलोक्यते यत् तस्माद् इदम् स्मितचन्द्रगन्धि तव मृदुल-मञ्जुल-मृष्ट-दिव्य-बिम्बाधरामृतम इदमेव दानं मत्कृते अस्तु। अत्र द्विरिदम् पदं देयतामुत्कृष्टताञ्च द्योतयति।

समासादिः—स्मितं चन्द्र इब सः स्मितचन्द्रः तस्य इव गन्धो यत्रेति उपमितगर्भो बहुव्रीहिः। गन्धेत्वप्रकरणं 'उपमानाच्च ५।४।१३७' इति गन्धस्येत्वम्। मृदुलं मञ्जुलं च मृष्टं च दिव्यं चेति समाहारद्वन्द्वं विधाय अधरं बिम्बमिवेति कृतोपमितसमासेन बिम्बाधरेण कर्मधारयं कृत्वा पुनः मृदुल-बिम्बाधरम् अमृतमिवेत्युपमितान्तम् समासचक्रम् ॥९४॥

इदानीं श्रीकृष्णः चम्पकलतां सखीं स्तौति तेनैवच्छन्दसा—

प्राणालि चम्पकलते तव वह्नितप्त-
जाम्बूनद-स्फुरित चम्पक-कम्पि-कान्तेः।
श्यामं मदङ्गमुदितं मुदिता तयैव
सन्मालया मधुरया किल मेडयेति ॥९५॥

अन्वयः--हे प्राणालि चम्पक लते मुदिता (त्वं) वह्नितप्त-जाम्बू-नद-स्फुरित-चम्पक-कम्पि-कान्तेः तव तयैव मधुरया सन्मालया श्यामम् उदितवं मदङ्गं मेडय किल इति दानम् अस्तु ।

भावार्थः--हे प्राणवत् आली प्राणाली तत्सम्बुद्धौ हे प्राणालि सखि चम्पकलते ! मुदिता परम प्रसन्ना त्वं वह्निना तप्तजाम्बूनदवत् स्फुरितचम्पकवत् कम्पिनी कम्पयित्री कान्तिः यस्यास्तस्याः तव तया चम्पकस्त्रला पुष्पनिर्मितया स्रजा मधुरया सन्मालया श्यामम् उदितं विकसितमदङ्गं मेडय किल इत्यस्तु दानं तव मत्कृते इति व्यङ्गचम् इत्यर्थः ।

समासादिः--वह्निना तप्तं च तत् जाम्बूनदम् इति स्फुरितं च तत् चम्पकम् इति द्वे कम्पयति तच्छीला कम्पिनी कान्तिः यस्याः सा तथोक्ता तस्या इति समासचक्रम् । मेह-सङ्गमे इति चुरादेर्धातोर्लोटि रुपम् । अनुप्रासच्छटा तु प्रायः सर्वत्रैव पद्येषु व्यङ्गचबाहुल्यं च, चम्पकलता त्वं मां श्यामद्रुमं वेष्टयेति स्फुटं व्यङ्गचम् ॥९५॥

सम्प्रति विशाखां सखीं स्तौति श्रीकृष्णस्तेनैव च्छन्दसा--

यत्ते मुखस्य मधु तन्मधुराङ्गि नर्म
कर्पूरवासिततरं रस-दुग्ध-मुग्धम् ।
तस्यैव दुर्लभतरस्य परं विशाखे !
दाने त्वमेव नियतं न परं त्रिलोक्याम् ॥९६॥

अन्वयः--हे मधुराङ्गि विशाखे सखि ! ते मुखस्य तत् कर्पूरवासिततरं रसदुग्धमुग्धम् मधु नर्म दुर्लभतरस्य तस्यैव दाने त्वमेव परं नियतं दानम् असि त्रिलोक्याम्, न परं (किञ्चिदस्ति) ।

भावार्थः--हे मधुराङ्गि सुकुमाराङ्गि विशाखे सखि ! ते तव मुखस्य यत् तत् कर्पूर-वासिततरं रसदुग्धमुग्धं मधु नर्म लीलारसः । तस्यैव दुर्लभतरस्य दाने त्वमेव परमुत्कृष्टं नियतं दानम् असि त्रिलोक्याम्, परम् अन्यत् न किञ्चिदस्तीति भावार्थोऽपि ज्ञेयः । अहो तेऽङ्गमाधुर्यं तदेव ते परं दानं मम दृष्टौ विद्यते । ततः परन्तु त्रिलोक्यामपि नास्ति किञ्चिदिति ध्वनिः ।

सामासादिः--मधुरं अङ्गं यस्या इति बहुव्रीहिः, तत्सम्बुद्धौ हे मधुराङ्गि ! 'अम्बार्थनद्योर्ह्रस्वः—७।३।१०७' इति ह्रस्वः । कर्पूरेण वासिततरम् इति तत्पुरुषः । रसेषु दुग्धं तदिव मुग्धम् = रसदुग्धमुग्धम् 'मुग्धो मधुरोऽपीति' विश्वः ॥९६॥

सम्प्रति ललितां सखीं लालयति श्रीकृष्णः पूर्वच्छन्दसा—

वैदग्ध्यनर्म-रस-लास्य-विलास-हास-
सौन्दर्य-मद्गुण-ततेर्ललिते परं ते ।
मानोरु-शिक्षण-विचक्षणतादि-कूट-
काठिन्य-कौशल-परित्यजनं हि दानम् ॥९७॥

अन्वयः—हे ललिते सखि ! वैदग्ध्य-नर्म-रस-लास्य-विलास-हास-सौन्दर्य-मद्गुण-ततेः (कृते) ते मानोरु-शिक्षण-विचक्षणतादि-कूट-काठिन्य-कौशल-परित्यजनं हि परम् (उत्कृष्टम्) दानम् अस्तीति शेषः ।

भावार्थः—हे ललिते नाम्नैव अतिप्रिये, न तु कर्मणा इति ध्वनितुं नाम-निर्देशः । सखि ! वैदग्ध्यं चातुर्यं नर्म क्रीडारसः माधुर्यं लास्यं नृत्यं विलासः विभ्रमः हासः हर्षः सौन्दर्य लावण्यम् इत्यादि मद्गुणततेः मम गुणसमुदायस्य कृते हेतोरिति यावत् । ते तव मानस्य गर्वस्य उरुशिक्षणस्य विशालाध्ययनस्य विचक्षण-तादिकूटस्य काठिन्यकौशलस्य परित्यजनं परिहाणं हि निश्चितं परम् उत्कृष्टं दानम् अस्ति । सर्वं छलछद्म विहाय मह्यमात्मानं समर्पयेति ध्वनिः ।

समासादिः—उभयत्रापि द्वन्द्वान्ते तत्पुरुषः । कूटं कैतवानृतराशि लास्यं नृत्यं प्रायो विदितार्था एव सर्वे शब्दा इति कोशस्त्यज्यते । इदंतु ध्वनिगर्भमुत्तमकाव्यम् । अनुप्रासछटा तु प्रायः सर्वत्र ॥९७॥

सम्प्रति कुन्दलता सखी भाषमाणं कृष्णं मध्ये विक्षिप्य पृथ्वीछन्दसा वार्तां प्रस्तौति—

सुधानिधिसुधाभरैः कृतविचित्रसत्कुण्डली-
स्पृहाशतविसर्जकस्फुरित-माधुरीविन्दुकाम् ।
तयोर्व्रजविलासिनोर्मधुर-केलिवार्तासुधां
धयत्यपि सहस्रशः सुमुखि नैव तृप्तिं लभे ॥ ९८ ॥

अन्वयः—कुन्दलता सखी मध्ये ब्रूते–हे सुमुखि ! व्रजविलासिनोः तयो राधा-श्रीकृष्णयोः सुधानिधि-सुधाभरैः कृताविचित्रा सती विद्यमाना कुण्डली आवर्तः आवरणं यस्यां तादृशी या स्पृहा तस्याः शतं यद् विसर्जकं स्रष्टृमन इत्यर्थः, तेन स्फुरिता माधुरीविन्दवो यत्र ताम्, मधुरकेलिवार्तासुधां सहस्रशः धयती पिबन्ती अपि (छान्दसो नुमभावो धयतीत्यत्र) तृप्तिं न लभे प्राप्नोमि ।

भावार्थः—श्रीकृष्णे सखी निवहं स्तुवति सति मध्ये विक्षिप्य ब्रूते कुन्दलता सखी–हे सुमुखि सुन्दरवदने सखि ! व्रज-विलासिनोः ब्रज-विहारिणोः तयोः राधा-कृष्णयोः वाक्सुधानिधेः सुधाभरैः पीयूषप्रवाहैः, (अत्र वाचि सुधानिधित्वारोपः विषयस्य च वाचोनिगीर्णत्वादतिशयोक्तिरलङ्कारः) कृतविचित्र-सत्कुण्डली-स्पृहा-शतविसर्जकस्फुरितमाधुरीविन्दुकाम्, अत्रापि कृता विचित्रा सत्कुण्डली विचित्रविद्य-मानावर्ता; यस्यां तादृशी या स्पृहा सखीनां तस्याः बिसर्जकं स्रष्टृ मन एव विष-योऽत्र ज्ञेयः । तस्यापि निगीर्णता दृश्यते । तेन मनसा स्फुरिता वाङ्माधुरी-बिन्दवो यस्यां सा मधुरकेलिवार्ता ताम् उभयोः मधुरकेलिवार्तासुधां धयती धयन्ती अपि (अत्र नुमभावः छान्दसः कवेः स्वातन्त्र्यात्) पिबन्तीत्यतस्तृप्तिं न लभे प्राप्नोमि, इति कामपि अन्यां सखीं ब्रूते ।

समासादिः--पद्यमिदं विषयाणां वाचः मनसः पुनरपि वाच इति विविध-विषयाणां निगरणात् केवलानां सुधानिधि-विसर्जक-माधुरीमात्राणामुपमानां विशेष्याणामेवोपादानात्। "विषयस्य निगीर्णत्वेऽतिशयोक्तिर्निगद्यते" इति स्फुट-मतिशयोक्तिरलङ्कारः। वाक् सुधा इवेति वाक्सुधा तस्या निधिः वाक्सुधानिधिस्थाने सुधानिधिमात्रप्रयोगः। सती चासौ कुण्डली सत्कुण्डलीति कर्मधारयः। ततः कृता विचित्रा सत्-कुण्डली यस्यां सा इति स्पृहाविशेषणं बहुव्रीहिः। स्पृहायाः शतं सर्जकं यन्मनस्तेन स्फुरिता वाङ्माधुरीबिन्दवो यस्यां सा मधुरकेलिवार्तासुधा ताम्, अत्रापि मनसो वाचश्च निगरणम्। इति समासचक्रम्। इत्थं हि बहुत्रग्रन्थग्रन्थयोऽस्य महाकवेर्ज्ञेयाः ॥९८॥

अधुना विधुमुखी-नाम्नी सखी वसन्ततिलकाछन्दसा ब्रूते—

तस्मात् पुनः पुनरिमां कथयैव वार्ता-
मित्यद्य कुन्दलतया प्रतिभाष्यमाणे।
सन्तोष-सागर-निमज्जन-फुल्लरोमा
प्रेमार्द्रवाग् विधुमुखी सुमुखी बभाषे ॥९९॥

अन्वयः—विधुमुखी नामा सुमुखी सखी तस्माद् राधाकृष्णयोः मधुरकेलिवार्ता-सुधाम् इमां वार्तां पुनः पुनः कथया एव अद्य नयतु इति कुन्दलतया सख्या प्रतिभाष्य-माणे प्रत्युत्तरयति पद्ये सन्तोष-सागर-निमज्जनफुल्लरोमा सती तथा प्रेमार्द्रवाक् च सती बभाषे उवाचेति।

भावार्थः—कुन्दलतया मध्ये विच्छिद्य तस्माद् राधाकृष्णयोर्मधुरकेलिवार्ता-सुधामेव कथया पुनः पुनः अद्य नयतु इति कुन्दलतया सख्या प्रतिभाष्यमाणे उत्तरयति पद्ये सुमुखी विधुमुखी नामा सखी सन्तोष-सागरनिमज्जनफुल्लरोमा तथा प्रेमार्द्र-वाक् सती बभाषे उवाचेत्येवं अन्वयकल्प एव भावार्थोऽप्यस्य पद्यस्य।

समासादिः—विधुरिव मुखं यस्याः सा, सु सुन्दरं मुखं यस्याः सेति विशेषणम्, सन्तोष एव सागरस्तत्र निमज्जनम्, तेन फुल्लानि रोमाणि यस्याः, प्रेम्णा आर्द्रा वाक् यस्या सेत्युभयत्र बहुव्रीहिः ॥९९॥

सम्प्रति तुङ्गनर्मा नामा सखी ब्रूते उपजातिच्छन्दसा--

तदा तदुक्ताखिलदानवस्तु
जातं निशम्यालिकुलेषु तेषु।
हसत्सु सर्वेषु च तुङ्गनर्मा
स्मित्वा स्फुटं वाचमुवाच गोष्ठ्याम् ॥१००॥

अन्वयः--तदा गोष्ठ्यां तदुक्ताखिल-दान-वस्तुजातं निशम्य सर्वेषु तेषु आलिकुलेषु हसत्सु सत्सु तुङ्गनर्मा नामा सखी स्मित्वा स्फुटं वाचम् उवाच।

भावार्थः--तदा तदानीं गोष्ठ्याम् उभयतोऽपि दानकेलिवार्तायां प्रसृतायां तेन कौतुकिना श्रीकृष्णेन उक्तं यद् अखिलं दानवस्तुजातं दानपदार्थवृन्दं निशम्य श्रुत्वा सर्वेषु तेषु प्रसिद्धेषु आलिकुलेषु सखीवर्गेषु हसत्सु सत्सु तुङ्गनर्मा-नाम्नी सखी स्मित्वा ईषद्हास्यं विधाय स्फुटं यथा स्यात्तथेति क्रियाविशेषणम्, वाचं गिरम् उवाच व्याजहार ।

समासादिः—तेन उक्तं तदुक्तं च तदखिलं दानस्य वस्तुनः जातं सङ्घम् । तत्पुरुषकर्मधारय-तत्पुरुषसमासचक्रम् । आलीनां कुलानि तेषु । तुङ्ग नर्म यस्येति बहुव्रीहौ तुङ्गनर्मेति नाम यस्याः सा तुङ्गनर्मनामा, अत्र 'अनो बहुव्रीहेः–४।१।१२' इति ङीम्निषेधः ॥ १०० ॥

सम्प्रति तुङ्गनर्मेति नाम सार्थक्यं कर्तुं कौतुकिनी सा व्यङ्ग्यवाक्यमुद्गिरति वसन्ततिलकया छन्दसा--

वित्तानि यानि मधुमङ्गल-याचितानि
तान्याशु नेष्यथ कथं बत दुर्बलाः स्थ ।
तस्माद् गृहाच्छकट-यूथमिहानयध्वं
शूरोष्ट्रसद्वृषभ-लोक-खरांश्च वोढुम् ॥१०१॥

अन्वयः---महनर्मवती तुङ्गनर्मा सखी सर्वं व्यङ्ग्यमर्यादया समुद्गिरति–अहो यूय बत खेदे दुर्बलाः स्थ । प्रधाननायकं सङ्गोप्य तत्सहचरं मधुमङ्गलमासज्य वक्ति मधुमङ्गलयाचितानि वित्तानि कथं नेष्यथ । तस्मात् कारणाद् वोढुम् (तानि वित्तानि) गृहाद् इह शकटयूथं शूरोष्ट्रसद्वृषभ-लोकखरान् च आनयध्वम् इत्यहमुपदिशामि ।

भावार्थः—अन्वये स्पष्टोऽर्थस्तथापि तुङ्गानि उग्राणि नर्माणि क्रीडाकौतुक-वचांसि यस्याः सा तुङ्गनर्मा सखी स्वीयं व्यङ्ग्यं गूढं यदुद्गिरति तदेव सूचयामि—अये युवानः यूयं दुर्बलाः शिथिलाः स्थ, श्रीकृष्ण सरुपा मधुमङ्गलेन याचितानि यानि वित्तानि धनानि तानि आशु शीघ्रं कथं नेष्यथ (यद्यपि याचकस्तु पूर्वं साक्षात् श्रीकृष्ण एवास्ति, तथापि तदभ्यर्हणाकृते तत्सहचरस्यैव नाम गृह्णाति), तस्माद्धेतोः तानि वित्तानि वोढुं गृहाद् इह भूमौ गोष्ठ्याम् शकट-यूथं यानसमूहं शूरोष्ट्रान् सद्वृषभान् लोके व्यवहरणीयान् खरान् दृढपशूनित्यर्थः, आनयध्वं प्रापयतेति संक्षेपः ॥

समासादिः- वित्तानि तु न कानि च नापि सन्ति, तथापि व्यङ्ग्यम् उद्गिरति शकटानां यूथम्, तत्पुरुषः । शूराश्चते उष्ट्राः शूरोष्ट्राः सन्तश्च ते वृषभाः सद्वृषभाः, लोके खराः लोकखराः, ततः सर्वेषां द्वन्द्वः ॥ १०१ ॥

इदानीं राधा युग्माभ्यां पद्याभ्यां वसन्ततिलकाशार्दूलविक्रीडितच्छन्दोभ्यां गिरिधारिणं विवदते—

तत् कृत्स्ननर्मलपितं ललितं निशम्य
थूत्कारकारकमपीन्दुसुधाप्रवाहे ।
आनन्दसंस्फुरितसात्त्विकभावभार-
मागुण्ठ्य वाम्यमधुरामधुरायताक्षी ॥ १०२ ॥

श्रीमद्गोष्ठवनेश्वरी रसकलालीलोज्ज्वलन्नागरी
भ्राजद्गोष्ठमहेन्द्रनन्दनमनोमाणिक्यपाटच्चरी ।
प्रोद्यत्पुष्पधनुःप्रबन्धविविधव्याकारवागीश्वरी
गान्धर्वा गिरिधारिणं विवदते वाङ्नृत्यविद्याधरी ॥ १०३ ॥

अन्वयः—इन्दुसुधाप्रवाहे थूत्कारकारकम् अपि (तासां सखीनां दृष्टौ) ललितं कृत्स्ननर्मलपितं तद् निशम्य आनन्द-संस्फुरित-सात्त्विक-भावभारम् आगुण्ठ्य वाम्य-मधुरा मधुरायताक्षी ।

रसकलालीलोज्ज्वलन्नागरी भ्राजद्गोष्ठमहेन्द्रनन्दन-मनो-माणिक्य-पाटच्चरी प्रोद्यत्पुष्पधनुः प्रबन्धविविध-व्याकार-वागीश्वरी वाङ्नृत्यविद्याधरी श्रीमद्गो-ष्ठवनेश्वरी गान्धर्वा (राधा) गिरिधारिणं विवदते ।

भावार्थः—राधिका-वाग्धारा इन्दुसुधाप्रवाहत्वेन निरूपितास्ति । अतिशयो-क्त्यलङ्काराय च सा वाग्धारा निगीर्णास्ति । केवलम् इन्दुसुधाप्रवाहा एव उपात्तोऽ-स्ति । तस्मिन् इन्दुसुधाप्रवाहे अर्थाद् राधावाग्धारेन्दुसुधाप्रवाहे थूत्कारं कारयतीति थूत्कारकारकम् अपि (तासां सखीनां दृष्टौ) ललितं प्रियं कृत्स्ननर्मलपितं तत् पूर्वोक्तं वाक्यं निशम्य श्रुत्वा आनन्देन संस्फुरितं संस्पृष्टं सात्त्विकभावस्य भारम् ओघम् आगुण्ठ्य आवध्य वामस्य भावो वाम्यं सौन्दर्यं तेन मधुरा मनोहरा, मधुरे आयते अक्षिणी यस्याः सा मृदुविशालनेत्रा ।

रसकलालीलया प्रोज्ज्वलन्ती नारी नागरी कुशला च, भ्राजन् योगोष्ठमहेन्द्र-स्तस्य नन्दनस्य मनोमाणिक्यस्य पाटच्चरो चोरिका, प्रोद्यतः पुष्पधनुषः कामदेवस्य प्रबन्धविविधव्यापारे वागीश्वरी अतिचतुरा वाचो नृत्ये वाङ्नर्तने विद्याधरी श्रीमती गोष्ठवनस्य ईश्वरी स्वामिनी गान्धर्वा राधिका देवी गिरिधारिणं श्रीकृष्णं विवदते वादं कर्तुं संन्तिष्ठत इति ।

समासादिः—अत्र राधिकावाग्धाराया विषयस्य निगीर्णत्वादतिशयोक्ति-रलङ्कारः । इन्दोः सुधायाः प्रवाहस्तस्मिन् इति तत्पुरुषः । कृत्स्नं नर्म-लपितं यस्मिन् इति बहुव्रीहिः तदिति पदेन सखीवाक्यं गृह्यते । आनन्देन संस्फुरितश्चासौ सात्त्विको भावः तस्य भारः तम् इति कर्मधारयगर्भस्तत्पुरुषः । अन्यसमासस्तु भावार्थे गतार्थः

'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम् ॥

इति युग्मलक्षणम् ॥१०२-१०३॥

सम्प्रति ओजस्विनी राधिका समयोचितं गर्जति वसन्ततिलकया छन्दसा—

स्वामिन्नुदासवनिता न वयं भवाम-
श्चन्द्रावलिर्न च वयं न च पद्मिका ते।
यद्गूढघोरगहने मिषतः करस्य
संलुण्ठनाय भवता बत रक्षिताः स्मः॥ १०४॥

अन्वयः—अये स्वामिन् (समर्थपुरुष इति सामान्याह्वानम्) वयं उदासवनिता न भवामः। वयं ते न च चन्द्रावलिः, न च पद्मिका (भवामः), यद् भवता गूढघोरगहने करस्य मिषतः संलुण्ठनाय वयं रक्षिताः स्म इति बत खेदविषयोऽयम्।

भावार्थः—राधिका श्रीकृष्णम् उपालभते—स्वामिन् समर्थ इति विपरीतलक्षणया व्यङ्ग्ये अकिञ्चित्कर इति। वयम् उदासवनिता सामान्ययोषितो न भवामः। न च ते तव चन्द्रावलिः न च पद्मिका भवामः। तस्मिन् काले नेपथ्यरचनार्थं ताम्बूलादिदानाय च कियत्यः चन्द्रावलिपद्मिकेत्यादि नाम्नाश्चेटचो भवन्ति स्मेति आचारो दृश्यते। यथा चन्द्रापीडस्य ताम्बूलकरण्डवाहिनीत्यादिः। यद् भवता गूढघोरगहनेऽत्र करस्य शुल्कदानस्य मिषतः छद्मना संलुण्ठनाय अपहरणाय रक्षिता निगृहीताः स्मः।

समासादिः—गूढं च तद् घोरं च तद् गहनम् इति गूढघोरगहनम् इति कर्मधारयः। नास्ति समासोऽत्र; किन्तु एतादृशाचारसूचकमेकं पद्यमिहोद्धरामि—

"न्यायागमादि मदुपेक्षितमप्यसारं
स्वीकृत्य केचिदधिकं मदमुद्वहन्ति।
निर्माल्यमुज्झितमपि प्रभुणा पृथिव्यां
चेटचो हि मूर्ध्नि विनिवेश्य परिभ्रमन्ति॥

अत्र हि प्रभूणां पार्श्वे चेटीनां स्थितिरुक्ता दृश्यते। इत्यलम्॥१०४॥

इदानीं श्रीकृष्णो राधां शास्ति वसन्ततिलकया—

राधे मुधा न कुरु वाद-विवादवृद्धि
ज्ञात्वा हितं मदुदितं मम देहि दानम्।
नो चेन्महामदन एष निशम्य रोषात्
संशास्ति तद् यदि तदा मम नास्ति दोषः॥१०५॥

अन्वयः—श्रीकृष्णो वक्ति—हे राधे (त्वं) मुधा वाद-विवादवृद्धि न कुरु। मदुदितं हितं ज्ञात्वा मम दानं देहि। नो चेत् महामदनः एषः (मधुमङ्गलमुद्दिश्य अङ्गुलीनिर्देशः) तद् निशम्य रोषाद् यदि संशास्ति चेत्, तदा मम दोषो नास्ति।

भावार्थः- स्पष्टमेव, कृष्णो वक्ति-हे राधे ! त्वं मुधा व्यर्थं वाद-विवाद-वृद्धिं परस्परं वादवृद्धिम् उत्तरप्रत्युत्तरवर्द्धनं न कुरु समाचर, मम कथनं हितं लाभप्रदं ज्ञात्वा मम सम्बन्धि दानं यद् मयोक्तं दानं देहि समर्पय । नो चेद् यदि नैवं करोषि चेत्, एष पुरःस्थितः महामदनः सौन्दर्यातिशयाद् मधुमङ्गलस्यैव व्यङ्गचेन महामदन इति अभिधानम् । तद् निशम्य वीक्ष्य रोषात् कोपात् संशास्ति चेत् मम दोषो नास्तीति भावः ।

समासादिः—वादश्च विवादश्चेति द्वन्द्वान्तरं तयोः वृद्धिस्तम् । ध्वनिमत्त्वादुत्तमं काव्यम् । अनुप्रासछटा दृशेलिमा ॥

इदानीं राधा स्ववचसा गोष्ठीमेव हासयति इति मन्दाक्रान्ताछन्दसा—चन्द्रावलीं सखीं द्वारीकृत्य कविर्ब्रूते—

मिथ्यैवायं सृजति नहि चेद्दानमेतत्ततोऽसौ
प्रेयश्चन्द्रावलि वरशिरःशापमङ्गीकरोतु ।
स्मित्वा गोवर्द्धनगिरिदरीगेहिनीरङ्गिणीत्थं
वाचां लास्यं सखि विदधती हासयामास गोष्ठीम् ॥१०६॥

अन्वयः—अयि चन्द्रावलि सखि ! अयं श्रीकृष्णः मिथ्यैव सृजति (स्ववाक्यम्) नहि चेत्, ततोऽसौ (एतत्सखा मधुमङ्गलः प्रेयः, एतद् दानं वरशिरः शापमङ्गीकरोतु, इत्थं वाचां लास्यं विदधती गोवर्द्धनगिरिदरीगेहिनीरङ्गिणी गोष्ठीं हासयामास ।

भावार्थः--महाकविरयं राधावचसा सर्वां गोष्ठीमेव हासयति, तथा हि—हे सखि चन्द्रावलि ! अयं श्रीकृष्णः मिथ्या स्वकपोलकल्पितमेव सृजति, नहि किञ्चित् तथ्यं तत्र । नहि चेद् अन्यथा इदं चेत् ततोऽसौ एतत्सखा मधुमङ्गलः प्रेयः अतिशयप्रियम्, एतद् वरशिरःशापं स्वस्माद् वरस्य श्रेष्ठस्य शिरःशापं वयं सर्वाः सख्यः श्रीकृष्णं शयामो यद् उपालभामहे तद् अङ्गीकरोतु स्वीकरोतु, इत्थं स्मित्वा ईषद्धास्यं विधाय वाचां लास्यं नर्मनर्तनम् विदधती कुर्वती गोवर्द्धनगिरिदरी-गेहिनी=गोवर्द्धनाचलगुहास्वामिनी चासौ रङ्गकर्त्री राधा गोष्ठीं हासयामास । सर्वा गोष्ठीस्थाः सख्यस्तद्वचसा जहसुरित्यर्थः ।

समासादिः—वरस्य शिरः तस्य शापः, तत्पुरुषः । शापोऽत्र उपालम्भः । गोवर्द्धनश्चासौ गिरिस्तस्य दरी तस्या गेहिनी, रङ्गिणीति पृथग् विशेषणं राधायाः । "दरी तु कन्दरो वा स्त्री देवखातविले गुहा" । इत्यमरः ॥ १०६ ॥

इदानीं मधुमङ्गलो विशाखां सखीमुपहसितुं श्रीकृष्णं प्रेरयति वसन्ततिलका छन्दसा—

शुद्धाभिभाति च धिया शुभया विशाखा
वैदग्ध्य नर्मनिपुणा भवदन्तरङ्गा ।
तस्मात्तया सह विचार्य विचार्य कार्यं
कान्त ! ललितामतिमाशु मुञ्च ।।१०७।।

अन्वयः—हे कान्त ! (श्रीकृष्ण) विशाखा सखी वैदग्ध्यनर्मनिपुणा शुभया धिया च शुद्धा भवदन्तरङ्गा अभिभाति । तस्मात् तया सह विचार्य विचार्य कार्यम् अनुष्ठेयम्, प्रमत्तललितामतिम् आशु मुञ्च ।

भावार्थः--मधुमङ्गलः विशाखां सखीम् उपहसितुकामः श्रीकृष्णं प्रेरयति--हे कान्त प्रिय ! विशाखा सखी वैदग्ध्यनर्मनिपुणा चातुर्येण क्रीडाकौतुककर्मणि कुशला शुभया बुद्धया च शुद्धा भवदन्तरङ्गा अभिभाति विराजते । तस्मात्तया सह विचार्य विचार्यं कार्यम् व्यवहर्तव्यम्, (अत्र कार्यमिति क्रियापदम्) प्रमत्तललितामतिं प्रमादिन्या ललितायाः मतिं बुद्धिम् मुञ्च त्यज । अद्य यावत् तत्प्रेरणया चलति स्म नाग्रे तत्प्रेरणा ग्राह्या, किन्तु विशाखा तेऽग्रे सचिवा विशेषतः स्यादिति भावः ।

समासादिः--वैदग्ध्यं विदग्धाया भाव इति भावार्थे ष्यञादिवृद्धौ वैदग्ध्येन नर्मणि निपुणेति तत्पुरुषः, भवतोऽन्तरङ्गेति तद्वत् । 'सर्वस्य द्वे—८।१।१' इत्यधिकारे 'नित्यवीप्सयोः—८।१।४' इति द्वित्वे विचार्य विचार्य ।। १०७ ।।

सम्प्रति विशाखा उत्तुङ्गीभूय श्रीकृष्णमुत्तरयति तेनैवच्छन्दसा--

दानीन्द्रचन्द्र ! भवतः स्तवतो बताहं
प्राप्ता सुखं तदिह तेऽपि सुखानि दातुम् ।
द्रष्टुं भवन्मधुरधाष्टर्च-भुजङ्गनृत्य
मुक्ताभिमन्यु गरुडं तरसा नयामि ।।१०८।।

अन्वयः—हे दानीन्द्रचन्द्र ! भवतः स्तवतः अहं सुखं प्राप्ता बत इति हर्षविषयोऽयम् । तत् (तस्मात् कारणात्) ते (तुभ्यम्) अपि सुखानि दातुं—भवन्मधुरधाष्टर्च-भुजङ्गनृत्यं द्रष्टुं तरसा उक्ताभिमन्युगरुडं नयामि ।

भावार्थः—हे दानीन्द्रचन्द्र ! श्रीकृष्ण ! भवतः स्तवतः स्तुतेः अहं विशाखा सुखं प्राप्ता बत हर्षास्पदमेतत् । तत् तस्माद्धेतोः ते तुभ्यं सुखानि दातुम् अर्पितुं भवतः मधुरधाष्ठम्भस्य भुजङ्गवन्नृत्यम् द्रष्टुम् तरसा वेगेन उक्तः शास्त्रादिषु अभिहितो यो हि अभिमन्युः कृष्णभागिनेय इव गरुडस्तम् आनयामि । पक्षे अभिमन्युश्चासौ गरुडस्तम् आनयामि । अर्थोऽस्य अभितः सर्वतः मन्युः क्रोधो यस्य सः, तम् आनयामि । अत्र कृष्णार्जुनयुद्धे अभिमन्युना कृष्णः पराजितोऽजनि; इति पौराणिकीं कथां व्यञ्जयति ।

समासादिः—दानिषु इन्द्रः स चासौ चन्द्र इति कर्मधारयः। मधुरं च तद् धाष्टर्च्यं भवतः मधुरधाष्टर्च्यं तेन भुजङ्गवद् नृत्यम्, उपमितसमासः। अत्रापि भुजङ्गनृत्यकर्तुस्ते धमकोऽभिमन्युगरुडः, इति श्लेषगर्भो रूपकालङ्कारः। ध्वनिश्च भुजङ्गशत्रुर्गरुड इत्यादिरित्युत्तमकाव्यम्। अनुप्रासछटा तु दर्शनीयैव ॥ १०८ ॥

व्यङ्गचमुदीर्य गोष्ठीं त्यक्त्वा गृहं गन्तुकामा विशाखा रुध्यते कृष्णेन तच्छन्दसा—

एवं निगद्य रभसान्मनसाऽतिहृद्या
रम्या महिष्ठ-गणनर्मभिरद्यसद्यः।
सद्मानि पद्म-वदना चलितुं समुत्का
रुद्धा हठेन हरिणा कठिना विशाखा ॥१०९॥

अन्वयः—मनसा अतिहृद्या (उपरितः) कठिना महिष्ठगणनर्मभिः (सह) अद्य (तत्काले) रम्या पद्मवदना विशाखा (सखा) एवं निगद्य रभसात् सद्मानि चलितुं समुत्का (सती) हरिणा हठेन रुद्धा।

भावार्थः--यद्यपि अन्वये स्पष्टोऽप्यर्थोऽतिरम्यानुप्राससाम्यात्समुदीर्यते पुनः। मनसा अन्तरङ्गेण नारिकेलफलवद् अतिहृद्या अमृततुल्यस्वाददा उपरि कठिना कठोरा अतिमान्यसखिवृन्दानां क्रीडाकौतुकैः सह अद्य तत्काले रम्या रन्तुं योग्या पद्म-वदना कमलगन्धिमुखी विशाखा अभ्यर्हिता सखी ईदृशं रमणीयं निगद्य उक्त्वा रभसाद् वेगेन सद्मानि स्वभवनानि (बहुवचनमाढचतां गमयति) चलितुं गन्तुं समुत्का उत्कण्ठिता सती हरिणा श्रीकृष्णेन हठेन बलाद् रुद्धा वारिता प्रेमरज्ज्वा बद्धेति यावत्।

समासादिः—अतिशयेन महान्त इति विगृह्य 'अतिशायने तमबिष्ठनौ—५।३।५५' इतीष्ठनि महिष्ठाः, तेषां गणस्य नर्माणि तैः (तत्पुरुषः)। अत्र आद्यपदं तत्कालपरम्। वि विशाखा यस्या इति बहुव्रीहिणा बहुविभवेति व्यङ्गचम्। अनुप्रासशालि ध्वनिकाव्यम् ॥१०९॥

इदानीं चित्रा सखी सर्वाः सखीरुद्बोधयति (छन्दोदूरगं तदेवाग्रे)--

संरक्ष्य धर्ममबलाः सबलादमुष्मात्
कामाद्विमुक्तकुलकर्मसमस्तधर्मात् ।
व्याघुटच यात गृहमेव सतीत्ववत्यः
किं वा घटीरिह समर्प्य सुयज्ञशालाम् ॥ ११० ॥

अन्वयः--(चित्रा सखी वक्ति)—हे अबलाः सतीत्ववत्यः सख्यः। सबलात् कामाद् विमुक्तकुलकर्मसमस्तधर्माद् अमुष्माद् धर्मं संरक्ष्य व्याघुटच गृहम् एव यात इह सुयज्ञशालां घटीः समर्प्य किं वा फलमिति।

भावार्थः--चित्रा सखी सर्वा अपि सखी प्रबोधयति--यद् हे अबला भीरवः सतीत्ववत्यः सतीत्वव्रतशालिन्यः सख्यः! सबलाद् बलशालिनः कामाद् उच्छृंखलतयैव विमुक्तकुलकर्मसमस्तधर्माद् अमुष्मात् प्रसिद्धधृष्टात् कृष्णाद् धर्मं निजसतीत्वधर्मं संरक्ष्य गोपयित्वा व्याघुटच व्यावृत्य निवृत्येत्यर्थः, गृहं निजभवनम् एव यात निवर्तध्वम् यूयम्। इह ब्रजवने सुयज्ञशालम् घटीः घृत-सुवर्णकलसान् समर्प्य दत्वा किं वा फलम्, न किमपीति काकुः।

समासादिः--न बलं यासां ताः, बलेन सह विद्यते, इत्युभयत्र बहुव्रीहिः। विमुक्ताः कुलकर्माणि च समस्तधर्माश्च येनेति द्वन्द्वगर्भो बहुव्रीहिः। सुन्दरी चासौ यज्ञशालेति द्वन्द्वः। व्यतिरेकलक्षणया कुयज्ञमित्यर्थः। सानुप्रासो ध्वनिकाव्यम्।

इदानीं तुङ्गविद्या सखी चित्रां सखीं सम्बोधयति--

चित्रोक्तमित्थमधिगत्य रुचेव तुङ्ग-
विद्या जगाद कुटिलभ्रुवमुन्नयन्ती।
जात्यातिभीततर-गोपकवाक्यमात्रान्-
मुग्धे मुधैव कथमत्र बिभेषि चित्रे॥ १११॥

अन्वयः--इत्थं चित्रोक्तम् अधिगत्य रुषा इव कुटिलभ्रुवम् उन्नयन्ती तुङ्गविद्या (सखी) मुग्धे चित्रे! जात्या अतिभीततरगोपक-वाक्यमात्राद् अत्र कथं बिभेषि। इति जगाद।

भावार्थः--इत्थम् एवं प्रकारेण चित्रया सख्या उक्तं वाक्यमधिगत्य ज्ञात्वा रुषा रोषेण इव कुटिलभ्रुवं स्वभावत एव वामं भ्रुवम् उन्नयन्तीं तुङ्गविद्यानाम्नीं सखीं, मुग्धे चित्रे! जात्या स्वभावेनैव अतिभीततरगोपकवाक्यमात्राद् अत्र वाग्युद्धे कथं बिभेषि। इति जगाद उक्तवतीति भावार्थः।

समासादिः--अतिभीततरश्चासौ गोपकः तस्य वाक्यमात्रं तस्मात्। कर्मधारयगर्भस्तत्पुरुषः। अल्पो गोपः गोपकः 'अल्पे--५।३।८५' इति कन्। वाक्यमेव वाक्यमात्रम्, 'स्वार्थे द्वयसज्-मात्रचैः बहुलम्--'५।२।३७' इति वार्तिकबलान्मात्रच्॥ १११॥

सम्प्रति शूरा ललिता राधापक्षे ब्रूते--

राधा सदा जयति गोष्ठवनाधिनाथा
तस्याः प्रचण्डसचिवा ललिता च शूरा।
पश्चाद्य तद्वनविनाशकगोकरार्थं
बध्वा नयाम मधुमङ्गलभण्डविप्रम्॥ ११२॥

अन्वयः--(स्वयं ललिता ब्रूते--हे सखिः) गोष्ठवनाधिनाथा राधादेवी सदा जयति (सर्वोत्कर्षेण वर्तते)। तस्याः प्रचण्डसचिवा शूरा ललिता च जयति।

तद्वनविनाशकगोकरार्थम् अद्य (वयं सर्वाः) मधुमङ्गलभण्ड विप्रं बध्वा नयाम इति पश्य इति सामान्यतः काचिदेकां सखीं सम्बोधयति ।

भावार्थः—प्रचण्डशूरा सचिवा ललिता स्वस्वामिनीं राधामुत्कर्षयन्ती ब्रूते यद् गोष्ठवनाधिनाथा राधा स्वामिनी सदा जयति । तथैवाहमपि तस्याः प्रचण्ड-सचिवा शूरा ललिता जयामि, तद्वनविनाशकगोकरार्थम् अद्य वयं सर्वाः सख्यः मधुमङ्गलनामानं भण्डविप्रं कृष्णसखायं बध्वा नयाम इति पश्येति सामान्येन काञ्चन सखीं सम्बोधयति इति ।

समासादिः—तस्या वनं तस्य विनाशकाः । गवे करःगोकरः तद्विनाशकेभ्यः गोकरः तद्विनाशकगोकराय इति तद्विनाशकगोकरार्थं बध्वा नयाम इति क्रिया विशेषणतया द्वितीया ॥११२॥

ततोऽन्या सखी वक्ति

श्रुत्वा तदीयवचनं मधुमङ्गलं तं
भीत्या तदाऽत्मसविधे सुबलादिमध्ये ।
सङ्कुच्य तत्र चकितं चकितं वसन्तं
चण्डं जगाद विहसन् सखि कृष्णचन्द्रः ॥ ११३ ॥

अन्वयः—(काचन सखी अपरां सखीं वक्ति) हे सखि तदा तदीयवचनं श्रुत्वा भीत्या तत्र आत्मसविधे सुबलादिमध्ये सङ्कुच्य चकितं चकितं वसन्तं चण्डं तं मधुमङ्गलं विहसन् कृष्णचन्द्रः जगाद ।

भावार्थः—एका सखी अपरामाह—अयि सखि ! तदा तदीय-वचनं ललिता वाक्यं श्रुत्वा आकर्ण्य भीत्या भयेन तत्र आत्मसविधे स्वसमीपे सुबलादिमध्ये सङ्कुच्य चकितं चकितं वसन्तं चण्डम् अत्यन्तकोपनं तं मधुमङ्गलं विहसन् स्मितं कुर्वन् जगाद गदति स्मेति ।

समासादिः—तस्या (ललितायाः इदं तदीयम्--'त्यदादीनि च -१।१।७४' इति वृद्धत्वात् 'वृद्धाच्छः—४।२।११४' इति छः । 'नित्यवीप्सयोः—८।१।४' इति द्वित्वे चकितं द्विः । 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः ॥११३॥

श्रीकृष्णः किमाह तच्छ्रवणीयं हास्यरसत्वात्—

मा भैर्महाक्षितिसुरोत्तम ! मद्विधस्य
साक्षादमुष्य नरसिंहवरस्य दृष्ट्या ।
चण्डी प्रचण्ड-ललितापि च तुङ्गविद्या
सा भैरवी द्रुतमवैष्यति वीतवस्त्रा ॥ ११४ ॥

अन्वयः—श्रीकृष्णः उपहसति—अये महाक्षितिसुरोत्तम ! (त्वम्) मा भैः (भयं नैव कुरु) कञ्चन समीपस्थितं स्वसखायं निर्दिश्य वक्ति —मद्विधस्य साक्षाद्

नरसिंहवरस्य अमुष्य (अङ्गुल्या निर्दिशति) सख्युः दृष्टचा चण्डी, प्रचण्डललिता, अपि च तुङ्गविद्या सा भैरवी वीतवस्त्रा सती (इतः) द्रुतम् अपैष्यति ।

भावार्थः--श्रीकृष्णः उभयपक्षगोष्ठीं हासयितुं मधुमङ्गलं महाविप्रं विदधाति, तथा हि अयि महक्षितिसुरेषु महाब्राह्मणेषु उत्तम ! मा भैः, भीतो न भव । कञ्चन सखायं नरसिंहत्वेन कल्पयन् अङ्गुल्या निर्दिशति–मद्विधस्य मत्तुल्यस्य साक्षाद् नरसिंहवरस्य अमुष्य (अङ्गुल्या निर्दिशति) सख्युः दृष्टचा चण्डी, प्रचण्डा चासौ ललिता, अपि च पुनः तुङ्गविद्या सा प्रसिद्धा भैरवी प्रधानदेवी राधा विदुषी वीतवस्त्रा उपेक्षितवसना सती अपैष्यति पलायिष्यते । हास्यो रसः । प्रसादो गुणः ।

समासादिः--अत्र 'महाक्षितिसुरशब्दो' हि हास्यार्थं प्रयुक्तो दृश्यते । यतो हि--

शंखे तैले तथा मांसे वैद्ये ज्यौतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥

निन्दावाचकत्वात्शंखादिशब्दैः सह महच्छब्दप्रयोगो निषिद्धोऽपि प्रयुक्तस्तत्र हास्यरस एव हेतुः । क्षितेः सुरः क्षितिसुरः, महान्तश्च ते क्षितिसुरास्तेषु उत्तम इति मध्यकर्मधारयस्तत्पुरुषः । 'माङि लुङ्--३।३।१७५' इति लुङ् 'न माङ्-योगे--६।४।७४' इत्यण्निषेधः । 'सिचि वृद्धिः परस्मैपदेषु--७।२।१' इति वृद्धिः ॥११४॥

हास्यमेवावतारयत्यग्रेऽपि क्रीडाकृत्कृष्णः–

तूर्णं हिरण्यकशिपुं भगवन्नृसिंह !
चन्द्रावली कटुकुचं नखरैर्विदार्य ।
प्रह्लादमुल्लसितमाशु कुरु त्वमित्या-
कर्ण्यैव वल्गु ललिता लपितं जहास ॥११५॥

अन्वयः—पुनः श्रीकृष्ण उपहसति–हे भगवन् नृसिंह ! त्वं तूर्णं चन्द्रावली—कटुकुचं हिरण्यकशिपुं नखरैः विदार्य्य आशु प्रह्लादम् उल्लसितं कुरु । इति वल्गु ललितं श्रीकृष्णस्य लपितम् आकर्ण्य एव ललिता जहास ।

भावार्थः—श्रीकृष्णोऽतृप्यन् पुनरुपहसति--हे भगवन् नृसिंह ! त्वं तूर्णं शीघ्रं चन्द्रावलीकटुकुचं तन्नाम्न्याः सख्याः कठिनस्तनं हिरण्यकशिपुं (हिरण्यं कशिपुः शय्या यस्य स तम्, हिरण्यशय्याशायिनं तदीयं कटुकुचम् पक्षे हिरण्यकशिपुं प्रह्लादपितरमितिश्लेषः) नखरैः स्वनखैः विदार्य प्रह्लादम् उल्लसितम् आनन्दातिशयं स्फुटितं पक्षे प्रह्लादं हिरण्य-कशिपुसुतं हर्षितं कुरु इति वल्गु सुन्दरं श्रीकृष्णस्य लपितं आकर्ण्य निशम्य एव पूर्वं कोपनाऽपि ललिता जहास उच्चैर्हसितवतीत्यर्थः ।

समासादिः—अत्र श्लेषगर्भितो रूपकालङ्कारः, कुचे हिरण्यकशिपुत्वारोपात्, प्रह्लादे प्रसिद्ध-प्रह्लादारोपाच्च चमत्कारातिरेकात् ललिताया हठाद् हासः। अत्र लेखकप्रमादाद् आकर्ण्यैष इति ऊष्मषकारः। अन्तःस्थवकार एव सः। कृष्णप्रसङ्गेऽन्यस्यालपनं विरुद्धम् ॥११५॥

पुनः श्रीकृष्णो राधामेवोपहसति--

चेद् गन्तुमिच्छसि सखीनिवहेन सार्द्धं
राधे ! समृद्धधन भूषणलोभतस्त्वम् ।
तद्गच्छ किन्तु ललितेह ममाच्छकच्छे
संरक्ष्यतां प्रतिनिधिः पुनरेषि यावत् ॥११६॥

अन्वयः—श्रीकृष्णः कथयति—हे राधे ! चेत् त्वं समृद्धधनभूषणलोभतः सखीनिवहेन सार्द्धं गन्तुम् इच्छसि, तद् गच्छ; किन्तु इह मम अच्छकच्छे ललिता (सखी) प्रतिनिधिः संरक्ष्यताम्, यावत् पुनः एषि अत्रेति ।

भावार्थः---कृष्ण एवोपहसिता पुना राधामुपहसति—हे राधे ! चेद् यदि त्वं समृद्धधनभूषणलोभतः सखीनिकरेण सह गन्तुम् इच्छसि, तद् गच्छ, न कोऽपि निरोधः; किन्त्विह गोष्ठ्यां ममाच्छकच्छे सुन्दरप्रकोष्ठललिता प्रियसचिवा प्रतिनिधिः संरक्ष्यतां स्थाप्यताम्, यावत् त्वं पुनः एषि आगच्छसीति ।

समासादिः—समृद्धानि च तानि धन-भूषणानि तेषां लोभस्तस्मात् । 'पञ्चम्यास्तसिल्—५।३।७' इति तसिल्प्रत्ययः। रक्षतेः कर्मवाच्ये रूपम् ॥११६॥

ललिता सखी समुचितमुत्तरयति—

या येन केन महता रतहिण्डकेह
हस्तस्तवैव विधिना बत पातिताः स्मः ।
किन्त्वद्य पश्य तरसा वचसां तवैषां
शान्तिं प्रसिद्धललिता ददती किलास्मि ॥११७॥

अन्वयः--हे रत-हिण्डक ! इह या वयं येन केन महता विधिना (बागुरायाम्) पातिताः स्मः । बत इति खेदे, तत्र तव एव हस्तः (अस्ति); किन्तु प्रसिद्धललिता (अहम्) अद्य तव एषां वचसां तरसा शान्तिं ददती किल अस्मीति पश्य ।

भावार्थः--सम्प्रति प्रचण्डललितैव प्रचण्डमुत्तरयति--हे रतहिण्डक अनुरक्तवञ्चक ! इह गोष्ठ्यां या वयं सख्यो येन केनापि महता विधिना प्रकारेण पातिताः स्मः । बत इति खेदे, तत्र तवैव हस्तः (अस्ति); किन्तु प्रसिद्धललिता नाम्नी सखी अहम् अद्य तव एषां समक्षे समुदीरितानां वचसां तरसा झटित्येव शान्तिं दमनं ददती कुर्वती किल अस्मीति भावः ।

समासादिः---रतश्चासौ हिण्डक इति कर्मधारयः, तत्सम्बुद्धौ। प्रसिद्धासौ ललिता प्रसिद्धललिता, 'पुंवत् कर्मधारयजातीयदेशीयेषु—६।३।४२' इति पुंवद्भावः ।।११७।।

सम्प्रति सैव सखीगणानादिशति वियोगिनीछन्दसा----इति कापि सख्यपरं वक्ति—

इति तं प्रतिभाष्य कर्कशं ललिता रोषकषायरुषिता।
निकटे कपटैः सखीगणानवदत् सुन्दरि सारसोन्मदा ।।११८।।

अन्वयः—सखी कापि वक्ति हे सुन्दरि! इति कर्कशं तम् प्रतिभाष्य रोषकषायरुषिता सारसा उन्मदा ललिता निकटे कपटैः (सह) सखीगणान् अवदत्।

भावार्थः--प्रचण्डसचिवा ललिता सखी हि प्रतिपक्षमानमर्दिनी अस्तीति, सैव तत्रावदत्–इति कापि सखी सख्यन्तरं ब्रूते--इति इत्थं तं श्रीकृष्णं प्रतिभाष्य उत्तरयित्वा रोषकषायरुषिता सरसा उन्मदा ललिता निकटे तस्यैव श्रीकृष्णस्य समीपे कपटैः छद्मभिः सह सखीगणान् स्वसखीनिकरान् अवदत् उवाचेति।

समासादिः---रोष एव कषायः कलुषस्तेन रुषिता दीप्ता। इति कर्मधारयगर्भस्तत्पुरुषः। रसेन सहिता सारसा उत्कटो मदो यस्याः सा। अत्र 'ससजा विषमेगुरुः समे समरालोऽथ गुरुवियोगिनी' इति वियोगिनीलक्षणम्। तस्यैव छन्दसः सुन्दरीति नामान्तरम्।

सम्प्रति ललितादेशं विवृणोति वसन्ततिलकया छन्दसा—

आर्य्यामिहानयतु तूर्णमितासु देवी
चित्राऽचिरेण कुटिलां जटिलां सपुत्राम्।
वृन्दोत्तमं सपदि याज्ञिकविप्रमेक-
मालोकितं नटनमस्य नटेन्द्रभर्तुः ।। ११९ ।।

अन्वयः--नामनिर्देशं ललिता सखीराज्ञापयति—नरेन्द्रभर्तुः अस्य नटनम् आलोकितुम् इतासु (सखीसु) देवी इह तूर्णम् आर्य्याम् आनयतु। सपदि वृन्दा उत्तमम् एकं याज्ञिकविप्रम् आनयतु। चित्रा अचिरेण सपुत्रं कुटिलां जटिलाम् आनयतु।

भावार्थः—तदानीं कापि प्रथा सूच्यते, यदा नृत्यं भवति स्म, तदा काचन अध्यक्षा भवति स्म, ततः कोऽपि याज्ञिको विप्रो मन्त्रं पठितुं तिष्ठति स्म। कापि सपुत्रा जटिला कुटिलानामिका नारिकापि नृत्यानुकरणं कर्तुं तिष्ठति स्मेति सूच्यते। तां तं तामानेतुं ललिता पृथक् पृथग् नाम्ना सखीं प्रेरयति--अहो अस्य नटेन्द्रभर्तुर्नटराजस्य श्रीकृष्णस्य नटनं नृत्यम् अवलोकितुम् इतासु समुपस्थितासु सखीषु देवी सखी आर्याम् अध्यक्षां तूर्णम् आनयतु। वृन्दा सखी सपदि उत्तममेकं याज्ञिक-

विप्रं, नयतु (मन्त्रं पठितुम्), चित्रा सखी अचिरेण शीघ्रमेव (अनुकर्तुम्) सपुत्रां जटिलां जटाधारिणीं कुटिलां नारीमानयतु। इत्युपहासयति कृष्णं चण्डसचिवा ललितेति भावार्थः।

समासादिः—उपहासयितुम् ललिता पारिभाषिक शब्देन प्रसादगुणकं पद्यं वक्तीति नास्ति कोऽपि समासः। केवलं तदानीन्तनी प्रथामात्रं सूच्यते। यद् नृत्यारम्भे कापि श्रेष्ठा नारी अध्यक्षा भवति स्म, कोऽपि यज्ञिको विप्रो मन्त्रपाठकः तिष्ठति स्म। कापि सपुत्रा प्रसिद्धा कुटिलगात्रा नारी नृत्यानुकर्त्री तिष्ठन्ती नर्तकस्यानुकरणं कुर्वती जनान् हासयतिस्म। इति सर्वं सूच्यतेऽनेन पद्येनेत्यलम् ॥११९॥

ततः काचित् काञ्चन सखीं सम्बोधयति तेनैव च्छन्दसा—

इत्थं तया ललितया लपितं सरोष-
माकर्ण्य गोष्ठरमणी-धृत-चित्तवृत्तिः।
ईषद्विहस्य दर वीक्ष्य च राधिकां तां
संव्याजहार रुचिरं सखि गोष्ठचन्द्रः॥ १२० ॥

अन्वयः—काचन सखी काञ्चन सखीं वक्ति—अयि सखि! सरोषं तया ललितया इत्थं लपितम् आकर्ण्य ईषद् विहस्य तां राधिकां च दर वीक्ष्य गोष्ठरमणी-धृत-चित्त-वृत्तिः गोष्ठचन्द्रः संव्याजहार।

भावार्थ—ललितालापानन्तरम् एका सखी अन्यां सम्बोधयति—अयि सखि! तया प्रचण्डसचिवया ललितया सरोषं यथा स्यात्तथा क्रियाविशेषणमिदम्, इत्थं लपितम् उद्गीर्णवाक्यम् आकर्ण्य ईषद् विहस्य स्मितं कृत्वा तां प्रसिद्धां राधिकां च दर वीक्ष्य ईषद् निरीक्ष्य गोष्ठ-रमणी-धृत-चित्त-वृत्तिः राधिकासक्तमनाः गोष्ठचन्द्रः श्रीकृष्णचन्द्रः संव्याजहार व्याचक्षे इति।

समासादिः- गोष्ठस्य रमणी तस्यां धृता चित्तस्य वृत्तिः येनासौ। तत्पुरुषगर्भो बहुव्रीहिः। गोष्ठस्य चन्द्रः। इति तत्पुरुषः। दर इत्यव्ययम् ईषदर्थे इति विश्वकोशः। संवि आ इत्युपसर्गत्रयसम्पृक्तो हृधातुः व्यक्तवाचि प्रयुज्यते॥ १२०॥

सम्प्रति कृष्णचन्द्रव्याहरणं विवृणोति शार्दूलविक्रीडितेन च्छन्दसा--

गर्वाद् यस्य मदीयदानमनिशं युष्माभिरुल्लङ्घ्यते
मन्येऽहं च तृणाय नैव कुटिले दानैरलं तस्य वः।
पश्याद्यैव तदेब नव्य-विकसत्तारुण्य-रत्नं मया
वक्षोजे परिभूय शूरललिता राधेऽधुना लुण्ठ्यते॥ १२१॥

अन्वयः—श्रीकृष्णो राधामेवोपहसति—तथा हि अयि कुटिले राधे! युष्माभिर्यस्य गर्वाद् मदीयदानम् अनिशम् उल्लङ्घ्यते, तस्य दानैः अलम् अहं

वः तृणाय च नैव मन्ये। अद्यैव पश्य मया तदेव नव्यविकसत्तारुण्यरत्नं वक्षोजे परिभूय अधुना शूरललिता आलुण्ठचते।

भावार्थः---श्रीकृष्णः प्रधानं राधामेव सम्बोधयति - अयि कुटिले राधिके ! युष्माभिः सर्वाभिरपि सखीभिः यस्य गर्वाद् अभिमानाद् मदीयदानम् अनिशं सदैव उल्लङ्घचते तिरस्क्रियते। तस्य दानैः अलं व्यर्थम्। अहं वः युष्मान् तृणाय च नैव मन्ये। तुच्छतरं जाने। अद्यैव पश्य अवलोकय मया तदेव युष्मद्गर्वाधारं नव्यविकसत्तारुण्यरत्नं वक्षोजे कुचद्वयम् अभिभूय अधुना सपद्येव शूरललिता वीर मान्या आलुण्ठचतेऽपह्नियते। किं करिष्यसीति भावः।

समासादिः---नव्यं च तद् विकसत् तारुण्यमेव रत्नम्, कर्मधारयः, मयूरव्यंसकादिसमासः। वः तृणाय मन्ये इत्यत्र 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु—२।३।१७' इति चतुर्थी॥ १२१॥

सम्प्रति कृष्णकर्मणा सखीनां पलायनमभिनयति मन्दाक्रान्ताछन्दसा—

इत्यालप्य स्मरविलसितैः स्प्रष्टुमुक्ते मुकुन्दे
भीत्येवैतास्तत इत उतः स्मेर वक्त्रारविन्दाः।
क्रूरं तिर्यङ् नटननयनैः शश्वदालोकयन्त्यः
प्रेमान्धास्तं प्रियसखिरसेनापसस्रुः समन्तात्॥ १२२॥

अन्वयः---स्मरविलसितैः इति आलप्य मुकुन्दे स्प्रष्टुम् उक्ते (सति) स्मेर वक्त्रारविन्दाः प्रेमान्धा एताः नटननयनैः तं क्रूरं तिर्यक् शश्वद् आलोकयन्त्यः भीत्या इव तत इत उतः प्रियसखिरसेन समन्तात् अपसस्रुः।

भावार्थः---स्मरस्य कामदेवस्य विलसिते विलासशालिभिः वाक्यैः इति इत्थं आलप्य अभिधाय मुकुन्दे कृष्णे स्प्रष्टुं ललितामालिङ्गितुम् उक्ते सति स्मेरं वक्त्रारविन्दाः हसितमुखकमलाः प्रेमान्धा एताः सर्वा अपि सख्यः नटननयनैः नर्तनकर्मकुशलैः नयनैस्तम् प्रियसखिरसेन प्रियसख्युः प्रेमरसेन क्रूरं तिर्यक् च शश्वद् निरन्तरम् आलोकयन्त्यः पश्यन्त्यः भीतया भयेन इव ततः तस्मात् स्थानाद् इत उतः समन्तात् सर्वस्यां दिशि सर्वदिक्षु इति यावत्, अपसस्रुः पलायितवत्यः।

समासादिः---स्मेरं वक्त्रारविन्दं यासां ताः। इति बहुव्रीहिः। प्रेम्णा अन्धा इति तत्पुरुषः। प्रियश्चासौ सखा (श्रीकृष्णः) तस्य रसेन अनुरागेणेत्यत्र तत्पुरुषः कर्मधारयगर्भः॥ १२२॥

इदानीं राधिका तर्केण कृष्णमुपहसति तेनैव च्छन्दसा—

नित्यं राजन्वति जनपदे दिव्यगव्योपहारै-
र्यातायातं विदधति जना गोष्ठतः कोटिसंख्याः।

नैतेभ्यः किं स्पृहयति भवान् दानमादातुमेतत्
सत्यं चेद् व्रज गिरिवने घट्टपट्टाधिपत्यम् ॥ १२३ ॥

अन्वयः—राधिका तर्केण कृष्णमुपहसति--नित्यं कोटिसंख्यकाः जनाः राजन्वति जनपदे दिव्यगव्योपहारैः (सह) गोष्ठतः यातायातं विदधति। सत्यं चेत् ते व्रजगिरिवने घट्टपट्टाधिपत्यम्, (तर्हि) एतेभ्यः भवान् किं न एतद् दानम् आदातुं स्पृहयति, अस्मान् एव कथं निरुणद्धि। इति काकुः।

भावार्थः- --राधिका तार्किकतया कृष्णमुपहसति----नित्यं कोटि-संख्यकाः जनाः राजन्वति सुराजस्वामिके नीतिज्ञनृपाधिष्ठिते जनपदे मण्डले दिव्यगव्योपहारैः सह (सहार्थे तृतीया) गोष्ठतः गोष्ठस्थानाद् यातायातं गमागमं विदधति कुर्वन्ति। व्रजगिरिवने तव घट्टपट्टाधिपत्यं घट्टपट्टस्वामित्वम् सत्यं चेद् यदि अस्ति, तर्हि भवान् एतेभ्यः जनेभ्यः किं न कथं न एतद् अस्मद्ग्राह्यं दानं स्पृहयति अभिलषति। तेभ्योऽपि गृह्णातु, अस्मानेव कुमारीः कथं निरुणद्धि।

समासादिः----'राजन्वान् सौराज्ये—८।२।१५' इति निपाताद् राजन्वान् इति सिध्यति। व्रजगिरेः वनम्, तस्मिन्। घट्टपट्टस्य अधिपत्यम्। तत्पुरुष उभयत्र ॥१२३॥

सम्प्रति स्वयं कृष्णो राधामुत्तरयति पृथ्वीछन्दसा ललितेन---

इति प्रकट-राधिकावचनमाकलय्यप्रभु-
र्नटन्नयनभङ्गिभिर्निटिलमीषदुच्चालयन् ।
अशेषरसिकाग्रणीः सुखभरेण रज्यन्मना-
स्तथापि बहिरुद्धसन्निव जगाद गान्धर्विकाम् ॥ १२४ ॥

अन्वयः----अशेषरसिकाग्रणीः प्रभुः (इति प्रज्ञाचक्षुर्महाकविः स्वश्रद्धातिशयात् कल्पितं विशेषणं श्रीकृष्णाय ददाति) इति (पूर्वोक्तम्) प्रकटः राधिका वचनम् आकलय्य नयनभङ्गिभिः नटन् निटिलम् ईषद् उच्चालयन् (यद्यपि , सुखभरेण रज्यन्मनाः, तथापि बहिः उद्धसन् इव गान्धर्विकां जगाद।

भावार्थः---प्रज्ञाचक्षुर्महाकविः श्रद्धातिशयाद् अशेषरसिकाणाम् अग्रणीः प्रभुः मम श्रीकृष्णचन्द्रः इति इत्थं तर्कशालिप्रकटमेव स्पष्टमित्यर्थः, राधिकायाः प्राणवल्लभायाः वचनम् आकर्ण्य श्रुत्वा नयनभङ्गिभिः नटन् नृत्यन् भ्रुवौ विक्षिपन् निटिलं भालं च ईषद् किञ्चित् उच्चालयन् यद्यपि सुखभरेण आनन्दप्रचयेन रज्यन्मनाः बभूव। तथापि बहिः बाह्यवृत्त्या उद्धसन् आत्मानम् उत्कटं द्योतयन् गान्धर्विकां प्रियां गान्धर्वां जगाद व्याजहार।

समासादिः----अशेषाश्च ते रसिकास्तेषां तेषु वा अग्रणीः। इति कर्मधारयगर्भो हि तत्पुरुषः। प्रिया राधा राधिका अनुकम्पितेत्यर्थः। 'अनुकम्पायाम्—

५।३।७६' इति कन् । तथैव गन्धर्विकेत्यत्रापि । रज्यत् मनो यस्येति बहुव्रीहिः । निटिलं भालमिति विश्वः ।। १२४ ।।

अधुना श्रीकृष्णः स्तन्यमुद्गिरन्निव बहिर्वञ्चयति युग्मेन मन्दाक्रान्ताच्छन्दोभ्याम्----ताः सर्वाः---

अन्येभ्योऽपि प्रमदमधुना मत्तचित्ताः शृणुध्वं
गृह्णाम्येतन्निरवधि मुदा राजमार्गे व्रजद्भ्यः ।
यूयं त्यक्त्वा तमनुदिवसं गूढभक्ता व्रजन्त्यो
ह्येवं श्रुत्वा निजचरमुखान्मन्मथश्चक्रवर्ती ।। १२५ ।।

मामानीयान्तिकमथ रुषा भर्त्सयित्वा समन्ता-
दुग्रं दत्वा शपथमहमाशिक्षितस्तेन शश्वत् ।
तूर्णं गच्छंस्त्वमिह सगणो घट्टविध्वंसिनीस्ता
वध्वा शास्तिं सपदि विदधन्मत्पुरः प्रापयेति ।। १२६ ।।

अन्वयः----उभे अपि पद्ये एकक्रियान्वयितया युग्मत्वात्सहैवान्विते, तथा हि----प्रमदमधुना मत्तचित्ता यूयं शृणुध्वम् । मुदा राजमार्गे व्रजद्भ्यः अन्येभ्यः अपि एतद् (दानम्) निरवधि गृह्णामि । यूयम् अनुदिनं व्रजन्त्यस्तम् (मन्मथचक्रवर्तिनं) त्यक्त्वा गूढभक्ताः (भवथ) एवं हि निजचरमुखात् श्रुत्वा मन्मथः चक्रवर्ती माम् अन्तिकम् आनीय, अथ रुषा समन्ताद् भर्त्सयित्वा त्वं सगणः इह तूर्णं गच्छन् घट्टविध्वंसिनीः ताः वध्वा सपदि शास्तिं विदधत् मत्पुरःप्रापय इति उग्रं शपथं दत्त्वा तेन अहं शश्वत् (सदाकृते) आशिक्षितः (अस्मीति जानीथ) ।

भावार्थः---राधिकातर्कस्य समुचितमुत्तरं घटयति श्रीकृष्णः—अये प्रमदमधुना मत्तचित्ताः यूयं शृणुध्वम् । मुदा हर्षेण राजमार्गे व्रजद्भ्यः अन्येभ्यः अपि एतद् दानं निरवधि निरन्तरं गृह्णामि । यूयम् अनुदिवसं व्रजन्त्यः तं मन्मथचक्रवर्तिनं त्यक्त्वा गूढभक्ता भवथ । इति निजचरमुखात् श्रुत्वा माम् अन्तिकं समीप आनीय प्राप्य्य, अथ रुषा कोपेन समन्तात् सर्वतः भर्त्सयित्वा त्वं सगणः इह गच्छन् घट्टविध्वंसिनीः ताः वध्वा सपदि शीघ्रं शास्तिं विदधत् मत्पुरः ममाग्रे प्रापय समानय । इति उग्रं शापं दत्त्वा तेन चक्रवर्तिना अहं शश्वत् सदैव कृते आशिक्षितः दृढं बोधितोऽस्मीति जानीथ ।

समासादिः---मत्तं चित्तं यासां ता इति बहुव्रीहिः । निरङ्कुशतयात्मनेपदं 'शृणुध्वम्' इति । दिवसं दिवसं प्रतीति विगृह्य वीप्सार्थेऽव्ययीभावः । गूढं भक्तं देयद्रव्यं यासाम् इति बहुव्रीहिः । गणैः सहेति सगणो बहुव्रीहिः । घट्टविध्वंसिनी, ध्वंसी पुरुषः स्त्री चेद् घट्टविध्वंसिनी लक्षणया घट्टशुल्कविध्वंसिनीत्यर्थः । 'शास्तिः' इत्यत्र उणादिस्तिप्रत्ययः, न तु क्तिन् इति नेत्वम् ।। १२५-१२६ ।।

ततस्तासां कृत्यमाख्याति अनुष्टुभा----

ततः कुम्भान् समुत्तार्य निवृत्ता अपि ताः परम् ।
निर्विण्णा इव भङ्ग्यैव विविशुः भूभृतस्तले ॥ १२७ ॥

अन्वयः----ततः (कृष्णवाक्यश्रवणानन्तरम्) निवृत्ता अपि ताः (सख्यः) कुम्भान् समुत्तार्य भङ्ग्या एव परं निर्विण्णा इव भूभृतः तले विविशुः ।

भावार्थः---श्रीकृष्णवाक्यं पूर्वोक्तं श्रुत्वा तत इत्यर्थः, निवृत्ता अपि पूर्वपलायनादित्यर्थः । कुम्भान् समुत्तार्य भङ्ग्या एव परम् अत्यन्तं निर्विण्णाः भूभृतः पर्वतस्य तले पादे विविशुः प्रविष्टाः ॥ १२७ ॥

अधुना पुनः कुन्दलता सखी विच्छिन्नां गोष्ठीमुद्दीपयति वसन्ततिलकया—

इत्यादि तन्मधुरकेलिविलासवार्ता-
पीयूषमुल्लसितकर्णपुटैर्निपीय ।
आनन्दतः पुलक-गद्गद एव चारु
संव्याजहार मृदु कुन्दलता तदानीम् ॥ १२८ ॥

अन्वयः--विछिन्नां गोष्ठीं पुनरुजीवयितुम् तदानीम् कुन्दलता सखी— इत्यादि तन्मधुरकेलिविलासवार्तापीयूषम् उल्लसितकर्णपुटैः निपीय आनन्दतः पुलकगद्गद्रावचारु मृदु संव्याजहार । इति

भावार्थः--विच्छिन्नां गोष्ठीं पुनरुज्जीवयितुम् कुन्दलता तदानीम् परावृतासु सखीषु इत्यादि तस्य श्रीकृष्णस्य मधुरक्रीडाविलासवातामृतम् उल्लसितकर्णपुटैः निपीय सावधानं श्रुत्वा आनन्दतः सुखानुभवान् पुलकगद्गद्रावचारु रोमाञ्चगद्गद्शब्द सुन्दरम् मृदु मन्दं यथा स्यात्तथा क्रिया-विशेषणम् इदम् संव्याजहार उवाच ।

समासादिः—तस्य मधुरा या केलेःविलासस्य वार्ता सैव पीयूषम् । इति—तत्पुरुषसमासचक्रम् । उल्लसितानि यानि कर्णयोः पुटानि तैः कर्मधारयक् तत्पुरुषान्तः । पुलकेन सह गद्गद्रावः तेन चारु । (अत्र रावः शब्दः) बाहुलकोऽत्र घञ् नतु अप् । आहो ख एव रावः स्वार्थेऽणा बृद्धिः संव्यापूर्वो हृ स्पष्टवाचि संव्याजहार लिटि रूपम् ।

कुन्दलता किंभुवा चेति निर्दिशति तेनैवच्छन्दसा—

शश्वत्तयोरतुलकेलिकला मृतानि
कामं धयन्त्यपि मनागपि नैमि तृप्तिम् ।

तस्मात्पुनः कथय सुन्दरि किं ततोऽभू-
देतत्तदुक्तमधिगम्य जगाद सा च ॥ १२९ ॥

अन्वयः—कुन्दलता काञ्चन सखीं पृच्छति—य अपि सुन्दरि ! तयोः अतुलकेलिकलाम् तानि शश्वत् कामं धयन्ती अपि (अहम्) मनाग् अपि तृप्तिम् न एमि । तस्मात् ततः किम् अभूत (इति) पुनः कथय । एतत् तदुक्तम् अधिगम्य सा च (सुन्दरी सखी अपि) जगाद ।१२९।

भावार्थः—महाकविरेवं विवृणोति-यत् कुन्दलता एकां सखीम् पृच्छति—हे सुन्दरि ! तयो राधाकृष्णयोः अतुलकेलि कलाः एव अमृतानि शश्वत् निन्तरं धयन्ती पिबन्ती अपि अहं कुन्दलता मनाक् अपि किञ्चिदपि तृप्तिम् तुष्टिम् न एमि प्राप्नोमि । तस्मात् कारणात् ततः तदनन्तरम् किम् अभूत इति पुनः कथय । एतत्-कुन्दलतोक्तम् अधिगम्य ज्ञात्वा सा च सुन्दरी सखी अपि जगाद ।१२९।

समासादिः—नास्ति तुला यस्याः सा चासौ केलिः तस्याः कला एवामृतानि । धयन्तीति धेट् पाने धातोः शतरि ङीपि रूपम् 'शप्श्यनोर्नित्यम् ७।१।८१' इति नुम् ।१२९।

कुन्दलतापृष्टा सखी वक्ति तेनैवच्छन्दसा-

श्रुत्वा तयोर्दयितदानविहारवार्ता-
मार्ता तदीक्षितुमलमलक्षितमागतोत्का ।
नान्दीमुखीनभृत-कुञ्जगृहे प्रविष्टा
दृष्ट्वा द्रुतं सदसि सा द्रुतमाजगाम ।१३०।

अन्वयः—तयोः दयित-दान-विहारवार्ताम् श्रुत्वा आर्ता उत्का (राधा) तत् ईक्षितुम् अलक्षितम् यथा स्यात्तथा-आगता । नान्दीमुखीनभृत-कुञ्जगृहे प्रविष्टा सदसि अद्भुतं दृष्ट्वा अद्भुतम् (आश्चर्यम्) आजगाम (प्राप्तवती) इत्यन्वयः ।।१३०।।

भावार्थः—कुन्दलतया पृष्टा सुन्दरी सखी वक्ति तयोः-राधाकृष्णयोः दयिता-या दानविहारवार्ता ताम् श्रुत्वा आर्ता उद्विग्ना उत्का उत्कण्ठिता राधिका तद् (सामान्ये नपुंसकम्) दृश्यमिति यावत् ईक्षितुम् अलक्षितम् (क्रियाविशेषणम्) आगता उपस्थिता । तत्र नान्दीमुखीनभृते गायकादिसम्भृते कुञ्जगृहे प्रविष्टा सा तत्र सदसि अद्भुतं विधानं दृष्ट्वा अद्भुत-आश्चर्यम् आजगाम आगता प्राप्तेत्यर्थः ।१३०।

सामासादिः—दानस्य विहारः तस्य वार्ता, दयिता चासौ सेति तत्पुरुषगर्भः कर्मधारयः । (नान्दीमुखीनास्ते ये हि सदसि प्रारम्भे मङ्गलगानं कुर्वन्ति) तैः भृतम् कुञ्जगृहम् तस्मिन्नि तत्पुरुषः । 'निकुञ्जौकुञ्जौ वा क्लीबे लतादीपिहितोदरे' इत्यमरः ।१३०।

तत्रोपस्थितायां राधायां यद् वृत्तं तन्महाकविरेव वसन्ततिलकया वक्ति—

तां वीक्ष्य तत्र सकलाः परिरभ्य काम-
मामोदिताः कथितवत्य इतः स्ववृत्तम् ।
कृष्णोऽपि तल्लभनमाशु विहस्य शस्य
माशंस्य दानविवृतिं कथयाम्बभूव ।१३१।

अन्वयः—राधिकोपस्थितौ तत्रत्यमितिवृत्तमाह—तत्रगोष्ठ्यां सकलाः (सख्यः) तां राधाम् वीक्ष्य कामम् परिरभ्य आमोदिताः (सत्यः) इतः स्ववृत्तम् कथितवत्यः ? कृष्णः अपि शस्यं तल्लभनम् आशु आशंस्य विहस्य दानविवृत्तिम्—कथयाम्बभूव ।१३१।

भावार्थः—यदा राधिका गोष्ठ्याम् अलक्षितैव सहसा उपस्थिता तदा तत्रत्याः सकलाः अपि सख्यः तां राधामुपस्थितां वीक्ष्य कामं परिरभ्य आलिङ्ग्य आमोदिताः हृष्टा बभूवुः । इतः ततोऽग्रे स्ववृत्तम् निजकथानकं कथितवत्यः । कृष्णः अपि आशु शस्यं प्रशस्यं तस्याः लभनम् प्राप्तिम्—आशंस्य उपलभ्य विहस्य ईषत् स्मित्वा दानविवृत्तिदानविवरणम् कथयाम्बभूव कथितवान् ।१३१।

समासादिः—तस्याः लभनम् तल्लभनम् दानस्य विवृतिम् । अत्र विपूर्वकस्य वृञः सेट्कत्वेऽपि 'तितुत्रतथसिसुसरकसेषु च ७।२।९' इति इण्निषेधः ।१३१।

सम्प्रति राधाकृष्णयोरेव परमितिवृत्तमाहानुष्टुभा—

स्मित्वा राधामथोद्वीक्ष्य मुदितां रसविह्वलाम् ।
सानन्दं परमानन्दं मुकुन्दं निजगाद सा ।१३२।

अन्वयः—अथ मुदितां रसविह्वलाम् राधाम् उद्वीक्ष्य सानन्दं परमानन्दं (स्थितं) मुकुन्दं सा (राधा) स्मित्वा निजगाद संललाप ।१३२।

भावार्थः—अथ अनन्तरम् मुदिताम् हृष्टाम् रसविह्वलाम् शृङ्गाररसाप्लुताम्—राधाम् प्राणवल्लभाम् उद्वीक्ष्य सानन्दम् राधानिरीक्षणजन्यानन्दसमन्वितं स्वयं परमानन्दं विद्यमानम् मुकुन्दं स्मित्वा ईषद् हास्यं वितन्य सा राधापि निजगाद संललाप ।१३२।

समासादिः—रसेन विह्वला ताम् । परमः आनन्दो यस्मिन् सः । बहुव्रीहिः । शक्तिरूपराधाशक्तिमन्तं परमानन्दं परमेश्वरमुपहसति यदहमेव सर्वंकरोति भवांस्तु भोक्तैवास्तीति तं स्मित्वा पदेन व्यज्यते । इत्युत्तमकाव्यम् ।१३२।

इदानीं शक्तिरूप राधा त्रिभिरनुपू-छन्दोभिः व्यङ्ग्यमर्यादयैव श्रीकृष्णं परमेश्वरं मत्वा यथेच्छं सम्बोधयति—

दानिन्नद्भुत वस्तूनां श्रुत्वा दानमिहाद्भुतम् ।
तद् वाक्यमन्वभावीति जीवद्भिः किं न दृश्यते ।।१३३।।

अन्वयः--हे अद्भुतवस्तूनां दानिन् इह अद्भुतं दानं श्रुत्वा (मया) तद् वाक्यम् अन्वभावि । इति जीवद्भिः किं न दृश्यते ? यदि भवान् अद्भुतदानी अस्ति, तर्हि भवतो दानं जीवन्तः सर्वे पश्येयुरिति व्यङ्ग्यम् ।

भावार्थः--राधिका आत्मानं शक्ति मत्वा परमेश्वरं मत्वा कृष्णं क्षिपति—भवान् अद्भुतदानी अस्ति चेत्, तदा अहं यथा जीवन्मुक्ता सर्वं विश्वं निर्मायापि निरासक्ता तिष्ठामि, तथैव भवत्पक्षीया जीवा कथन्न जीवन्मुक्ताः सन्तः जगति दृश्यन्ते प्रायो बद्धा एव दृश्यन्त इति व्यङ्ग्यम् ।

समासादिः--अद्भुतानि च वस्तूनि जीवन्मुक्तत्वादीनि व्यक्तिभेदाज्जाता-वपि भेदः । वाक्यमिह 'अहम् अद्भुतानां जीवन्मुक्तत्वाणवशाक्तशाम्भवाद्युपयानां दाता' इति परमेश्वरद्वयस्य कृष्णस्य वाक्यं ज्ञेयम्' । सर्वमिदं विद्यारूपायाः शक्तेरेव कृपया भवतीति शैवशास्त्रसिद्धान्तः ।।१३३।।

कुलीना वृत्तिनीरेता रहः संरक्षतस्तव ।
अपकीर्तिरलं वीर ! भविता गोकुले पुरे ।।१३४।।

अन्वयः--हे वीर ! कुलीनाः वृत्तिनीः एताः सखीः रहः संरक्षतः तव गोकुले पुरे अलम् (पर्याप्ता)अपकीर्तिः भविता (भाविनी) ।

भावार्थः--हे विशेषेण ईरयति दूरीकरोति दोषान् इति वीरपरमेश्वररूप कृष्ण ! को पृथिव्यां जगतीत्यर्थः लीना आसक्ता वृत्तिनीः वृत्तं कर्तव्यम् अस्ति यासां ताः वृत्तिनीः उभयत्रापि । इमौ शब्दौ अन्वितः । सखीषु ईश्वरशक्तिषु च यदि रहः एकान्तेऽत्र पर्वतवने तत्र स्वस्मिन्नेव यदि रक्षति, तदा गोकुलेऽत्र व्रजभूमौ तत्र गोकुले गोलोके तव भवतः अलं पर्याप्ता अपकीर्तिः भविता भाविनी । अत्र सर्वे उपहसिष्यन्ति भवन्तम्, तत्र सत्यलोके शक्तिनिरोधे तत्रत्या ज्ञानिनोऽपि मनसि उपहसिष्यन्ति । किमिदं भवान् करोतीति ।

समासादिः—अग्रेऽपि पद्येनास्ति, इत्युभयत्र भावार्थे सर्वं दृशेलिमम् ।।१३४।।

कृतं कर्तव्यमत्रैव तदलं नर्मखेलया ।
समूह्य मुञ्च मुञ्चैताः सत्रं गच्छन्तु सत्वरम् ।। १३५।।

अन्वयः—भवता अत्रैव कर्तव्यं कृतम्, तत् नर्मखेलया अलम् । एताः समूह्य समूहरूपेण मुञ्च मुञ्च (त्यज त्यज तव शक्तयः विश्वव्यापारं कुर्युः) सत्वरं सत्रं गच्छन्तु ।

भावार्थः– अर्थद्वयमस्यापि पद्यस्य । भवता मायाद्यमनावतारेण सता अत्रैव व्रजे सर्वं कर्तव्यं पूतनावधादि कृतमेव, तद् नर्मखेलया कौतुकलीलयाऽनया तुच्छ-क्रीडया अलं व्यर्थम् । समूह्य समूहरूप एव एताः सखीः स्वीयाश्च शक्तीः मुञ्च मुञ्च भगवन् त्यज त्यज तव शक्तयः जगत् सृजन्तु एताः सत्रं यज्ञं गच्छन्तु घृतादियज्ञद्रव्यं दातुमिति भावः ॥१३५॥

सम्प्रति श्रीकृष्णः समुचितमुत्तरयति मन्दाक्रान्तया—

सर्वाङ्गानामुपरि लसता लङ्घिनेवोत्तमाङ्गे-
नापि श्लाघ्यं मुखविधुमिमा द्योतयन्त्योऽपि धूर्ताः ।
तस्मान्नीचैर्हृदयमपि यन्नाभिमाच्छादयेयु-
र्यत्नैर्बद्ध्वा तदिह भविता कोऽप्यपूर्वः पदार्थः ॥१३६॥

अन्वयः—सर्वाङ्गानां लङ्घिना उपरि लसता उत्तमाङ्गेन अपि श्लाघ्यं मुखविधुं द्योतयन्त्यः अपि इमाः धूर्ताः सन्ति । तस्मात् हृदयम् अपि नीचैर्नाभि यत्नैः बद्ध्वा यद् आच्छादयेयुः तद् इह कोऽपि अपूर्वः पदार्थः भविता । इत्यहम् अनुमन्ये ।

भावार्थः—श्रीकृष्णः सखीनां धौर्तं हेतुं कृत्य सुन्दरमुखीनामता सा कस्यापि अपूर्वपदार्थस्य गोपनम् अनुमिनोति । तथा हि—सर्वाङ्गानां सर्वगात्राणां लङ्घिना उत्कृष्टेन उपरि उच्चस्थाने लसता शोभमानेन उत्तमाङ्गेन मुखेन श्लाघ्यं श्लाघनीयं मुखविधुम् आस्यचन्द्रं द्योतयन्त्यः सर्वसुन्दर्यः अपि इमाः धूर्ताः अतिचतुराः सन्ति । तस्मादेव हेतोः इमाः हृदयम् अपि नीचैः विद्यमानां नाभिं यत्नैः बद्ध्वा यद् आच्छादयेयुः गोपयेयुः, तद् कोऽपि अवर्णनीयः अपूर्वः पदार्थः भवितेति मे तर्कः । धूर्तानामासां तत्रातिशययत्नेनैव ममेदमनुमानमिति भावः ।

समासादिः—सर्वाणि च तानि अङ्गानि सर्वाणि तेषाम् । उत्तमंचलद् अङ्गम् उत्तमाङ्गम्, तेन । यत् तद् इति सामान्ये नपुंसकम् । 'हृदयम् अपि नीचैः' इत्यत्र

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥"

इति अन्येन नीचैः शब्दयोगे हृदये द्वितीया ॥१३६॥

इदानीं श्रीकृष्णः स्वानुमितमपूर्वपदार्थं द्रष्टुं प्रपञ्चं रचयति मन्दाक्रान्तयैव च्छन्दसा—

तस्मात् पूर्वं निभृतमनया स्थानयुग्मं प्रकाश्य
प्रायः सत्यं भवति नहि वा कार्यतां मत्प्रतीतिः ।
नो चेदन्ते विवृतिमचिरात् सूचकात्सन्निशम्य
कुद्धोऽस्माकं मदननृपतिर्दण्डमुच्चैर्विधाता ॥१३७॥

अन्वयः--ललितामेव निर्दिशति श्रीकृष्णः तस्माद् अनया पूर्वं निभृतं स्थानयुग्मं प्रकाश्य प्रायः सत्यं भवति. न वा इति मत्प्रतीतिः (मया) कार्यताम् । नो चेद् अन्ते अचिरात् सूचकाद् विवृतिं सन्निशम्य क्रुद्धः मदननृपतिः अस्माकम् उच्चैः दण्डं विधाता ।

भावार्थः--प्रधानत्वात् ललितामेव लक्ष्यीकृत्य कृष्णः कथयति-तस्मादपूर्वः कोऽपि पदार्थोऽस्तीति अनुमानात् सिद्धं स्थानयुग्मं पूर्वं निभृतम् एकान्ते प्रकाश्य प्रायः सम्भावनया सत्यं भवति न वा इति मत्प्रतीतिर्मम विश्वासः मया कार्यताम् इति णिजन्तस्य कर्मणि प्रयोगः । नो चेद् इतोऽन्यथाकरणे अन्ते अवसाने अचिराद् द्रुतमेव सूचकात् चरात् मदननृपतिः कामदेवः राजा विवृतिं सन्निशम्य ज्ञात्वा अस्माकं सर्वेषाम् उच्चैः दण्डं विधाता कर्ता इति जानीहि ।

सामासादिः-- स्थानयोः युग्ममिति तत्पुरुषः । कार्यतामिति कृधातोर्णिजन्तस्य कर्मणि प्रयोगः । कर्तुरनुपादानात् कृष्ण एव प्रयोज्यकर्ता ।।१३७।।

पुनस्तामेव लक्ष्यीकृत्य क्रीडति मन्दाक्रान्ताद्वयेन—

गुप्तीकर्तुं तदपि परमं वस्तु यत्तु त्वयाहं
प्रार्थ्ये भङ्ग्या सुमति ललिते दातुमुत्का तदर्धम् ।
एतत् किं स्याद् यदिह विचरेल्लेखकः सूचकोऽसौ
राज्ञः प्रेयान् परममतिमानुज्ज्वलः प्रेक्षकोऽपि ।।१३८।।

अन्वयः—सुमति ललिते तत् परमं वस्तु गुप्तीकर्तुं यत् त्वया अहम् भङ्ग्या प्रार्थ्ये तदर्धं दातुम् उत्का असि? इह यत् सूचकः राज्ञः प्रेयान् परममतिमान् उज्ज्वलः प्रेक्षकः अपि असौ लेखकः विचरेत् एतत् किं स्यात् ।

भावार्थः—पुनः ललितां पाशयति कृष्णः—यत् सुमतिललिते सखि ! तत् परमं वस्तु गुप्तीकर्तुं गोपयितुं यत् त्वया अहं भङ्ग्या सङ्केतेन प्रार्थ्ये याचितो भवामि । तद् अर्धं दातुम् उत्का असि ।

अन्यच्च--इह यत् सूचकः चरः राज्ञः प्रेयान् परममतिमान् उज्ज्वलः प्रेक्षकोऽपि असौ लेखकः विचरेद् आगच्छेद् विहरन्, एतत् किं स्याद् वद इति हि बध्नाति उभयतस्ताम् ।

समासादिः—प्रार्थ्ये इति प्रपूर्वकस्य चुरादिधातोः कर्मणि प्रयोगे कृष्ण एव कर्मेति स उक्तः । चरस्य सर्वेऽपि विशेषणशब्दाः सार्थका व्यञ्जकप्राया इति परिकरालङ्कारः ।।१३८।।

पुनस्तामन्यविधया बध्नाति तेनैव च्छन्दसा—

अन्विष्यद्भ्यां निरवधि ममच्छिद्रमाभ्यां तदग्रे
व्याजादेतन्निभृतविवृतौ ज्ञापितायामवश्यम् ।
तीव्रोऽत्युच्चैर्मदननृपतिर्मद्विधं त्वद्विधाभिः
सार्द्धं बध्वा निविडतमसि क्षेप्स्यति द्रागगुहान्तः ॥१३९॥

अन्वयः—तदग्रे निरवधि मम छिद्रम् अन्विष्यद्भ्याम् आभ्याम् (द्वयोश्चरयोः अङ्गुल्या निर्देशः) व्याजाद् निभृतविवृतौ एतत् (छिद्रम्) अवश्यं ज्ञापितायां (सत्याम्) अत्युच्चैः तीव्रः मदननृपतिः मद्विधं त्वद्विधाभिः सार्द्धं बध्वा गुहान्तः निविडतमसि द्राक् क्षेप्स्यतीति निश्चयः ।

भावार्थः–पुनः कृष्णस्तां प्रकारान्तरेण पाशयति—अयि ललिते ! तदग्रे मदन-नृपपार्श्वे निरवधि असंख्यं मम छिद्रम् अन्विष्यद्भ्याम् आभ्यां पुरोवर्तिचराभ्यां व्याजाद् एतच्छिद्रनिभृतविवृतौ गुप्तवातायाम् अवश्यं ज्ञापितायां सत्याम् अत्युच्चैः तीव्र उद्दीप्तः मदननृपतिः कामदेवो राजा मद्विधं त्वद्विधाभिः सार्द्धं बध्वा गुहान्तः देवखातविलमध्ये निविडतमसि द्राक् द्रुतम् क्षेप्स्यति विना विचारमिति द्राक्शब्दः ध्वनयति ।

समासादिः—तस्य अग्रे तदग्रे तत्पुरुषः । **मम विधा यस्मिन् सः, तथैव** तव विधा यासु ताः, ताभिः । बहुव्रीहिः । सानुप्रासः काव्यालङ्कारालङ्कारः, ध्वनि-काव्यं च ॥१३९॥

सम्प्रति राधापि वक्तुं पराक्रमतेऽनुष्टुभा—

इति नान्दीमुखी साक्षाच्छासिते कंशविद्विषा ।
कपटक्रोधविद्धाराद्राधामाधवमब्रवीत् ॥ १४० ॥

अन्वयः--नान्दीमुखी राधा इति कंशविद्विषा साक्षात् शासिते (सति) आरात् (विद्यमाना) कपटक्रोधविद्धा (सती) माधवम् अब्रवीत् ।

भावार्थः—नान्दीमुखी मङ्गलमुखी राधादेवी इति इत्थं कंशविद्विषा कृष्णेन साक्षात् स्वयं शासिते सप्रपञ्चम् अभिहिते (सति) आरात् समीपे तत्रैव गोष्ठ्यां वर्तमाना कपटक्रोधविद्धा छद्मकुपिता कृतककोपवतीत्यर्थः, माधवं मधुरिपुम् अब्रवीद् उवाचेति भावः ।

'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्यते' ॥

समासादिः—इति भरतवाक्याद् नान्दीवद् **मङ्गलकर्तृमुखं** यस्याः सा । कपटेन क्रोधस्तेन विद्धेति तत्पुरुषः । पद्येऽस्मिन् अनुप्रासादृशेलिमा महाक-वेरेवोक्तिः ॥१४०॥

राधा व्यङ्ग्यवाक्यमेव विवृणोति मन्दाक्रान्ताछन्दसा –

सद्धर्मोद्यत्कमलपटलप्रौढराजीवबन्धो-
र्गोपेन्द्रस्य प्रथमतनयः शुद्धरामानुजोऽपि ।
दुष्टध्वंसी स्वयमपि वदस्याशु दुर्भाषितं य-
त्तत्ते सेवा कुलफलमिदं दिव्यघट्टीसु देव्याः ॥ १४१ ॥

अन्वयः—उद्यत् कमलपटलप्रौढराजीवबन्धोः गोपेन्द्रस्य प्रथमतनयः शुद्ध-रामानुजः अपि स्वयं दुष्टध्वंसी अपि सद्धर्मा (त्वम्) यद् इदं दुर्भाषितं वदसि । तत् ते दिव्यघट्टीसु देव्याः सेवा कुलफलम् इदम् ।

भावार्थः--राधिका व्यङ्ग्यवाग्बाणं कृष्णोपरि प्रहरति-उद्यत्कमल-पटलेषु प्रौढराजीवबन्धोः गोपेन्द्रस्य वसुदेवस्य नन्दस्य वा प्रथमतनयः शुद्धः रामानुजः बलरामस्य कनिष्ठो भ्राता स्वयं दुष्टध्वंसी अपि सद्धर्मा त्वं यद् इदम् ईदृग् निरर्गलं दुर्भाषितं वदसि जल्पसि, तत् ते तव दिव्यघट्टी सुदेव्याः सेवाकुलफलमिदम् इत्यहं तर्कये । इति राधायाः व्यङ्ग्यबाणः ।

समासादिः—सन् धर्मः यस्यासौ सद्धर्मा धर्मादनिच् केवलात्—५।४।१२४' इत्यनिच् । उद्यन्ति च तानि कमलानि तेषां पटलम् तत्र प्रौढं यत् राजीवं पद्मं तस्य बन्धुस्तस्य गोपेन्द्रस्य वसुदेवस्य नन्दस्य वा रामस्य अनुजः शुद्धश्चासौ रामानुजः स तथोक्तः स तु देवकीगर्भतः रोहिणीगर्भे संक्रान्तः । त्वं तु शुद्धो देवकीगर्भज इति शुद्धशब्दव्यङ्ग्यः । दुष्टानां ध्वंसीति तत्पुरुषः । दिव्या घट्टी एव सुदेवीति तस्या मयूर-व्यंसकादित्वात् समासः । सेवानां कुलं समूहः तस्य फलम् । सर्वाणि प्रायो वाक्यानि व्यङ्ग्यमयानि ततो ध्वनिकाव्यम् उत्तमम् ॥१४१॥

इतस्तुङ्गविद्या सखी कूजति अनुष्टुभादिना—

अन्यदप्यत्र यत्किञ्चिन्न ब्रूते लज्जया सखी ।
तच्छृणु त्वमिति व्याजात् तुङ्गविद्या जगाद तम् ॥ १४२ ॥

अन्वयः—(ततः) तुङ्गविद्या (अग्रेभूय) अत्र यत् किञ्चित् अन्यत (वर्तते) तत् सखी (राधा) लज्जया न ब्रूते । तत् त्वम् (मत्तः श्रृणु) इति व्याजात् छद्मतः तम् (श्रीकृष्णम्) जगाद ।

भावार्थः—सम्प्रति यथार्थनामा तुङ्गविद्या अवसरानुसारमग्रेभूय अत्र यत् किञ्चिद् अन्यद् व्यङ्ग्यं वक्तव्यं विद्यते । तद् मे सखी राधा लज्जया न ब्रूते । तत् त्वम् मत्तः श्रृणु इति व्याजात् छद्मतस्तं श्रीकृष्णं जगाद व्याजहार ।

समासादिः--तुङ्गा विद्या यस्याः सा उन्नतज्ञाना प्रत्युत्पन्नमतिरिति व्यङ्ग्यम् । लज्जाहेतोरनभिधाने उल्लेखात् काव्यलिङ्गालङ्कारः ॥१४२॥

इदानीं तुङ्गभद्रा वाग्बाणं विसृजति स्वागतारथोद्धतोपजात्या छन्दसा —

आत्मगह्वरमभङ्गभुजङ्ग त्वं व्रज द्रुतमितोऽतिचञ्चल ।
आहितुण्डिकवराभिमन्युकः सार्थकाह्व य उपैति न यावत् ॥

अन्वयः—हे अतिचञ्चल अभङ्गभुजङ्ग त्वम् इतः द्रुतम् आत्मगह्वरं व्रज । यावत् सार्थकाह्वयः आहितुण्डिकवराभिमन्युकः यावत् न उपैति ।

भावार्थः–तुङ्गविद्या यथार्थनामा श्रीकृष्णम् अभङ्गभुजङ्गं कल्पयित्वा आदिशति-यद् हे अभङ्गभुजङ्ग त्वं द्रुतं स्वनिवासं समाश्रय यावद् यथार्थसंज्ञकः वराभिमानी आहितुण्डिकः नागनर्तकः तद्गर्वध्वंसकोऽस्माकं पक्षतो नायतीति गूढो भावार्थः ।

समासादिः—आत्मनः गह्वरं तद् अभङ्गश्चासौ भुजङ्गः सः । तत्पुरुषकर्मधारयौ । सार्थकः आह्वयो यस्य सः । वरः अभिमन्युर्यस्य सः, ततः कर्मधारयः । पद्यमिदं ध्वनिगर्भितं रूपकालङ्कारं विभर्ति । छन्दसि च प्रथमचतुर्थपादयोः 'स्वागतेति रनभाद्गुरुयुग्मम्' । स्वागताछन्दः । द्वितीयतृतीयपादयोश्च 'रान्नराविह रथोद्धतालगौ' इति रथोद्धताछन्दो बिभर्तीति । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नामेति उपजातिवृत्तं बिभर्ति ॥१४३॥

इदानीं तुङ्गभद्रा स्वसखीं राधां प्रशंसति शार्दूलविक्रीड़ितेन च्छन्दसा—

येयं भ्राम्यति पद्मिनी फलयुगं रक्तं चतुः पङ्कजं
बन्धूके भ्रमरौ विधूंश्च दधती सार्द्धत्रयोविंशतिम् ।
श्यामेन्दोः परपुंस आवकलनात्फुल्ला भवेत् सा सदा
स्वीयस्वामि रवेर्विलोकनभरा म्लाना स्फुटं ताम्यति ॥१४४॥

अन्वयः—(अयि सख्यः) या इयं पद्मिनी (मम सखी) फलयुगम् रक्तम् चतुःपञ्चकम् । बन्धूके भ्रमरौ विधून् च त्रयोविंशतिं दधती भ्राम्यति । परपुंसः श्यामेन्दोः आवकलानात् सा सदा फुल्ला भवेत् । म्लाना अपि स्वीयस्वामि-रवेः विलोकनभरा सती स्फुटं ताम्यति ।

भावार्थः—अयि सख्यः ! या इयं मम सखी राधिका पद्मिनी लक्षणा अस्ति । फलयुगं स्तनद्वयं रक्तवर्णं चतुःपञ्चकम् पादद्वयं हस्तद्वयं चेति मिलित्वा चतुर्भिः सह पङ्कजम्, तथा बन्धूके कर्णो भ्रमरौ नेत्रे त्रयोविंशतिम्, सांख्योक्तप्रकृतेर्महदादिविकारास्तेषां विधून् चन्द्रान् अर्द्धम् एकादश समनांसीन्द्रियाणि एव दधती स्वदेहे बिभ्रती सती भ्राम्यति विहरति । परपुंसः प्रधानपुरुषस्य श्यामेन्दोः श्यामवर्णस्य श्रीकृष्णस्य चन्द्रस्य आकलनात् परिशीलनात् सा सदा फुल्ला भवेत् ।

पद्मिनी कमलिनी म्लाना अपि स्वीयस्वामिरवेः विलोकनभरा सती स्फुटं स्पष्टं ताम्यति उद्दीप्यते ।

समासादिः—चत्वारि पङ्कजानि तेषां समाहारः 'तद्धितार्थोत्तरपदसमाहारे च–२।१।५१' इति समासः । त्रयोविंशतेरर्धम् अर्धत्रयोविंशतिः, तेन सहेति सार्धत्रयोविंशतिः ताम् । पूर्वम् 'अर्द्धं नपुंसकम्—२।२।२' इति समासः, ततः तेन सहेति तुल्ययोगे २।२।२९, इति बहुव्रीहिः । श्यामश्चासौ इन्दुः । परश्चासौ पुमान् इत्युभयत्र कर्मधारयः । स्वीयस्वामी स चासौ रविः । इत्यत्राऽपि तथैव कर्मधारयः । अतिशयोक्तिसमासोक्तिमुद्रालङ्काराणां संसृष्टिरलङ्कारः ।।१४४।।

सम्प्रति राधा अप्रतिबाधं ब्रूते मालिनीछन्दसा—

रतिहरमुखपद्मक्ष्वेलिसौरभ्यसद्म-
प्रतिवचनमधूनि प्रीडितैतत्सभानि ।
तदविरचित बाधापीयमापीय राधा
प्रचुररुचमुदारा वाचमारादुवाच ।।१४५।।

अन्वयः—तदविरचितबाधा उदारा इयं राधा प्रीडितैतत्सभानि रतिहरमुखपद्मक्ष्वेलिसौरभ्य सद्म प्रति वचनमधूनि प्रचुररुचम् आपीय अपि आरात् वाचम् उवाच ।

भावार्थः--तेन कृष्णेन अविरचिता बाधा यस्याः तादृशी उदारा इयं राधा सभाप्रीतिजनकानि नर्मप्रायकमुखे क्रीडाकरं यत्सौरभ्यम्, तस्याधारभूतानि प्रतिवचन-मधूनि प्रत्युत्तरवाक्यानि प्रभूतरुचं यथा स्यात्तथा आपीय पीत्वा अपि वाचं निजां गिरम् उवाच जगाद । सखीनां श्रीकृष्णवचसां मधूमयमुत्तरं निपीयापि स्वयमुत्तरं ददौ इत्यर्थः ।

समासादिः—रतेहरं मुखं रतिहरमुखम्, तत्र क्ष्वेलि क्रीडकं यत् सौरभ्यम्, तस्य सद्म (आधारभूतम्) यत् प्रतिवचनं (सखीभिः कृष्णवाक्यस्योत्तरम्) तस्य मधूनि प्रचुरा रुचिः यस्मिन् तद् यथा स्यात्तथेति क्रियाविशेषणम् । बहुव्रीहिः । अत्रानुप्रासछटा अपूर्वेति सर्वैर्दृश्या ।।१४५।।

इदानीं व्यङ्गयमर्यादया श्रीकृष्णहितमुपदिशति पृथ्वीछन्दसा—

कुमार भज धीरतां न कुरु दुर्मदाच्चापलं
पुरी निकटवर्तिनी दुरधिपोऽपि कंशो बली ।
अतस्तव हितं ब्रुवे व्रज-महेन्द्रसम्बन्धतः
समूह्य गहनं व्रज प्रकटमत्र गाश्चारय ।।१४६।।

हे कुमार ! धीरतां भज दुर्मदात् चापलं न कुरु । निकटवर्तिनी पुरी (मथुरा) दुरधिपः कंशः बली (विद्यते) अतः व्रजमहेन्द्रसम्बन्धतः (अहम्) तव हितं ब्रुवे समूह्य गहनं व्रज, अत्र प्रकटं गाः चारय । न किमपि भयम् ।

भावार्थः—राधा व्यङ्ग्यमर्यादया कृष्णं विरमयितुमुपदेशच्छद्मना वक्ति-अयि कुमार ! धीरतां धैर्यं भज कुरु । दुर्मदात् मिथ्यागर्वात् चापलं चाञ्चल्यं न कुरु दर्शय, निकटवर्तिनी समीपस्थैव पुरी मथुरा अस्ति । दुरधिपो दुर्विनीतः तदधिपः तस्याः स्वामी कंशोऽपि त्वत्तः बली विद्यते । अहं व्रजमहेन्द्रस्य सम्बन्धतः नन्दराजसम्बन्धतः तव हितं हिताधायकं वाक्यं ब्रुवे उपदिशामि । समूह्य सर्वं निज-वस्तुजातं गृहीत्वा गहनं वनं व्रज गच्छ, अत्रैव वने प्रकटं प्रकाशं यथेच्छमिति यावद् गाः सुरभिवत्सान् वत्सरींश्च चारय, बालक्रीडां च निर्भयं कुरु । इतः पलाय-स्वेति व्यङ्ग्यम् ।

समासादिः—व्रजस्य महेन्द्रः तस्य सम्बन्धः, तस्मात् । गहनं काननं वन-मित्यमरः । व्रजशब्दे श्लेषालङ्कारः, सार्थकविशेषणात् परिकरालङ्कारश्च ॥१४६॥

अथ कृष्णसखा मधुमङ्गलो राधिकामुत्तरयति तेनैव च्छन्दसा पृथ्व्या—

महामदनभूपतेरयमभिन्नः स्वराट्
नृशंसनृपजीविताधिकवयस्यकेश्यादिकान् ।
निमथ्य दरलीलया स्फुरति योऽत्र गोष्ठान्तरे
स एव तव कंसतः सखि विभेति किं मे सखा ॥१४७॥

अन्वयः—(अयि) सखि ! अयं मे सखा महामदनभूपतेः अभिन्नदेहः स्वराट् यः अत्र गोष्ठान्तरे नृंशसनृपजीविताधिकवयस्यकेश्यादिकान् दरलीलया निमथ्य स्फुरति । स एष तव कंसतः विभेति किम् ? एनं वृथा बिभीषयसि ? ।

भावार्थः—मुखमुद्रकमुत्तरयति मधुमङ्गलः—अयि सखि राधे ! अयं मे सखा श्रीकृष्णः महामदनभूपतेः अभिन्नदेहः अद्वितीयः स्वराट् स्वयं राजा । यश्च अत्र गोष्ठान्तरे गोष्ठभूमध्ये नृशंसनृपस्य कंशस्य प्राणाधिकवयस्यान् केश्यादीन् दुष्टान् दरलीलया लघुक्रीडयैव विमथ्य हत्वा स्फुरति देदीप्यते । स परमवीरतया प्रसिद्धः एषः पुरःस्थितः श्रीकृष्णः तवातिक्रूरादपि कंशतः बिभेति किम् । क्वाप्यन्यत्र विभी-षया । स्मरपादपोन्मूलनशक्तिरंहः शिलोच्चये न मूर्छति ।

समासादिः—महामदनश्चासौ भूपतिः, तस्येति कर्मधारयः । अभिन्नः देहः यस्य स इति बहुव्रीहिः । नृशंसश्चासौ नृपस्तस्य जीवितम्, तस्मात्, अधिकाश्च ते वयस्या केश्यादिकाः तान् । इति समासचक्रम् । दीर्यंते इति दृ+अप् दर ईषदर्थः मेदिनी । भाविकालङ्कारः ॥ १४७ ॥

पुनर्मधुमङ्गलो वञ्चनां करोति पृथ्वीछन्दसैव—

अथैष पृथुमन्मथो य इह तस्य सामन्तको
स एष लघुमन्मथोत्पलममुष्य कंसो वशः ।
अतोऽस्य लिपिमङ्किता सपदि तत्र नीत्वा दद-
न्नृपात् कपटमानयन् पतिकुलानि बध्नामि वः ॥१४८॥

अन्वयः—अथ य एष इह पृथुमन्मथः तस्य स एष सामन्तकः लघुमन्मथोत्पलम् (अस्ति) अमुष्य कंसः वशः । अतः अस्य अङ्कितां लिपिं सपदि तत्र नीत्वा (तस्मै) ददत् (ततः) नृपात् कपटम् (प्रतारणाज्ञाम्) आनयन् वः पतिकुलानि बध्नामि ।

भावार्थः—इदानीं स्वव्यङ्गयवाक्यं विवृणोति—अथ य एष इह पृथुमन्मथः श्रीकृष्णस्तस्य स एष सामन्तकः (कमपि सखायं निर्दिशति) लघुमन्मथोत्पलं मृदुकामदेवपद्मसुगन्धि अस्ति । अमुष्य कंसः वशः वश्योऽस्ति । अतः कारणाद् अस्य अङ्कितां लिपिं वर्णमालां पत्रमिति यावत्, सपदि त्वरितं तत्र कंसपार्श्वे नीत्वा तस्मै ददत् समर्पयन् तस्मान्नृपात्, कपटाज्ञां कपटपत्रम् (लक्षणया कपटशब्दः कपटपत्रार्थकः) आनयन् अहं वः युष्माकं पतिकुलानि रक्षकवर्गान् बध्नामि संयमयामि विषस्य विषमौषधं गृहाणेति भावः ।

समासादिः—अत्र पृथुश्चासौ मन्मथः, तथैव लघुश्चासौ मन्मथ उत्पलमिवेति लक्षणया उत्पलसुगन्धिरयं लघुमन्मथः । प्रायः लाक्षणिका इह शब्दा इति व्यञ्जनाशून्या लक्षणा भवत्येव, नहीत्युत्तमं काव्यम् ॥ १४८ ॥

अथ सदसः सरोवररूपणेन तत्रोपविष्ट-सुहृत्-सखीषु च भृङ्गावलीरूपणेन सुन्दरी सखी पृथ्वीछन्दसैव सानुप्रासमाह पद्यमिदम्—

इतीह मधुमङ्गलोल्लसितवक्त्रकञ्जोज्ज्वल-
द्वचःप्रसरसौष्ठवोच्छलितशीधुधारामिमाम् ।
निपीय रभसोन्मदा मृदु दधार हासध्वनिं
सरः सदसि सुन्दरी रसिकसभ्यभृङ्गावली ॥१४९॥

अन्वयः—इह इति इमां मधुमङ्गलोल्लसितवक्त्रकञ्जोज्ज्वलद्वचःप्रसरसौष्ठवोच्छलितशीधुधारां रभसा निपीय उन्मदा सुन्दरी सखी सरः सदसि रसिकसभ्यभृङ्गावली च हासध्वनिं मृदु (यथा स्यात्तथा) दधारेति ।

भावार्थः—मधुमङ्गलव्यङ्गयवचसा सर्वे सखायः सर्वाश्च सख्यो मन्दं जहसुरिति सुन्दरी सखी विवृणोति—मन्दहास्येन इह व्यङ्गयगोष्ठयाम् इति इत्थम् इमां पुरोऽभिधीयमानां मधुमङ्गलस्य उल्लसितवक्त्रकञ्जस्य उज्ज्वलद् यद् वचः-

प्रसरसौष्ठवं तस्य उच्छलितां शीधुधारां रभसा सहासा निपीय भृशं पीत्वा उन्मदा आनन्दमग्ना सुन्दरी नाम्नी मनोहरा सखी सदः सरसि सभासरोवरे रसिका ये सभ्या याश्च सभ्यास्त एव भृङ्गाः, तेषाम् आवली च मृदु मन्दं यथा स्यात्तथा हासध्वनिं दधार धृतवती, सर्वेऽपि जहसुरित्यर्थः, इयं मृदुहासं चकारेत्यर्थः ।

समासादिः--मधुमङ्गलस्य उल्लसितं च तद् वक्त्रम् उल्लसितवक्त्रम्, सतत्पुरुषः कर्मधारयः, तद्धि कञ्जम् इवेति उपमितसमासः । वचसः प्रसरः वचःप्रसरस्तस्य सौष्ठवं तस्य उच्छलिता चासौ शीधुधारा ताम्, शीधुनः धारा शीधुधारेति तत्पुरुषः पूर्वम् । 'मैरेयमासवः शीधु' इत्यमरः । अनुप्रासः शब्दालङ्कारो रूपकादयोऽर्थालङ्काराः, ध्वनिकाव्यम् । इत्युत्तमम् । रसिकास्ते सभ्याश्च सभ्याश्च ताः 'पुमान् स्त्रिया-- १।२।६७' इत्येकशेषः । त एव भृङ्गास्तेषाम् आवली । अत्रापि तथैवैकशेषः ।।१४९।।

सुन्दरीप्रोक्तं पद्यं निशम्य कृष्णस्साम्प्रतं ब्रूते वसन्ततिलकाछन्दसा कृतककोपेन-

एतत्तदुक्तमधिगत्य मृषा रुषायं
वाचं रुचातिरुचिरामिति तामुवाच ।
दानं न चेद्ददति मे तदिमा मयैव
सार्द्धं चलन्त्विह महामदनेन्द्रपार्श्वम् ।।१५०।।

अन्वयः--सुन्दरीप्रोक्तमधिगतय स्वयं श्रीकृष्णः कृतककोपो ब्रूते -अयं (श्रीकृष्णः) तदुक्तम् एतद् रुचा अधिगत्य मृषा रुषा ताम् अतिरुचिराम् इति वाचम् उवाच-चेद् मे दानं न ददति, तद् इमा मया एव सार्द्धम् इह महामदनेन्द्रपार्श्वं चलन्तु ।

भावार्थः--कृतककोपः कृष्णः सुन्दरीवाक्यं श्रुत्वा तद्भावमधिगत्वेति वाचम् अतिरुचिरामुवाच -यद् इमाः सख्यः यदि मम दानम् इह गोष्ठीमध्ये न ददति चेत्, मयैव सह महा-मदनेन्द्रस्य महीपतेः पार्श्वं सन्निधानं चलन्तु । तत्रैषां पूजनं स्यादिति व्यङ्ग्यम् ।

समासादिः--मदनश्चासौ इन्द्रः मदनेन्द्रः, महान् चासौ मदनेन्द्रः महामदनेन्द्रः । तस्य पार्श्वम् । अहो अनुप्रासछटा, ध्वनिकाव्यम् ।।१५०।।

सम्प्रति चम्पकलता तदुत्तरं तद्दिशैव ददाति तेनैव च्छन्दसा -

को वा महामनसिजः सखि नैव जाने
कुत्रापि न श्रुतचरो जगतीतलेऽसौ ।
मिथ्यैष यन्महिमनामबलानि तस्य
संकीर्तयेत्तदिह वः परिहासभङ्ग्यं ।।१५१।।

अन्वयः—चम्पकलता वक्ति—हे सखि ! को वा महामनसिजः नैव जाने। असौ जगतीतले कुत्रापि न श्रुतचरः। इह यद् एष तस्य महिमनामबलानि संकीर्तयेत् तद् मिथ्या वः परिहासभङ्ग्यै।

भावार्थः—चम्पकलता परिहसति—हे सखि राधे ! को वा महामनसिजः महामदनेन्द्रो यमयं वक्ति। अहं नैव जाने। इह गोष्ठीमध्ये यद् एष श्रीकृष्णः, तस्य महिमनामबलानि संकीर्तयेद् वदेत्, तत् सर्वं मिथ्या ज्ञेयम्, असौ जगतीतलेऽस्मिन् कुत्रापि नैव नह्येव श्रुतचरः पूर्वं श्रुतः। अनेनैव मिथ्याकल्पित इत्यर्थः। वः युष्माकं परिहासभङ्ग्यै अस्तु, परिहासच्छलाय एवेति तर्कः।

समासादिः—महान् चासौ मनसिजः इति कर्मधारयः। 'भूतपूर्वे चरट्—५।३।५३' इति चरट् श्रुतचरः। व्याजच्छलनिभे भङ्गिः इति रभसः ॥१५ ॥

सम्प्रति काचित् सखी इन्दुवदनां सखीमाह तेनैव च्छन्दसा द्वितीयदिने—

इत्यद्य चम्पकलतालपितं तदानी-
माकर्ण्य गोकुलविधुर्विधुवक्त्रविम्बाम्।
राधां निरीक्ष्य दरभाषितवान् सभायां
सोल्लुण्ठमिन्दुवदने मदनाद्वितीयः ॥१५२॥

अन्वयः—हे इन्दुवदने ! तदानी मदनाद्वितीयः गोकुलविधुः चम्पकलतालपितम् आकर्ण्य अद्य सभायां विधुवक्त्रविम्बां राधां निरीक्ष्य सोल्लुण्ठं दरभाषितवान्।

भावार्थः—काचन सखी इन्दुवदनां सखीं सम्बोधयति द्वितीयदिने—हे इन्दुवदने ! तदानीं गतदिने मदनाद्वितीयः अद्वितीयकामः गोकुलविधुः व्रजचन्द्रः श्रीकृष्णः चम्पकलतालपितं चम्पकलतोक्तम् आकर्ण्य श्रुत्वा अद्य सभायां विधुवक्त्रविम्बां चन्द्रवदनां राधां देवीं निरीक्ष्य सोल्लुण्ठं सकपटं दरभाषितवान् किञ्चिदेवोक्तवान्।

समासादिः—गोकुलस्य विधुरिति तत्पुरुषः। विधुरिव वक्त्रविम्बं सेति बहुव्रीहिः। इन्दुरिव वदनं यस्याः सेति बहुव्रीहिः। 'न क्रोडादिबह्वचः—४।१।५६' इति ङीष्निषेधः ॥१५२॥

श्रीकृष्णोक्तिमेव विवृणोति तेनैव च्छन्दसा—

अत्रैव हृद्यगिरिवर्यविसृष्टपट्ट-
राष्ट्रे विराजति महामदनः सदैव।
तत्सेविकाभिरपि यद्भवतीभिरेव-
माभाष्यते तदिह वो मद एव हेतुः ॥१५३॥

अन्वयः—श्रीकृष्णो वक्ति—महामदनः सदैव अत्रैव हृद्यगिरिवर्यविसृष्टपट्ट-राष्ट्रे विराजति। तत्सेविकाभिः अपि भवतीभिः इह यद् एवम् आभाष्यते। तद् वः मद एव हेतुः।

भावार्थः—स्पष्टं श्रीकृष्णो वक्ति-अयि सख्यः! महामदनः अत्रैव हृद्यगिरिवर्य-विसृष्टपट्टराष्ट्रे हृद्यं यद्गिरिवर्ये विसृष्टं पट्टं यद् राष्ट्रं तस्मिन् सदैव सर्वदा विराजति स्वामित्वेन वर्तते। तस्य सेविकाभिः परिचारिकाभिः अपि भवतीभिः युष्माभिः इह गोष्ठीमध्ये यत् प्रत्यक्षम्, एवं मिथ्या आभाष्यते भण्यते। तत् तत्र वः युष्माकं मदः गर्व एव हेतुः कारणम्। यूयं मदमत्ता एव इत्यनर्गलं ब्रूथ।

समासादिः—गिरिषु वर्यः श्रेष्ठः गिरिवर्यः, तत्र विसृष्टं च तत् पट्टं प्रधानराष्ट्रम्। हृद्यं च तद् गिरिवर्यविसृष्टपट्टराष्ट्रं हृद्यगिरिवर्यविसृष्टपट्ट-राष्ट्रं तस्मिन्। इति समासचक्रम्। पट्टं प्रधानमप्याहुरिति रभसः राष्ट्रं राज्यं प्रसिद्धम्।

पुना राधोक्तिं विवृणोति महाकविस्तेनैव च्छन्दसा—

संलभ्य सत्रसदने गमनेऽद्य बाधां
राधा मुधा स्फुरितरोषरसाभिषिक्ता।
तिर्यक् स्फुरन्नयननर्तनतीव्रवाणै-
राविध्य कृष्णमधुना मधुवागुवाच ॥१५४॥

अन्वयः—अद्य (द्वितीयदिनेऽपि) सत्रसदने गमने बाधां संलभ्य मधुवाक् राधा मुधा स्फुरितरोषरसाभिषिक्ता (सती) कृष्णं स्फुरन्नयननर्तनतीव्रवाणैः तिर्यक् आविध्य अधुना उवाच।

भावार्थः—द्वितीयदिने गोष्ठ्यां यद् वृत्तं तदेव विवृणोति स्वयं महाकविः—अद्य द्वितीयदिनेऽपि सत्रसदने यज्ञमण्डपे गमने बाधां रोधं विघ्नमिति यावत्, संलभ्य प्राप्य मधुवाक् प्रियंवदापि राधा मुधा मिथ्या स्फुरितेन रोष-रसेन अभिषिक्ता व्याप्ता सती कृष्णं स्फुरन्नयननर्तनेन तीव्रवाणैः अमोघकटाक्षैः तिर्यक् आविध्य भित्त्वा अधुना समुचितसमये उवाच अभिहितवती।

समासादिः—मधुवाक् यस्याः सा। स्फुरितश्चासौ रोषः कोपः स एव रसः, तेन अभिषिक्तेति समासचक्रम्। स्फुरन्ती च ते नयने तयोः नर्तनम्, तेन जाता ये तीव्रा वाणाः तैः। अत्रानुप्रासच्छटा रमणीया। अतिशयोक्तिरलङ्कारश्चार्थः ॥१५४॥

अथ व्यङ्ग्यवाणेनैव सा ब्रूते तेनैव च्छन्दसा—

हे वीर वल्लववधूवदनारविन्द-
माध्वीकपानभरतः परमातिशुद्ध।
भाग्यात्त्वया सह यया चलितं वराक्ष्या
वाटं ररक्ष गृहधर्मकुलानि सैव ॥१५५॥

अन्वयः—हे वल्लववधूवदनारविन्दमाध्वीकपानभरतः परमातिशुद्ध वीर ! त्वया सह यया वराक्ष्या वाटं चलितम्, सा एव भाग्याद् गृहधर्मकुलानि ररक्ष ।

भावार्थः—राधा प्रतीपलक्षणया कृष्णं स्तौति–हे वल्लववधूनां वदनारविन्दस्य माध्वीकपानभरेण परमातिशुद्ध ! अत्यन्तशुद्ध ! तथा वीर धर्मवीर ! त्वया परमपवित्रेण सह यया वराक्ष्या सुनयनया वाटं पन्थाः चलितम्, सा एव नान्या भाग्याद् गृहधर्मकुलानि ररक्ष जुगोप । तस्या गृहधर्मकुलानि सर्वाण्येव व्यपगतानि एतादृग् धर्मवीरस्त्वम् इति विपरीतलक्षणया व्यङ्गचवर्षणम् ।

समासादिः-वल्लवानां वध्वस्तासां वदनानि एव अरविन्दानि मयूरव्यंसकादित्वात् समासः, तेषां माध्वीकं तस्य पानम्, तस्य भरस्तस्मात् । परमश्चासौ अतिशुद्धः । इति कर्मधारयः । चलनक्रियायोगेन वाटे कर्मत्वम्, कर्मत्वेनोक्तत्वं च विपरीतलक्षणया ध्वनिरिति उत्तमकाव्यं त्वया सह मार्गचलनं सर्वधर्मविलनमित्येव व्यङ्गचम् ।।१५५।।

सम्प्रति नान्दीमुखी सखी सधन्यवादं ब्रूते वसन्ततिलकयैव च्छन्दसा—

दृष्ट्वा तयोः कलिमनल्परसातिबद्ध-
माचार्ययोर्विविधनर्मकलाकलापि ।
शान्त्युच्छलद्विनयवाक्यकुलैस्ततस्तौ
नान्दीमुखी समभिनन्द्य हरिं जगाद ।।१५६।।

अन्वयः—नान्दीमुखी सखी आचार्ययोः तयोः अनल्परसातिबद्धं कलिं (वाग्युद्धम्) दृष्ट्वा ततस्तौ विविधनर्मकलाकलापि शान्त्युच्छलद्विनयवाक्यकुलैः समभिनन्द्य हरिं जगाद ।

भावार्थः—नान्दीमुखी मङ्गलमुखी कापि सखी आचार्ययोः वाक्क्रीडानिष्णातयोस्तयोः राधामाधवयोः अनल्परसातिबद्धं नानारससम्पृक्तं कलिं वाग्विवादं दृष्ट्वा ततस्तदनन्तरं तौ राधामाधवौ विविधनर्मकलाकलापिभिः अनेकविलासकलाशालिमयूरसमैः शान्त्युच्छलद्विनयवाक्यकुलैः शान्तिसिक्तविनयवाक्यकदम्बैः तौ समभिनन्द्य प्रशस्य हरिं श्रीकृष्णं जगाद उवाच ।

समासादिः—अनल्पाश्च ते रसाः अनल्परसाः, तैः अतिबद्धम् । विविधा नर्मकला येषां ते विविधनर्मकलाः, ते च ते कलापिनः, शान्त्या उच्छलन् विनयो यत्र तानि च तानि वाक्यानि शान्त्युच्छलद्विनयवाक्यानि तेषां कुलैः । इति समासचक्रम् । गदक्रिययोपसृष्टस्य कृष्णस्य कर्मत्वमिति द्वितीया ।।१५६।।

नान्दीमुखी किमाहेति निर्दिशति तेनैव च्छन्दसा—

दानीन्द्रमाङ्गलिकयज्ञनिमित्तमेताः
शुद्धा नयन्ति शिरसा नवगव्यकुम्भान् ।
धर्मं निरीक्ष्य कुलचन्द्र ! विमुञ्च तस्मात्
कामं यथा भवति ते यशसः प्रचारः ॥१५७॥

अन्वयः--हे कुलचन्द्र ! शुद्धा एताः (कुमार्यः) दानीन्द्रमाङ्गलिकयज्ञनिमित्तं शिरसा नवगव्यकुम्भान् नयन्ति । तस्माद् धर्मं निरीक्ष्य एताः) मुञ्च । यथा ते कामं यशसः प्रचारः भवति ।

भावार्थः—यद्यपि अन्वय एव भावार्थोऽपि गतार्थस्तथापि मनाग्विव्रियते—हे कुलचन्द्र ! वंशप्रकाशक ! शुद्धा निश्छला एता वल्लवः कुमार्यः दानीन्द्रस्य परमदानशीलस्य माङ्गलिकं निमित्तीकृत्य शिरसा श्रद्धातिरेकेण नवगव्यस्य नवनीतस्य (हैयङ्गवीनस्येति यावत्) कुम्भान् कलसान् नव्यगव्यसम्भृतसुवर्णघटानित्यर्थः । नयन्ति तत्र प्रापयन्ति । तस्माद् धर्मं धर्मकृत्यमिदमिति निरीक्ष्य विलोक्य मुञ्च त्यज । यथा यतः ते तव यशसः कीर्तेः प्रचारः सर्वत्र भवतीति ।

समासादिः--कुलस्य चन्द्र इवेति उपमितसमासः । दानिनाम् इन्द्रस्तस्य, माङ्गलिकश्चासौ यज्ञ इति कर्मधारयः, स निमित्तं यस्मिन् तद् यथा तथेति क्रियाविशेषणे बहुव्रीहिः । नवं च तद् गव्यं नवगव्यम्, तस्य कुम्भास्तान् कर्मधारयगर्भस्तत्पुरुषः । अत्र प्रसादो गुणः ॥१५७॥

इतः १६० पद्यान्तं नान्दीमुखी व्रजवनभुवं वर्णयति पृथ्वीछन्दसा—

गिरीन्द्रपुरतः स्फुरन्नवसरोवरस्योन्नत-
प्रसन्नवरवारिणः कुसुमसंघसौरम्भिणः ।
धनाढचखगरङ्गिणः परित एव सद्भूरुहैः
समृद्धमधिकं वनं जयति यत्र खेलास्पदे ॥१५८॥

अन्वयः—नान्दीमुखी सखी प्रथमं व्रजवनं वर्णयति—यत्र खेलास्पदे गिरीन्द्रपुरतः उन्नतप्रसन्नवरवारिणः कुसुमसङ्घसौरम्भिणः धनाढचखगरङ्गिणः सद्भूरुहैः एव अधिकं समृद्धं वनं जयति ।

भावार्थः—नान्दीमुखी सखी कथयति—खेलास्पदे क्रीडास्थाने गिरीन्द्रस्य पर्वतराजस्य पुरतोऽग्रे उन्नतप्रसन्नवरवारिणः अधिकस्वच्छमधुरजलशालिनः पुष्पप्रचुरसौरभशालिनः स्फुरन्नवसरो कलरवकर्तृकुन्तवतः वरस्य परितः श्रेष्ठवृक्षैरेव भृशं समृद्धं वनं जयति सर्वोत्कर्षेण वर्तते ।

समासादिः—खेलाया आस्पदं तस्मिन् तत्पुरुषः । गिरीणामिन्द्रः तस्येति तत्पुरुषः । स्फुरत् चासौ नवश्चासौ सरोवरस्तस्येति पूर्ववत् तत्पुरुषः । उन्नतं प्रसन्नं

वरं वारि यस्यासौ तस्येति बहुव्रीहिः। कुसुमानां सङ्घः, तेन सौरम्भी तस्येति तत्पुरुषः। सन्तश्च ते भूरुहास्तैः कर्मधारयः। सम्पूर्वकात् ऋधुधातोक्तेः 'यस्य विभाषा—७।२।१५' इतीणिषेधः ॥१५८॥

पुनर्वनमेव विशिनष्टि पृथ्वीछन्दसा—

क्वचित् क्वचन सुन्दरं रुवति मत्तभृङ्गावली
मधु-प्रसरमन्दिरे सुरभिपुष्पवृन्दोदरे।
क्वचित् क्वचन कोकिलाः कलरुतानि संतन्वते
रसालनवमञ्जरीपरमरन्दपानोन्मदाः ॥१५९॥

अन्वयः—(वनेऽस्मिन्) क्वचित् क्वचन सुरभिपुष्पवृन्दोदरे मधुप्रसरमन्दिरे मत्तभृङ्गावली सुन्दरं रुवति। क्वचित् क्वचन रसालनवमञ्जरीपर-मरन्द-पानोन्मदाः कोकिलाः कलरुतानि सन्तन्वते।

भावार्थः—अस्मिन् कानने क्वचित् क्वचन सुगन्धिपुष्पराशिमति भूरिमधुसङ्घशालिनि निकुञ्जकुञ्जादौ मत्तभृङ्गावली सुन्दरं रुवति गुञ्जति। क्वचित् क्वचनाम्रादिद्रुमेषु रसालानां नवमञ्जरीणां श्रेष्ठमकरन्दपानेन उन्मदाः कोकिलाः शकुन्ताः कलरुतानि 'कुहू-कुहू' इति शब्दान् कूजन्ति। अद्भुता सुषमा दृशेलिमा वनराजेरिति भावः।

समासादिः—मत्ता चासौ भृङ्गावलीति कर्मधारयः। मधूनां प्रसरो यस्मिन्निति व्यधिकरणबहुव्रीहेः पश्चाद् मधुप्रसरं च तन्मन्दिरं लतागुल्मादिस्थानं तस्मिन्निति कर्मधारयः। सुरभीणि च तानि पुष्पाणि तेषां वृन्दम् उदरे यस्येति बहुव्रीहिः, तस्य सप्तम्यन्तं रूपं मन्दिरविशेषणत्वात्। भावार्थे कृतसमासमन्यत्, अनुप्रासबहुलं पद्यम् ॥१५९॥

पुनर्वनमेव वर्णयति नान्दीमुखी तेनैव च्छन्दसा—

क्वचित् क्वचन केकिनः पृथु नटन्ति केचिन्मदात्
क्वचित् क्वचन केचन प्रतिनदन्ति सम्मोदिनः।
क्वचित् क्वचन माधुरीभररसालहृद्योज्ज्वलत्-
फलप्रकरभक्षणे पटु रटन्ति शारीशुकाः ॥१६१॥

अन्वयः—काननेऽस्मिन् क्वचित् क्वचन केचित् केकिनः मदात् पृथु (यथा स्यात्तथा) नटन्ति। क्वचित् क्वचन सम्मोदिनः केचन त एव प्रतिनदन्ति। क्वचित् क्वचन शारीशुकाः माधुरीभररसालहृद्योज्ज्वलत्फलप्रकरभक्षणे पटु यथा स्यात्तथा रटन्ति।

भावार्थः—वनमिदमतिसमृद्धमिति अवर्णनीयमस्ति, तथा हि क्वचित् क्वचन केचित् प्रहृष्टाः केकिनो मयूरा मदात् मदप्रभावात् पृथु उच्चैर्नटन्ति नृत्यन्ति।

क्वचित् क्वचन सम्मोदिन आनन्दप्लुताः केचन मयूरा एव प्रतिनदन्ति स्वजातीनां केकां श्रुत्वा प्रतिशब्दायन्ते। क्वचित् शारीभिः सहिताः शुकाः हरित्पक्षिणः माधुरी-सम्भृताम्रास्वाद्यवरफलवृन्दभक्षणार्थं पृथु भृशं रटन्ति। एतादृग् विचित्रसुषमाऽस्य वनस्येति भावः।

समासादिः माधुर्या भरो यत्र तादृशश्चासौ रसालो द्रुमः, तस्य हृद्यम् उज्ज्वलितं यत् फलं तस्य प्रकरो वृन्दं तस्य भक्षणे। अत्र निमित्तेऽर्थे 'निमित्तात् कर्मयोगे—२।३।३६' इति वार्तिकबलात् सप्तमी ॥१६०॥

इदानीं नान्दीमुखी दानप्रकारं निर्वक्ति इन्द्रवज्राछन्दसा—

श्वस्तावदेतस्सरसो निकुञ्जमेताः समेष्यन्ति महानपि त्वम्।
तत्रैव युक्तं तव दानमेतत् सन्दापयिष्याम्यथ लग्निकाऽहम् ॥१६१॥

अन्वयः—नान्दीमुखी निगदति—तावदादौ श्वः सरसः एतत् निकुञ्जम् एताः समेष्यन्ति महानपि त्वं तत्रायाहि। अथ लग्निका (प्रतिभूः) अहं तव एतद् युक्तम् उचितं चेद् दानं तत्रैव सन्दापयिष्यामि।

भावार्थः—नान्दीमुखी वावदूका हि सर्वं निर्णयति—तावदादौ वाक्यालङ्कारे वा श्व आगामिनिदिने सरसः जलाशयस्य एतद् वर्तमानं निकुञ्जं लतादिपिहितं स्थानम् एताः सख्यः समेष्यन्ति। अत्रैव महान् अपि त्वं भवान् आयाहि। अथ अनन्तरं तत्रैव स्थाने तव एतद् दानं युक्तम् उचितं चेत्, लग्निका प्रतिभूः भूत्वा अहम् सन्दापयिष्यामि। इति निर्णयः।

समासादिः—'तावदित्यव्ययं प्रारम्भे वाक्यालङ्कारे वा' इत्यमरः। 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। युक्तमिति पदं दानस्य मिथ्यात्वं व्यञ्जयति ॥१६१॥

तद्वाक्यमुपसंहरति महाकविर्हि रुद्रोपजातिच्छन्दसा—

यतोऽत्र निर्वर्त्यमिदं हि दानं गिरौ वरस्यास्य सरोवरस्य।
तद्दाननिर्वर्तनमित्यभिख्या भविष्यतीत्येव च सा जगाद ॥१६२॥

अन्वयः—अस्य वरस्य (प्रसिद्धस्य) सरोवरस्य हि अत्र (प्रसिद्धे) गिरौ इदं दानं निर्वर्त्यम्, यतः दान-निर्वर्तनं तत् स्थानम् इति अभिख्या भविष्यति। इत्येव सा (नान्दीमुखी) जगाद (उवाच)। सखीनां पलायनस्य भूमिकां निर्दिदेशेति व्यङ्ग्यम्।

भावार्थः—नान्दीमुखी सहचरीणां पलायनस्य मार्गं निर्दिशति पद्येनानेन—अस्य वरस्य प्रसिद्धस्य सरोवरस्य श्रेष्ठजलाशयस्य अत्र प्रसिद्धे गिरौ पर्वते इदं दानं निर्वर्त्यं सम्पूरणीयं सुखावहं स्यात्। यतो दाननिर्वर्तनं तत् प्रसिद्धं स्थानम्

इति अभिख्या स्मृतिश्चिह्नं भविष्यतीति सा नान्दीमुखी जगाद चख्यौ, सखी-पलायनपथमुपदिदेशेति व्यङ्गचम् ।

समासादिः--अत्र वरशब्दः प्रसिद्धेऽर्थे द्वितीयवरशब्दस्य श्रेष्ठार्थकत्वात् । अत्र शब्दोऽपि तथैव । सर्वोऽयं प्रपञ्चः सखीनां कृष्णवागुरातो मोचनार्थो ज्ञेयः ।।१६२।।

नान्दीमुखीप्रपञ्चफलमधुना व्यक्तीभवति तेनैव च्छन्दसा (रुद्रोपजात्या)--

अनेन तस्या वचनेन तेन विहस्य मुक्ताः स्थितचारुवक्त्राः ।
तं वीक्षमाणा नयनाञ्चलैस्ताश्चेलुर्मुदा यज्ञगृहाय पूर्णाः ।।१६३।।

अन्वयः--(वागुरातो मुक्ता मृग्य इव) तेन (व्यङ्गचमयेन) अनेन (पूर्वोक्तेन) नान्दीमुखीवचनेन विहस्य मुक्ताः ताः पूर्णाः (सर्वाः) स्मितचारुवक्त्राः नयनाञ्चलैः नेत्राञ्चलैः तं (कृष्णम्) वीक्षमाणा मुदा यज्ञगृहाय चेलुः ।

भावार्थः—वागुरातो मुक्ता हरिण्य इव तेन प्रपञ्चमयेन अनेन नान्दीमुखी-वचनेन विहस्य स्मितं कृत्वा मुक्ताः कृष्णवागुरातो निःसृतास्ताः पूर्णाः सर्वा अपि स्मितचारुवक्त्रा ईषद्धासमुख्यस्तं श्रीकृष्णं नयनाञ्चलैः कटाक्षबाणैः वीक्षमाणा उपघ्नत्यो मुदा प्रहर्षेण चेलुः पलायाञ्चक्रिरे ।

समासादिः—स्मितं चारु यस्य तत् स्मितचारुवक्त्र यासां ताः । नयनानाम् अञ्चलानि, तैः । ध्वनिकाव्यमिदम् ।।१६३।।

सम्प्रति राधायाः पूर्वं सात्त्विकभावं विवृणोति वसन्ततिलकया--

कृष्णाक्षिमत्तमधुपे निजदृष्टिभृङ्गीं भङ्गया परिस्फुरदनङ्गतरङ्गिताङ्गी ।
ग्रीवार्द्धभङ्गरुचिरं दरयोजयन्ती स्मित्वाऽलिवर्गवलिता चलिताऽथ राधा ।।१६४।।

अन्वयः--महाकविरेव राधायाः पूर्वं सात्त्विकभावं व्यनक्ति—अथ भङ्गचा परिस्फुरदनङ्गतरङ्गिताङ्गी आलिवर्गवलिता राधा स्मित्वा कृष्णाक्षिमत्तमधुपे निजदृष्टिभृङ्गीं ग्रीवार्द्धभङ्गरुचिरं यथा स्यात्तथा दर (इत्यव्ययम्, द्वितीयातत्पुरुषो वा) ईषद् योजयन्ती चलिता ।

भावार्थः--अथ सखी-समुत्थानानन्तरं भङ्गचा कौटिल्येन परिस्फुरदनङ्गेन तरङ्गिताङ्गी कम्पितगात्रा आलिवर्गैः सखीसंघैः वलिता प्राप्तसाहसा राधा स्मितं दरहासं कृत्वा कृष्णाक्षिमत्तभृङ्गे निजदृष्टिभृङ्गीं ग्रीवार्द्धभङ्गेन रुचिरं यथा स्या-त्तथा दरयोजयन्ती ईषद् आसञ्जयन्ती चलिता ततो गोष्ठीतो बहिर्बुभूषाञ्चकार ।

समासादिः—(भङ्गी कौटिल्यभेदो विच्छित्तिर्वेति अमरटीका) परिस्फुरन् चासौ अनङ्गस्तेन तरङ्गितम् अङ्गं यस्याः सा 'अङ्गगात्रनेत्रकण्ठेभ्यो वा'—४।१।५४'

इति वार्तिकबलान्ङीष्। दरं योजयन्तीति तत्पुरुषः। कृष्णस्य अक्षि एव मत्तमधुपः, मयूरव्यंसकादित्वात् समासः, तस्मिन्। निजा दृष्टिरेव भृङ्गी ताम्। अत्रापि स एव समासः। आलिवर्गैः वलिता। ग्रीवाया अर्धभङ्गेन रुचिरम्, यथा स्यात्तथेति समासचक्रम् ॥१६४॥

इदानीं कृष्णरागं विवृणोति महाकवी रुद्रोपजात्या--

तदैव तासां मुखपङ्कजानां स्मितस्फुरन्मञ्जुमरन्दबिन्दून्।
नेत्रान्तवक्त्रेण पिबन्नितान्तं मुकुन्दभृङ्गो मुदमाप सोऽपि ॥१६५॥

अन्वयः--तदैव स मुकुन्दभृङ्गः अपि नेत्रान्तवक्त्रेण तासां मुखपङ्कजानां स्मितस्फुरन्मञ्जुमरन्दबिन्दून् नितान्तं पिबन् मुदम् आप।

भावार्थः--तदैव सखी राधा कृष्णमधुपे नेत्रबाणं निक्षिप्य चचाल, तन्मध्य एव स मुकुन्दो भृङ्गः अपि नेत्रान्तवक्त्रेण विशालनेत्रशालिनाऽऽस्येन तासां सर्वासामेव सराधानां सखीनां मुखपद्मानां स्मितस्फुरन्मञ्जुपुष्परसबिन्दून् नितान्तं पिबन् मुदम् आनन्दम् आप प्राप्तवान्।

समासादिः—मुकुन्दश्चासौ भृङ्ग इति कर्मधारयः। नेत्रे अन्ते उभयप्रान्ते यस्य तद् नेत्रान्तम्। नेत्रान्तं च तद्वक्त्रम्। इति बहुव्रीहिगर्भः कर्मधारयः। विशालनेत्रसूचकं विशेषणम्। मुखानि पङ्कजानीवेति उपमितसमासः। स्मितान्येव स्फुरन्तो मञ्जवो मरन्दानां बिन्दवस्तान्, तत्पुरुषानन्तरं मयूरव्यंसकादित्वात्समासः। श्रीकृष्णस्य सात्त्विकभावं ध्वनयति पद्यमित्युत्तमकाव्यम्। उपमारूपकसङ्करालङ्कारः ॥१६५॥

सम्प्रति केलिक्रीडां विहाय गोचारणलीलां प्रस्तौति महाकविरुपजात्या—

ततो वयस्यैः सह नागरोऽसौ गोवर्धनाद्रेः सशिरोवतंसः।
गाश्चारयन् दानकथामृतं तत् कुर्वन् मिथो मोदमवाप कृष्णः ॥१६६॥

अन्वयः--ततो (दानकेलिक्रीडानन्तरम्) नागरः सशिरोऽवतंसः कृष्णः वयस्यैः सह गोवर्द्धनाद्रेः (उपरि) गाः चारयन् तत् (पूर्ववृत्तम्) दानकथामृतं कुर्वन् मिथः (परस्परम्) मोदम् अवाप।

भावार्थः—दानकेलिं विजहत् कृष्णो निजप्रियं गोचारणं करोति—ततो राधानिरीक्षणानन्तरं नागरः शिरोऽवतंसेन मुकुटेन सहितः पक्षे गोवर्द्धनाद्रेः शिरोऽवतंसः स इति पृथक् पदं वा, कृष्णः वयस्यैः सखिभिः सह गोवर्द्धनगिरेः उपरि गाः गोवत्सान् चारयन् तत् पूर्ववृत्तं दानकथामृतं कुर्वन् मिथः परस्परम् वयस्येष्वेव मोदम् आनन्दम् अवाप लेभे।

समासादिः—नगरे भवः नागरः 'तत्र भवः—४।३।५३' इत्यण्। दानकथा अमृतम् इवेति उपमितसमासः। कृष्णस्य गोप्रियत्वं वीक्ष्यापि भारतीया गोसेवा शून्या इति शोच्यास्ते ॥१६६॥

सम्प्रति राधावृत्तमाख्याति महाकविरेव वसन्ततिलकया—

कान्त्या दिशो दश मुहुर्गुरुगौरयन्ती भ्राजद्-दृगन्तनटनैरतिनीलयन्ती।

सापि स्मितार्द्धकलया परिशुक्लयन्ती वार्तामृतैर्मधुरयन्त्युरुसत्रमाप ॥१६७॥

अन्वयः—सा (प्रसिद्धा) राधा अपि कान्त्या दशदिशो मुहुः गुरु गौरयन्ती, भ्राजद्-दृगन्तनटनैः मुहुः अतिनीलयन्ती, स्मितार्द्धकलया मुहुः परिशुक्लयन्ती, वार्तामृतैः मुहुः मधुरयन्ती उरुसत्रम् (इति उभयत्र कर्म) आप (प्राप्तवतीत्यन्वयः)। यथा मुहुरित्यस्य सर्वत्र सम्बन्धस्तथैव उरुसत्रस्य गौरयन्तीत्यादि क्रियाणाम् आप्नोतीत्यस्यापि कर्मणा सम्बन्धो ज्ञेयः।

भावार्थः—राधावृत्तमपि तद्वदेवाख्याति—सखीगोष्ठीत उत्थिता सा प्रसिद्धा राधा अपि कान्त्या निजसुवर्णवर्णेन उरुसत्रं दशदिशश्च मुहुः गुरु गौरयन्ती गौरवर्णं कुर्वती भ्राजतः शोशुभ्यमानस्य दृगन्तस्य नटनैरुभयं कर्म (उरुसत्रम्, दशदिशश्च) मुहुः अतिनीलयन्ती नीलीकुर्वती, स्मितस्य अर्द्धकलया उभयं मुहुः परिशुक्लयन्ती परितः शुक्लीकुर्वती, वार्तारूपैरमृतैरुभयं मुहुः मधुरयन्ती मधुरीकुर्वती उरुसत्रं महासत्रम् आप प्राप्ता। उरुसत्रम् इत्यस्य गौरयन्तीत्यादिक्रियाभिः सह आप्नोतीत्यनयापि क्रियाऽन्वयो ज्ञेयः।

समासादिः—उरुश्चासौ सत्र इति कर्मधारयः। गौरं करोतीति विग्रहे 'तत्करोति तदाचष्टे–३।१।२५' इति गणसूत्रेण णिच्, ततः शत्रन्तान्ङीप् सर्वत्र। आप्लृधातोर्लिटि द्वित्वादिना आपेति। भाविकालङ्कारोऽनुप्रासच्छटादृशेलिमा ॥१६७॥

सम्प्रति सर्वसखीवृत्तमाह महाकवी रुद्रोपजात्या—

प्रणम्य गव्यं विनयेन दिव्यं प्रदाय तेभ्यो वरभूषणानि।

संलभ्य रम्याणि पुनः स्वकुण्डमासाद्य तास्तत्कथया विजह्रुः ॥१६८॥

अन्वयः—ताः (सख्यः) विनयेन (उरुसत्रस्थितान् ऋषीन्) प्रणम्य दिव्यं गव्यं तेभ्यः (चतुर्थी) प्रदाय तेभ्यः (पञ्चमी) रम्याणि वरभूषणानि संलभ्य पुनः स्वकुण्डम् आसाद्य तत्कथया (दानकेलिवार्तया, कृष्णवार्तया वा) विजह्रुः।

भावार्थः—ताः गोष्ठीगाः सख्यः उरुसत्रं गत्वा विनयेन तत्रत्यान् यज्ञकर्तॄन् ऋषीन् प्रणम्य अभिनन्द्य तेभ्यः (सम्प्रदाने चतुर्थी) दिव्यं गव्यं हैयङ्गवीनं प्रदाय तेभ्यः (अपादाने पञ्चमी) रम्याणि बहुमूल्यानि वरभूषणानि सुशिल्पाभूषणानि

संलभ्य सम्प्राप्य पुनः पश्चात् स्वकुण्डम् आसाद्य अधिगत्य तत्कथया दानकेलिकथया कृष्णकथया वा विजह्रुः विहरन्ति स्म ।

समासादिः—वराणि च तानि भूषणानि । इति कर्मधारयः । अत्र ल्यप्-पंक्तिः परिपूर्णाऽनुप्रासदा । तस्येति दानकेलिचिन्तामणेः श्रीकृष्णस्यापि परामर्शकस्तच्छब्दः । स्वभावोक्तिरप्यत्र । विपूर्वको हृञ् विहारार्थे ॥ १६८ ॥

सखीनां दिव्यशोभामनुष्टुभाऽऽख्याति महाकविः—

रेजुस्ताः प्रेमसौभाग्य-सौन्दर्यादि-गुणश्रियः ।
सारैर्मुनिवराल्लब्धैर्भूषणैश्च विभूषिताः ॥ १६९ ॥

अन्वयः—प्रेम-सौभाग्य-सौन्दर्यादि-गुणश्रियः ताः मुनिवरात् लब्धैः सारैः भूषणैर्भूषिताः च विरेजुः ।

भावार्थः—सखीदशां विशिनष्टि महाकविः—प्रेम-सौभाग्य-सौन्दर्यादिसर्वगुण-शोभासम्भृताः प्रधानमुनिवरहस्तलब्धैश्च वरार्हैर्भूषणैर्विभूषितास्ताः सख्यो भृशं राजन्ते स्म ।

समासादिः—प्रेम च सौभाग्यं च सौन्दर्यादयश्च ये गुणास्तेषां श्रीर्यासां ता इति समासचक्रम् । ससररववादीनामनुप्रासो भाविकश्चार्थालङ्कारः ॥ १६९ ॥

सम्प्रति विशेषतो राधां विशिनष्टि रुद्रोपजात्या—

राधा महाप्रेमरसाभिषिक्ता स्मरक्रियाशास्त्रविशारदा सा ।
सुविह्वला सात्त्विकमुख्यभावैः प्रियं जगौ प्राण-सखीवृतोच्चैः ॥१७०॥

अन्वयः—महाप्रेमरसाभिषिक्ता स्मरक्रियाशास्त्रविशारदा प्राणसखीवृता सा राधा सात्त्विकमुख्यभावैः सुविह्वला (सती) प्रियम् उच्चैः जगौ ।

भावार्थः—महाप्रेम्णः शक्तिशक्तिमदभिन्नप्रेम्णो रसेन अभिषिक्ता स्मर-क्रियाशास्त्रविशारदा कामशास्त्रनिष्णाता प्राणसखीभिः परिवेष्टिता सा प्रसिद्धा राधा शान्ता शक्तिः सात्त्विकप्रधानभावैः सुविह्वला आत्मानं वोढुमसमर्था सती प्रियं श्रीकृष्णम् उच्चै रात्रिन्दिवं जगौ गाति स्मेति भावः ।

समासादिः—महान् चासौ प्रेम तस्य रसस्तेन अभिषिक्तेति समासचक्रम् । स्मरक्रियाशास्त्रे विशारदेति तत्पुरुषः । सात्त्विका ये मुख्यभावास्तैः कर्मधारयः । प्राणवत् प्रियाः सख्यस्ताभिः वृतेति समासचक्रम् ॥ १७० ॥

सम्प्रति दम्पतियुग्मं वर्णयति महाकविर्वसन्ततिलकया—

त्रैलोक्यवर्तिनवदम्पतिमूर्द्धरत्नं
दग्धस्मराङ्गघटनोन्नतसिद्धतन्त्रम् ।
लीलाविलासनवसर्जनवेधसं तद्
युग्मं न वर्णयितुमब्जभवोऽपि शक्तः ।। १७१ ।।

अन्वयः--त्रैलोक्यवर्तिनवदम्पतिमूर्द्धरत्नम्, दग्धस्मराङ्ग-घटनोन्नतसिद्ध-तन्त्रम्, लीलाविलासनवसर्जनवेधसं तद् युग्मं (राधामाधवयोः) वर्णयितुम् अब्ज-भवः अपि न शक्तः (समर्थः) ।

भावार्थः—लोकोत्तरमिदं दम्पतियुग्मम् इति प्रमाणयति--यतः त्रैलोक्य-वर्तिनां नवदम्पतीनां मूर्द्धरत्नं शिरोभूषणम्, पुनः दग्धस्य शिवभस्मीकृतस्य स्म-रस्य अङ्गघटनाया उन्नतं सिद्धं तन्त्रम्, लीलाविलासयोर्नवसर्जने वेधसं ब्रह्माणं तत् प्रसिद्धं राधामाधवयोः युग्मं वर्णयितुम् अब्जभवो ब्रह्मा अपि न शक्तः समर्थ इति भावः ।

समासादिः--त्रैलोक्ये वर्तिनो, ये नवदम्पतयस्तेषां मूर्द्धरत्नमिति समास-चक्रम् । दग्धश्चासौ स्मरस्तस्य अङ्गघटना तस्या उन्नतं सिद्धं च तत् तन्त्रमिति समासचक्रम् । लीला च विलासश्च तौ तयोः नवसर्जनं तस्य तत्र वा वेधास्तम्, तत् प्रसिद्धं युग्मं शक्तिशक्तिमद्रूपं वर्णयितुम् अब्जाद् भवो यस्येति व्यधिकरण-बहुव्रीहिः ।। १७१ ।।

सम्प्रति कुन्दलता सखी दम्पतियुग्मं द्रष्टुमभिसरति मालिनीछन्दसा—

इति विलसितवार्तां कुन्दवल्लीरसाक्तां
रहसि परिनिशम्यानन्दसिन्धौ निमग्ना ।
द्रुतमथ निजसख्या सा समृद्धा तथाद्धा
तदिह मिथुनरत्नं द्रष्टुमुत्का चचाल ।। १७२ ।।

अन्वयः—कुन्दवल्ली (कुन्दलता सखी) इति रसाक्तां विलसितवार्तां निज-सख्या रहसि परिनिशम्य समृद्धा तथा अद्धा उत्का (सती) अथ तद् मिथुनरत्नं द्रष्टुं द्रुतं चचाल ।

भावार्थः—अन्वये गतार्थो भावार्थः । कुन्दलता सखी रहसि दम्पत्योर्विलास-वार्तां श्रुत्वा समुत्का तद् युग्मरत्नं द्रष्टुं द्रुतं तत्र गतवतीति भावः । नेह समासादिः ।।१७२।।

सम्प्रति अन्धः प्रज्ञाचक्षुरयं महाकविः स्वेष्टदेवं स्तौति वसन्ततिलकया—

दध्यादिदाननवकेलिरसाब्धिमध्ये
मग्नं नवीनयुवरत्नयुगं व्रजस्य ।
नर्मालिहृद्यमुदितद्युतिगौरनील-
मन्धोऽपि लुब्ध इह लोकितुमुत्सुकोऽस्मि ॥ १७३ ॥

अन्वयः—अथ प्रज्ञाचक्षुः महाकविः स्वयं भावं विवृणोति यद् अन्धः लुब्धः दध्यादिदाननवकेलिरसाब्धिमध्ये मग्नं नर्मालिहृद्यम् उदितद्युतिनीलगौरं व्रजस्य नवीनयुवरत्नयुगम् इह लोकितुम् उत्सुकः अस्मीति ।

भावार्थः—प्रज्ञाचक्षुरयं महाकविः स्वीयं साम्यं सूरदासभाषाकविसमा-वेदयन् वक्ति यद् अन्धः लुब्धश्च (सूरदाससाम्यसूचकं विशेषणद्वयम्) अहं दध्यादिदाननवकेलिमहासमुद्रे मग्नं नर्मालीनां कीडाकौतुकिसखीनां हृद्यम् उदित-द्युतिप्रदीप्तं नीलगौरं कृष्णराधारूपं व्रजस्य नवीनं युवा च युवतिश्चेति युवम् एव रत्ने तयोर्युगम् युग्मम्, इह अस्मिन्नेव जन्मनि लोकितुं दिव्यचक्षुषा उत्सुकः उत्कण्ठितः अस्मि ।

समासादिः—दध्यादीनां दानं तस्मै नवः केलिस्तस्य रसानाम् अब्धिस्तस्य मध्ये । इति समासचक्रम् । नर्मालीनां हृद्यम् । उदिता द्युतिः यस्य तत् । नीलं च गौरं च तयोः समाहारः । युवा च युवतिश्चेति युवानौ ('पुमान् स्त्रिया १।२।६७' इति एकशेषः ।) तौ रत्ने तयोर्युगमिति ॥१७३॥

महाकविः स्वसाफल्यं विवृणोति अनुष्टुप्छन्दसा

राधामाधवयोर्दानकेलिचिन्तामणिं गिरौ ।
लब्धमन्धेन वीक्षन्तां श्रीमद्रूपगणाः प्रियाः ॥१७४॥

अन्वयः—प्रियाः श्रीमद्रूपगणाः गिरौ अन्धेन (मया) राधामाधवयोः दान-केलिचिन्तामणिं लब्धं वीक्षन्ताम् ।

भावार्थः—श्लेषेण महाकविः ग्रन्थसमाप्ति सूचयति—प्रिया मे श्रीमद्रूपगो-स्वामिगणाः गिरौ इह गोवर्द्धनपर्वत एव अन्धेन मया राधामाधवयोर्दानकेलिचिन्ता-मणिं ग्रन्थं सम्पूर्णं लब्धम्, पक्षे दानकेलिचिन्तामणिं दानक्रीडया ध्यानरत्नमणिम् (राधामाधवयोरित्यर्थः) प्राप्तं वीक्षन्तां परिशीलयन्ताम् अनुभवन्त्विति पक्षान्तरे ।

समासादिः—राधा च माधवश्चेति द्वन्द्वे 'अभ्यर्हितं च–२।२।३४' इति वार्तिक-बलाद् राधायाः पूर्वनिपातः । दानमेव चिन्तामणिर्यत्रेति ग्रन्थपक्षेऽन्यत्र दानकेलिना चिन्ता एव मणिः । लाभक्रियायामुभयोरन्वयः । श्लेषरूपकादिसङ्करः ॥१७४॥

ग्रन्थान्तमङ्गलं विदधन्महाकविः स्वाहङ्कारं परिमार्ष्टि—

आददानस्तृणं दन्तैरिदं याचे पुनः पुनः ।
श्रीमद्रूपपदाम्भोजे रजोऽहं स्यां भवे भवे ।।१७५।।

अन्वयः-- प्रज्ञाचक्षुः श्रीरूपगोस्वामिसम्प्रदायभाङ्महाकविर्वक्ति—दन्तैस्तृणम् आददानः अहम् इदं पुनः पुनः याचे यद् अहं श्रीमद्रूपगोस्वामिपदाम्भोजे भवे भवे प्रतिजन्म रजः स्याम् ।

भावार्थः—महाकविरयं रूपगोस्वामिसम्प्रदायमध्यग एवास्तीति तत्पदकञ्जे रजोरूपतया स्थातुं प्रतिजन्म चेष्टते, भक्तिपक्षगा मुक्तिं नेच्छन्ति, स्वेष्टदेवभक्तिमेवाभिलषन्तीति महाकवेस्तादृगेव याचनेति शिवम् ।

समासादिः—श्रीमद्रूपस्य रूपस्वामिनः पदम् अम्भोजम् इव तत्रेति उपमितसमासः । "नामैकदेशग्रहणे नामग्रहणम्" इति न्यायात् पूर्णनामोपलब्धिः ।।१७५।।

।। इति श्रीदानकेलिचिन्तामणिनामप्रबन्धः सम्पूर्णः, संवत् १८७८, शाके १७४३ मिति आषाढ वदि ७ भृगुवासरे लिखि ब्राह्मणहरिदेवगढभरथपुरमध्ये राजरणधीरसिंहव्रजेन्द्रको पुस्तकलिखनपरिश्रमवेत्ता विद्वज्जनो नान्यः । **सागरलंघनखेदं** हनुमानेव कः परो वेद । (१६८) ।

।। म० म० डॉ० श्रीगोपालशास्त्रिणा दर्शनकेशरिणान्वयभावार्थसमासादिना त्रिधाव्याख्यानेन विभूषितो दानकेलिचिन्तामणिप्रबन्धो वैशाखाक्षयतृतियायां संवत् २०३७ वैक्रमे । (६।५।१९८१ ई०) ।।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय